मानवविकासको द्योतक वैदिक कालदेखिने हाम्रो शैलीले चिरकाल पर्यन्त चली आएको, बीचमा ऐतिहासिक घटनाक्रमले विश्रृङ्खल हुन गएको पाठ्यक्रम सुधारी पूर्ववत् ज्ञान-विज्ञानको समन्वय गरी आध्यात्मिक तथा भौतिक उन्नतिको सहसत्ता स्थायी राखने क्रियाशील शिक्षा प्रदान गरेर विश्वात्मदर्शी सबल र अनुशासनशील आदर्श स्नातक सम्पादन गर्नु यस संस्कृतविश्व-विद्यालयको मूल उद्देश्य छ।

हिन्दूराष्ट्र नेपालमा हिन्दू-संस्कृतिको मूलस्रोत संस्कृत वाङ्मयको उपेक्षाले राष्ट्राभिमानी नेपालीहरूको हृदयमा चोट लागेको कुरा स्वाभिमानी बुद्धिजीवी-हरूको अनुभूत विषय हो। राष्ट्रनायकको नेतृत्वमा शिक्षाक्षेत्रमा आएको अभूतपूर्व क्रान्तिलाई आजको पीढिले विनयपूर्वक स्वीकार गरेको छ। तसर्थ संस्कृत-संस्कृत्यनुरागी श्रीपञ्चको उदार नेतृत्वमा संस्कृत क्षेत्रको पनि विकासका सम्भावनाहरू पुष्ट हुँदै आएको देखी संस्कृतज्ञहरू उत्साहपूर्वक जुर्मुरिएर उठेका छन् र आफ्ना समस्त सेवाहरू अर्पण गर्ने निधो गरेका छन्। संस्कृतभाषाको गहनता यस्को महत्ता मधुरता र ज्ञान-गाम्भीर्यलाई संसारले स्वीकार गरेको

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

छ तापनि यसलाई लोकोपयोगी र कल्याणकारी मार्गमा प्रशस्त गराउन न सकिएको छैन भन्न सकिदैन । तसर्थ संस्कृत र राष्ट्रिय संस्कृतिको संवर्धन एवं संरक्षण गरेर जीवनोपयोगी लोककल्याणकारी मार्गमा प्रवृत्त एवं प्रबुद्ध राष्ट्रिय चरित्रशाली योग्य स्नातक तयार पार्ने उद्देश्यले नमूना (मोडेल) को रूपमा उदार प्राचीन अर्वाचीन पाठ्यक्रम आचार-संहिता नवीन परीक्षाशैली समाज सेवा आदि कार्यक्रम द्वारा आवश्यक साधन-सम्पन्न सं० वि० वि० उपस्थित हुन खोजेको छ ।

शिक्षानीति

यसको शिक्षानीति उदार रहने छ । अन्य भाषाहरू प्रति पनि मैत्री र सद्भावको व्यवहार गरिने छ र सापत्न व्यवहारको बहिष्कार गरिने छ । शासनको मान्यताको आधारमा संस्कृत-शिक्षार्थीहरू भाषान्तरको शिक्षा प्राप्त गर्न सक्नेछन् र भाषान्तरका शिक्षार्थीहरूको लागी सजिलैसंग सं० वि० वि० मा प्रवेश गर्न सकिने व्यवस्था हुनेछ । यसको लागि नेपाली-हिन्दी-अंग्रेजी आदि भाषान्तरका शिक्षाहरूमा तलैदेखि उच्च कक्षासम्म संस्कृत शिक्षा अनिवार्य हुनुपर्दछ । यसै गरी संस्कृत शिक्षाको पाठ्यक्रममा स्तर अनुसार हिन्दी, आदि-को समावेश हुनुपर्दछ ।

आचार-संहिता

राष्ट्रिय संस्कृतिको अनुकूल आचार निर्माणको लागी शिक्षक-शिक्षार्थी-पदाधिकारी र सञ्चालकहरूको निमित्त एक आचारसंहिता बनाइने छ । जो एक निश्चित नियमद्वारा परिचालित हुनेछ । आचारसंबन्धी विषयहरूको परीक्षामा समावेश गर्नु पर्दछ र आचारसंबन्धमा कम अङ्क प्राप्त गर्ने परीक्षार्थी-ले उपाधि प्राप्त गर्न न सक्ने व्यवस्था हुनुपर्दछ ।

अनुशासन

सम्पूर्ण संस्कृत - विश्वविद्यालय-परिवारमा सौमनस्य एकता र बन्धुता ल्याउनाको लागि एवं आधुनिक शिक्षालयहरूमा व्याप्त प्रच्छन्न असन्तोष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लाई उम्रनै नदिन, सामूहिक प्रयास र संबन्धित पञ्चकृत निर्णयको संस्थामा पूर्ण अनुशासन प्राप्त गर्नको लागि आवश्यकता पर्ने हुँदा उक्त लक्ष्यपूर्तिका निमित्त विश्वविद्यालयका पदाधिकारी अध्यापक एवं छात्रहरूको पूर्ण प्रतिनिधित्व भएको एक विश्वविद्यालय-पञ्चायत कुलगुरुको अध्यक्षतामा हुनेछ। जो संस्थागत परिवारबाट निर्वाचित हुनेछ।

नाम

यसको नाम 'महेन्द्रवीरविक्रमसाहदेव - संस्कृत-विश्वविद्यालय' हुनेछ संक्षिप्तनाम म० सं० वि० वि० रहने छ।

स्वरूप

आर्थिक दृष्टिकोणलाई ध्यानमा राखी प्रारम्भमा यस्को स्वरूप छोटो छरितो र प्रभावकारी हुनेछ र संस्कृतका प्राप्य एवं प्रचलित साहित्य दर्शन आदि विषयहरू यथासम्भव समाविष्ट गरिने छन् र अन्य भाषाका साहित्य दर्शनहरू पनि तुलनात्मक अध्ययनको लागि यथासाध्य राखिने छन्। आजको आर्थिक युगमा अर्थकरी विद्याको स्वाभाविक आकर्षणलाई विचार गर्दा एवं देशका असंख्य जडीबूटी सञ्जीवनी आदिको उपयोगको अत्यन्त आवश्यकतालाई अनुभव गर्दा यस संस्कृत विश्वविद्यालयमा विशेष विभागको रूपमा प्राचीन एवं आधुनिक विषय समाविष्ट आयुर्वेदिक शिक्षालाई प्रभावकारी तुल्याइने छ।

प्रशासन

सं० वि० वि० को प्रशासन एवं परिचालनमा सुदृढ संगठनको आवश्यकता पर्ने छ। जस्मा कर्तव्य र अधिकारको स्पष्ट विभाजन श्री ५ को सरकारले सं० वि० वि० विधेयक द्वारा गर्ने छ। आवश्यकताअनुसार गर्नुपर्ने हेर फेर सं० वि० वि० पञ्चायत र परामर्शदातृ परिषदको सहयोगबाट कुलगुरुको सम्मतिले कुलपतिद्वारा हुनेछ।

पदक्रम

कुलपति:—प्राचीन सरणीमा पनि राजामानै विश्वविद्यालय एवं कुलगुरु सम्बन्धी प्रत्यक्ष उत्तरदायित्व सुम्पिएको पाइन्छ, तदनुसार यो संस्कृतविश्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्यालयले श्री ५ महाराजाधिराज सरकारमा कुलपतिको पद टक्याउने छ र कुलपतिबाटनै संस्कृतको चतुरस्र विद्वान् आचारनिष्ठ एवं अनुशासनकुशल कुलगुरुको नियुक्ति हुनेछ ।

कुलगुरुः—विश्वविद्यालयका प्रधानसञ्चालक कुलगुरुनै हुनेछन् । कुलगुरुलाई परामर्श दिनका लागि एक 'परामर्श दातृ समिति' गठित गरिने छ र त्यस्मा विभिन्न विभागाध्यक्षहरू शि० मं० पञ्चायत र दातृवर्ग का प्रतिनिधि शिक्षाविशेषज्ञ समाजसेवीहरू एवं स्थानीय सरकारी प्रतिनिधि आदि रहने छन् ।

कुलसचिवः—कुलगुरुका संमतिद्वारा कुलसचिवले सं वि० वि० को चल-अचल सम्पत्तिको आर्जन, संरक्षण, सम्वर्धन, साधारण, प्रशासन नियुक्ति र परीक्षा आदिको सञ्चालन गर्ने छन् ।

निदेशक :—निदेशकले अध्यापनविभाग, पुस्तकालय, अनुसन्धान एवं प्रयोगशाला, छात्रावास, आदिको रेखदेख सञ्चालन गराउने छन् ।

छात्रसम्पत्ति

संस्कृत विश्वविद्यालयमा छात्रहरूको सङ्ख्या पर्याप्त मात्रामा प्राप्त गर्न संस्कृतमय वातावरणको आवश्यक हुन्छ । यसका निमित्त संस्कृतज्ञहरूको जीविकाक्षेत्र विस्तृत बनाउनु पर्छ । संस्कृतका उपाधिहरूलाई प्राथमिकता दिई लोकसेवा-आयोगमा विज्ञापनहरू प्रकाशित गर्नुपर्छ । सरल र सरस संस्कृत भाषामा रेडियो द्वारा समाचार प्रसारित गर्ने व्यवस्था हुनुपर्छ । प्रत्येक ग्राम-पञ्चायतमा एक एक प्रारम्भिक संस्कृत पाठशाला, प्रत्येक जिल्लामा संस्कृत प्रधानपाठशाला र प्रत्येक अंचलमा एक एक संस्कृत महाविद्यालय हुनु आवश्यक छ । प्रत्येक ग्रामपञ्चायतमा र विशिष्ट देवमन्दिरहरूमा सुयोग्य संस्कृत विद्वान्हरूद्वारा नियमतः कथा र प्रवचन गराउने प्रबन्ध गर्नुपर्छ । यस प्रकार संस्कृतमय वातावरण उपयुक्त बनाए पछि आर्यसंस्कृतिको गौरव पनि अक्षुण्ण रहनेछ र आर्यसन्ततिले अन्यधर्मको अवलम्बन पनि गर्नेछैन ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संस्कृतविश्वविद्यालयको प्रारम्भिक स्वरूप

"विश्वविद्यालय" शब्दबाटै यसको स्वरूप नितान्त विस्तृत प्रतीत हुन्छ। आफ्नो संस्कृतिसंग सम्बद्ध साङ्ग सरहस्य समस्त विद्याहरूको विधिवत् उपदेशको व्यवस्थाका साथ देश, काल, परिस्थिति अनुसार आवश्यक र अपेक्षित अन्यान्य संस्कृतिसम्बद्ध विद्याहरूको पनि अध्ययनको प्रबन्ध यहाँ यथासंभव गरिनु पर्दछ। तदनुसार प्राचीन आविष्कारहरूको अन्वेषणपूर्वक पुनरुज्जीवन र आधुनिक आविष्कारहरूको सङ्कलन विश्वविकास, विश्वशान्ति र विश्वकल्याणको लक्ष्य राखेर हुनुपर्छ। प्रारम्भमा बहुव्ययसाध्य ठूलठूला आविष्कार गर्न सकिदैन तापनि सस्ताना जीवनोपयोगी वस्तुहरूको उत्पादन गरेर शनैः शनैः राष्ट्रलाई आत्मनिर्भर गराउने लक्ष्य लिएर प्रवृत्त भयौं भने हामी पनि आजका विकसित राष्ट्रहरूका दाँजोमा कम हुने छैनौं।

आज भन्दा २०।२५ वर्ष अघि हाम्रो राष्ट्रको धेरै जसो भाग धेरै कुरामा स्वावलम्ब थियो। तर आज विलासितातिर लागेर हामी सुस्त-सुस्त परमुखप्रेक्षी हुंदैछौं। कपास र ऊनको उत्पादन गरी निर्वाह गर्ने मगर्नी ज्यापुनी लिम्बुनी गुरूङ्से थरूनीहरू पनि आज नाइलनको सारी लगाई पराधीन हुँदैछन्। रूसबाट दूध र चीनबाट चीनी झिकाई चियाको तलतली मेट्ने प्रवृत्ति हाम्रो भइरहेको छ। यस प्रकार क्रमशः पराधीन हुँदै गयौं भने चाँडैनै आफ्नु अस्तित्व गुमाउन पर्ने परिस्थिति हामीमाथि आइलाग्ने छ।

अतः सो परिस्थिति हटाउन यस विश्वविद्यालयले संस्कृतवाङ्मयको विशिष्ट अध्ययन अध्यापन र मननपूर्वक प्राचीन प्रौढिको संरक्षणका साथ साथै राष्ट्रलाई स्वावलम्ब बनाउन प्राविधिक र व्यावसायिक शिक्षा रचनात्मक रूपमा दिने दिशातिर पनि यथासंम्भव प्रयत्न गर्ने छ।

१—पाठ्यक्रम

आजको संस्कृत-समाजले मात्र-संस्कृतको एकाङ्गी रूपबाट लोकोपयोगी जीवनोपयोगी व्यवहारोपयोगी शिक्षा समाजलाई दिन सक्तैनौं कि भन्ने आशंका-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लाई बुझेको छ। 'सुहाउंदो ज्ञान र विज्ञानको समन्वयले प्राचीन इतिहास र परम्पराको जग नखलबल्याई आधुनिक व्यावहारिक कर्म र चरित्रमा कसरी आवश्यक सुधार गर्नु पर्दछ' भन्ने युगको वेदनालाई हृदयङ्गम गरेको छ, र यसलाई कस्तो साँचोमा ढाले देश-सुहाउंदो हुन सक्छ, भन्ने राष्ट्रको उत्कण्ठालाई बुझेको छ।

यस तथ्यलाई हामीले आज मात्र बुझेको होइन, हाम्रा पूर्वजहरूले पनि यस तथ्यलाई बुझिसकेका थिए। 'पुराणमित्येव न साधु सर्वं न चापि काव्यं नवमित्यवद्यम्' भनी युवा क्रान्तिकारी मनीषीहरूले वैचारिक क्रान्तिको प्रारम्भ गरिसकेका थिए, तापनि आर्यसंस्कृतिमाथिको वैदेशिक सांस्कृतिक आक्रमणको वेलामा भोगवादी रंगमा रंगिएको पतनोन्मुख समाजले यस क्रान्तिकारी परम्परालाई दिगो राख्न सकेन। शासन-संरक्षण विना वैदेशिक सांस्कृतिक विजयवाहनी संग मुकाविला गर्न न सकी चूपचाप पछाडि रहेको कुरा ऐतिहासिक तथ्यहरूले इङ्गित गर्दछन्। हाम्रा धर्मशास्त्रका केही अंशहरू भाषान्तरमा पढी न्यायाधीशले अपराध नियन्त्रणमा आफुलाई सफल पाउंछु भने, तर्कशास्त्रका केही नगण्य प्रक्रिया भाषान्तरमा पढी वकील न्याय-मञ्चमा तर्क दिन सक्छन् भने, हाम्रा तमाम दर्शनशास्त्रहरू विश्वका आधुनिक दर्शनलाई हाँक दिन पर्याप्त छन् भने, हाम्रो गीता आधुनिक जगत्मा लोभ र लालचसंग पढिदै छ भने, हामीलाई निराश हुनुपर्ने कुनै कुरै छैन। न त हामी रित्तोनै छौं, न खालीनै। किन हामीले कसैको मुख ताक्ने? भन्ने आत्म-विश्वास सबैभन्दा पहिले संस्कृतजगत्मा जाग्नु परेको छ। 'अनि तातस्य कूपोऽयमिति' भन्ने हठधर्मीहरू संग जुझनु सक्न परेको छ।

हामीले सबैभन्दा ठूलो कुरा के बुझेका छौं भने, मानिस एक विवेकशील प्राणी हो, विवेकका स्रोत र मुहानहरू भाषा एवं साहित्यनै हुन्छन्, त्यसै उसले साहित्य एवं भाषाको समृद्ध स्रोत वा मुहानको रूपमा संस्कृतभाषा वा साहित्य रहेको कुरा एक मतले संसारले स्वीकार गरेको छ। यस साहित्यको चर-गुञ्जनको अमरस्वाद सबैले लिन चाहेका छन्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हिजोको संसार एक जाति वा एक भाषा-भाषीको थियो भने आजको चन्द्र-युगी विश्व-समाज एक जाति वा एक भाषाभाषीको छैन । त्यसैले संस्कृत भाषा वा संस्कृतसाहित्यको मर्मलाई न बुझेका कोही विरोध गर्छन् भने अस्वाभाविक विरोध होइन भन्न करै लाग्छ । यस विरोधलाई नास्तिक भनेर होइन, विशाल एवं व्यापक रूपमा आर्षग्रन्थहरूको विश्वका मूलभाषाहरूमा अनुवाद गराई सारांश निकाली सुनाउन र सिकाउन परेको छ । अनि त्यसै गरी संसारमा चेतना एवं ज्ञानपिपासा शान्त गर्नमा हाम्रा-पूर्वज मनीषीहरूको पर्याप्त योगदान थियो तापनि संसारका अरु धेरै विभूतिहरूले ज्ञान-विज्ञानको पिपासा-पूर्तिमा आफुलाई उत्सर्ग गरेका छन्, उनले आफुले अन्वेषण एवं प्राप्त गरेका विषय वा वस्तुहरू आ-आफ्ना भाषामा छाडेर गएका छन्, यस विचार चर्चा वा अन्वेषणलाई अनुवादद्वारा संस्कृत-जगत्लाई बोध गराउन आजको पीढिको कर्तव्य हुनजान्छ । यसै विचार सन्दर्भमा राष्ट्रको उत्कण्ठालाई बुझी आर्यसंस्कृति र हिन्दूराष्ट्रको एक मात्र प्रतीक नेपाल अधिराज्यमा, संस्कृतजगत्का आदर्श वा परम्पराहरूको प्रतीक संस्कृतविश्वविद्यालयलाई हिन्दूजगत्ले हेर्न चाहेको कुरा स्पष्टरूपमा बुझेका छौं ।

प्रारम्भमा साधन, अर्थाभाव वा कतिपयकारणहरूबाट लक्ष्यप्राप्तिको अनुरूप विश्वविद्यालयको स्वरूप वा ढाचा प्रस्तुत गर्न न सकिए तापनि हामीले आफुलाई तबै सफल संझने छौं, जब हामी यस लक्षित दिशातर्फ अगाडि बढदै गएका हुनेछौं । तसर्थ संस्कृतप्रतिको उपेक्षापूर्ण वातावरणमा खर्चीला र आडम्बरपूर्ण योजनाहरू प्रभावकारी हुँदैनन् कि भन्ने आशंकामा विश्वविद्यालयको पाठ्यक्रमसम्बन्धी सामान्य योजना प्रस्तुत गरेकाछौं ।

पाठ्यक्रम-सम्बन्धी रूपरेखा र विषय-सम्बन्धी दिग्दर्शन

समस्त विद्या र उपविद्याहरूलाई निम्नलिखित चार संकाय (फैकल्टी) मा विभक्त गर्ने ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१—आन्वीक्षिकी

२—त्रयी

३—वार्ता

४—दण्डनीति

आन्वीक्षिकीसङ्कायमा निम्नलिखित विभाग रहनेछन्

(क) न्यायवैशेषिकविभाग ।

(ख) साङ्ख्ययोगविभाग ।

(ग) बौद्धन्याय-जैनन्यायविभाग ।

(घ) आगमविभाग ।

(ङ) चार्वाकरसेश्वरविभाग ।

(च) मनोविज्ञानविभाग ।

त्रयीसङ्कायमा

(क) वेदविभाग ।

(ख) व्याकरण-निरुक्तविभाग ।

(ग) मीमांसाविभाग ।

(घ) वेदान्तविभाग ।

(ङ) धर्मशास्त्रकल्पशास्त्रविभाग ।

(च) ज्यौतिषविभाग (त्रिस्कन्ध) ।

(छ) साहित्यविभाग ।

(ज) इतिहास-पुराण-पुरातत्त्वविभाग ।

(झ) आयुर्वेदविभाग (अष्टाङ्ग) ।

(ञ) शिक्षाविभाग ।

वार्तासङ्कायमा

(क) वाणिज्यशास्त्रविभाग ।

(ख) स्थापत्यशास्त्रविभाग ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(ग) यन्त्रशास्त्रविभाग ।

(घ) भूगर्भशास्त्रविभाग ।

(ङ) प्राणिशास्त्रविभाग ।

(च) वनस्पतिशास्त्रविभाग ।

(छ) कृषिशास्त्रविभाग ।

(ज) रसायनशास्त्रविभाग ।

(झ) स्वराष्ट्रभाषाविभाग ।

(ञ) राष्ट्रान्तरभाषाविभाग ।

(ट) चित्रकलाविभाग ।

दण्डनीति सङ्कायमा

(क) अर्थशास्त्रविभाग ।

(ख) विधिशास्त्रविभाग ।

(ग) युद्धशास्त्रविभाग (आसन-व्यायामसहित)

(घ) नीतिशास्त्रविभाग ।

(ङ) पञ्चायतदर्शनविभाग ।

(च) राजनीतिशास्त्रविभाग ।

(छ) पत्रकारिताशास्त्रविभाग ।

उपर्युक्त चार सङ्कायका विभागहरूमध्ये प्रारम्भमा निम्न प्रकारका विभागहरू चलाइने छन् ।

१—आन्वीक्षिकीसङ्कायमा न्याय-वैशेषिक, साङ्ख्य-योग, बौद्धजैन-न्याय र आगम समेत ४ विभाग ।

२—त्रयीसङ्कायमा वेद, व्याकरण, ज्यौतिष, साहित्य, आयुर्वेद, इतिहास-पुराण, धर्मशास्त्र र वेदान्त समेत ८ विभाग ।

३—वार्तासंकायमा स्थापत्य, भूगर्भ, वनस्पति, कृषि स्वराष्ट्रभाषा र चित्रकला समेत ६ विभाग ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४—दण्डनीतिसङ्कायमा अर्थशास्त्र, विधिशास्त्र, पञ्चायतदर्शन र राजनीति-शास्त्र समेत ४ विभाग ।

प्रवेशिकादेखिनै संस्कृत अनिवार्य गरेर ज्ञान-विज्ञान-समन्वयको सिद्धान्तको आधारमा एक पत्र व्यावसायिक विषयको पनि अनिवार्य गरिने छ । वर्तमान पाठ्य-ग्रन्थावलीमा आवश्यक परिवर्तन-परिवर्धन गरेर ज्ञान-विज्ञान-समन्वय गर्न विशिष्ट र अनुभवी विद्वान्हरूको एक समिति सङ्घटित गरी उसको निर्णय अनुसार क्रमशः सो पाठ्यक्रम लागुगरिने छ ।

२ अध्यापन

यस विश्वविद्यालयको अध्यापन प्रारम्भमा निम्नलिखिन ४ निकायद्वारा चलाइनेछ ।

१—ब्रह्मचर्याश्रम (पाँचवर्षसम्म पूर्वमध्यमा स्तरको) ।

२—प्रधानपाठशाला (प्रवेशिका र पूर्वमध्यमाको) ।

३—महाविद्यालय (उत्तरमध्यमा शास्त्री र आचार्यको)

४—प्रशिक्षण-महाविद्यालय (प्रवेशिकादेखि आचार्यसम्मको)

चारै निकायको अध्यापन यथासम्भव संस्कृतभाषाको माध्यमबाट चलाइनेछ । संस्कृतभाषामा प्राप्त हुन नसकेको विषयलाई प्रारम्भमा अन्य भाषाका पुस्तक हेरेर शिक्षकहरूले संस्कृतको माध्यमबाटै पढाउनेछन् र पछि-पछि अनुवाद विभागद्वारा सो विषय संस्कृतमा ल्याइने छ । आध्यात्मिक विश्वास र विकासको साथमा भौतिक उन्नति पनि अध्यापनको मुख्य लक्ष्य रहने छ ।

३ अनुसन्धान

सर्वप्रथम राष्ट्रमा अैले निर्विकल्प रूपबाट चलिरहेको राजतन्त्रात्मक पञ्चायती प्रजातन्त्र-व्यवस्थाको आधारभूत पञ्चायतदर्शनको अनुसन्धान प्राचीन राज-शास्त्रको आधारमा गराई पञ्चायती-दर्शनलाई विशुद्ध र परिष्कृत पारिने छ । नेपालका विभिन्न पुरातात्त्विक सामग्रीको आधारमा नेपालको विशुद्ध इतिहासको

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र नेपाली संस्कृतिको वास्तविक स्वरूपको अनुसन्धान गराई प्रकाशित गरिनेछ। देशलाई आत्मनिर्भर बनाउने खालका विभिन्न कलाकौशल र आयुर्वेद आदिको अनुसन्धान गराई कार्यान्वयन गरिनेछ। क्रमशः आधुनिक विज्ञानलाई पनि आफ्नै साँचामा ढाली प्रयोगमा ल्याउने पद्धतिको गवेषणा गरिनेछ र संस्कृतवाङ्मयमा छरिएका विषयको उपयोगानुसार संकलन गराइनेछ।

४ परीक्षा

प्रतिभा, आचारनिष्ठा, राष्ट्रियभावना र क्रियाशीलताको समेत विचार गरी विषय हेरेर लिखित मौखिक र प्रायोगिक परीक्षाहरूको निष्पक्ष र विशुद्धपद्धतिबाट पाक्षिक, मासिक, षाण्मासिक र वार्षिकरूपले सञ्चालन गराई अरु विश्वविद्यालयहरू सङ्ग सम्पर्क राखेर मान्यता लिई स्नातकहरूको जीविकाक्षेत्र विस्तृत बनाउ र राम्रो उदाहरण प्रस्तुत गर्न सर्वदा ध्यान दिइनेछ।

परीक्षाहरू प्रचलित रूपमानै प्रवेशिका, पूर्वमध्यमा, उत्तरमध्यमा, शास्त्री र आचार्य [illegible] प्रकारका श्रेणीमा विभाजित गरिने छन्।

आन्वीक्षिकी र त्रयी सङ्कायको शास्त्री परीक्षामा उत्तरमध्यमामा उत्तीर्ण भएका छात्रनै प्रविष्ट गरिने छन्। वार्ता र दण्डनीति सङ्कायको शास्त्री परीक्षामा मने संस्कृतलिई आई० ए० पास भएका छात्रहरू पनि प्रविष्ट गराउन सकिने छन्। यसै गरी आन्वीक्षिकी र त्रयी सङ्कायका शास्त्रीहरू आचार्य कक्षामा प्रविष्ट हुन सक्नेछन् र संस्कृत लिई बी० ए० पास भएका छात्रहरू वार्ता र दण्डनीति सङ्कायको आ-आफ्नो विषयको आचार्य कक्षामा प्रविष्ट हुनसक्ने छन्।

५ अनुवाद-परिषद्

यस संस्कृतविश्वविद्यालयमा संस्कृतभाषामा व्युत्पन्न र अन्यभाषाविज्ञ विद्वान्हरूको एक अनुवाद-परिषद् सङ्घटित गरिने छ, यस परिषद्ले अरु भाषाका उपयोगी र आवश्यक विषयहरूको विभिन्न भाषाशास्त्रीहरूको सहयोग लिई सरल संस्कृतमा अनुवाद गर्नेछ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६ वैतनिक पदाधिकारी र सहायक

१. कुलगुरु	१
निजसचिव	१
धावक	१
	३
२. कुलसचिव	१
सहायककुलसचिव	१
कार्यालयप्रमुख	१
लिपिक	१
धावक दुई	२
	६
३. निदेशक	१
निजसचिव	१
धावक	१
	३
४. महाविद्यालयमा	
(क) श्रेणीका सङ्कायप्रमुख चार	४
(ख) श्रेणीका प्राध्यापक पाँच	५
(ग) श्रेणीका प्राध्यापक छ	६
कार्यालयप्रमुख	१
लिपिक	१
धावक दुई	२
	१९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५. प्रधानपाठशालामा—

अध्यापक चार	४
सहायकाध्यापक तीन	३
लिपिक	१
धावक	१
	९

६. ब्रह्मचर्याश्रममा—

अध्यापक	१
परिचारक दुई	२
	३

७. अनुसन्धानविभागमा—

निर्देशक	१
सहायक दुई	२
लिपिक	१
धावक दुई	२
	६

८. परीक्षाविभागमा—

प्रबन्धक	१
सहायक	१
लिपिक दुई	२
धावक दुई	२
	६

९. लेखापरीक्षण विभागमा—

लेखापरीक्षक	१
सहायक	१
लिपिक	१
धावक	१
	४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१०. पुस्तकालयमा—

ग्रन्थागाराधिकृत	१
लिपिक	१
धावक दुई	२
	४

११. प्रशिक्षणमहाविद्यालयमा—

सङ्कायप्रमुख	४ (महाविद्यालयैका)
(क) श्रेणीप्राध्यापक	४ (महाविद्यालयैका)
(ख श्रेणीप्राध्यापक	५ (महाविद्यालयैका)
लिपिक	१
धावक	१
	१५

१२. भोजनालयमा—

प्रधानपाचक	१
सहायक तीन	३
परिचारक चार	४
	८

१३. रसायनशालामा—

निर्देशक	१
सहायक	१
परिचारक	६
	८

७ वेतनक्रम

यहां वेतनको क्रम त्रिभुवनविश्वविद्यालयसरहनै प्रायः रहने छ । परिस्थित्यनुसार आवश्यक न्यूनाधिकभाव पनि गर्न सकिने छ ।

———

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संस्कृतविश्वविद्यालयस्य पृष्ठभूमिः ।

प्रजानाङ्कल्याणकरणमेव राज्यस्योद्देश्यमिति स्वभावतो हृदयङ्गमीकृत्य प्राचीना राजानो जानन्तिस्म यत् यावत्प्रजाः सुशिक्षिता अनुशिष्टाश्च नो भवेयुस्तावत्तासां कल्याणं कर्तुन्न शक्यत इतितथ्यम् । अतो हेतोः शिक्षाप्रचारकर्मणो ब्राह्मणसमाजस्य जीविका राज्यादेव जायेतेस्म । तस्मिन्समये जीविकाचालनाय अदण्डकरभूमिभृतिदानपरिपाटी आसीत् । तदनुसारं दाङ्गस्य तात्कालिकै राजभिरनेकेभ्यो ब्राह्मणेभ्यो वृत्तिभूमिर्दत्ताऽभूत् । या वृत्तिः श्री ५ महाराजाधिराजानां पूर्वजेन श्री ५ गीर्वाणयुद्धविक्रमसाह देवेन यथावदभ्यनुज्ञाताऽऽसीत् । एतयैव वृत्त्या आजीविकाश्चालयन्त इहत्या ब्राह्मणा आत्मनः पठन-पाठनप्रणालीं निर्बाधं चालयन्तिस्म ।

साम्प्रतिकभारतस्थितगोनर्दमण्डलस्य देवीपट्टनराज्ये दाङ्गाङ्गीभूते दाङ्गस्य विद्यार्थिनां विद्याप्राप्तिस्थानं देवीपट्टनपीठमेवाभूत् । रसचन्द्राङ्कभू (१९१६) मिते वैक्रमे सम्वत् देवीपट्टनेन सह विच्छिन्ने राजनीतिकसम्बन्धे दाङ्गस्य विद्यार्थिभिः काशकी-काष्ठमण्डपकाश्यादिषु गत्वा पठितुमारब्धम् । किन्तु तानि स्थानानि दूरे स्थितानीति सर्वे विद्यार्थिनस्त्र गत्वा पठितुं न शक्ताः । अतो हेतोः सूदयराम-मजगैंया-सन्ततिरपि दाङ्ग एव पाठशाला संचालनविचारमकरोत् । समये समये प्राठशालाश्चालिताः किन्तु विभिन्नकारणकलापेन रुद्धाश्च ताः ।

शराश्वाङ्कधरामिते (१९७५) वैक्रमे भीमप्रसादपण्डितो ध्रुवकूटादागत्य प्रमुखो भूत्वा पाठयितुं प्रारब्धवान् । ततः पश्चात्पाठशालायाः स्थायित्वमागतम् । ततः परं पं० चेतोनाथस्तस्यां पाठशालायां नियुक्तः । तत्समयपर्यन्तं विद्वांसो दक्षिणारूपेण स्वल्पेन द्रव्येण पाठनकर्म कुर्वन्तिस्म । सा च दक्षिणा मजगैंयापरिवारेण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्ववृत्तिदेवखुरीभूमेरायाद् दीयतेस्म। इत्थं प्रचलन्त्यां पाठशालायां रसेभाङ्कविधुमिते (१९८६) वैक्रमे शासनसंरक्षणमपि प्राप्तम्। ऋषिनभःखभुजमित (२००७) वैक्रमात्संवदस्माकं देशे शिक्षाप्रचारस्य तीव्रता प्रारब्धा। गजशून्यव्योमशृङ्गमिते (२००८) वैक्रमे च संस्कृतशिक्षाज्योतिः सर्वत्र चकास्तु तथास्माकं धार्मिकी सांस्कृतिकी परम्परा यथावदग्रेऽपि वर्धतामिति सदाशयेन स्थानीयजनतायाः सत्प्रयासेन च जनताविद्यालयनामको द्वितीयो विद्यालयो वैशाखमासे षड्विंशतिमभे दिने गते स्थापितः। भूमीन्दुखनेत्रमिते (२०११) वैक्रमे विद्यालयायास्मै मजगैंयापरिवारो देवखुरीस्थितां द्वादशशतवर्ग (विगाहा १२००) परिमितां भूमिं प्रदत्तवान्। तदनन्तरमन्यव्यक्तिभिरपि भौमिक्यार्थिकी च सहायता प्रदत्ता। कतिपयैमहानुभावैश्छात्रावासपुस्तकालयादिनिर्माणसहयोगः कृतः।(भूमिदात्रिणां नामानि भाषायां वष्टव्यानि)

जनताविद्यालयः स्थापनायाः कतिपयमासानन्तरं शासनतः स्वीकृतिं प्राप्तवान्। तस्मिन्नेव वर्षे विद्यालयायास्मै महाविद्यालयरूपेण मान्यता काशीस्थराजकीयसंस्कृतमहाविद्यालयेनापि दत्ता। अग्निभूमिनभोभुजमिते (२०१३) वैक्रमेऽब्दे स्वकीयशासनेन (नेपाल सरकार) अपि तस्य मान्यता स्वीकृता, पश्चात् त्रिभुवनविश्वविद्यालयेनापि सम्बन्धः स्थापितः।

एवं प्रकारेण महाविद्यालयमेनमग्रे वर्द्धयितुं यैर्यैः सज्जनैर्विशेषसेवाःकृताः ये च कुर्वन्त एव सन्ति तेषां नामोल्लेखनमपि प्रसङ्गप्राप्तमत्र। (संचालकसमितेः सचिवानां प्रधानाचार्याणां च नामानि भाषाभागे द्रष्टव्यानि)

उपर्युक्तसज्जनातिरिक्ता अनेकाः सहृदयव्यक्तयः समये समये महाविद्यालयायास्मै विभिन्नप्रकाराः सहायताः प्रादुरिति महाविद्यालयप्रगतिरार्थिक आधारः संस्कृतवाङ्मयं प्रति श्रद्धालुसमाजस्य सदाकाङ्क्षा च विश्वविद्यालयार्थं प्रेरणां ददति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विश्वव्यापकं वैदिकवाङ्मयमनन्तमगाधञ्च विद्यते । संस्कृत भाषारत्नाकरेऽसंख्यान्युज्ज्वलानि रत्नानि सन्ति । संस्कृतभाषा विश्वस्य विश्वासां भाषाणां माता भवति। ततो हेतोश्चिरकालादेव नानैतिहासिककारणकलापेन तत्समतद्भवापभ्रंशादिभेदप्रभेदेषु विभज्यमानेनाप्यधिकांशतः प्रायः सर्वासां विश्वभाषाणां संस्कृतेन सह सम्बन्धो वर्तत एव । विश्वस्य कतिपयेषु राष्ट्रेषु सहराष्ट्रभाषा-रूपेणांशिकमातृभाषारूपेण चाद्यापि विद्यते । तस्मादेव संस्कृतं मातृ-भाषा, संस्कृतं राष्ट्रभाषा, संस्कृतं विश्वभाषा इत्यादि भण्यते ।

परं विश्वस्य विविधेषु परिवर्तनेषु संस्कृतवाङ्मयस्य मूले कुठाराघातो जातः । फलस्वरूपमिदं येज्ज्ञान-विज्ञानराशिः संस्कृत-वाङ्मयं कुण्ठितं स्थितम् । कतिपयसामयादर्वागनुकूलवातावरणे चलितेऽद्य देशे विदेशेषु च संस्कृत-प्रचार-प्रसारयोर्योजनाः क्रियान्विता भवन्ति । विशेषतस्तु वैदिकादिकालादेव सर्वतन्त्रस्वतन्त्रेऽस्माकं हिमवत्खण्डमण्डने हिन्दुराष्ट्रे परंम्परागतायाः संस्कृतपठन-पाठन प्रणाल्याः सुधारपूर्वकं प्रगतिशीलतया संञ्चालनमनिवार्यमस्ति जातम् ।

सन्दर्भेऽस्मिन् विद्वद्वर्गस्य विचारधारानुसारं सर्वसाधारण-जनमनोभावनानुकूलञ्च विक्रमसंवत् दोर्विषाणखाक्षियुक्ते (२०२२) चैत्रस्य प्रथमे दिवसे गते पञ्चश्रीयुक्तमहाराजाधिराज महेन्द्रवीरविक्रमदेवस्य करकमलद्वारोद्घाटितस्य राष्ट्रव्यापिनो बृहदाध्यात्मिकसम्मेलनस्य मञ्चे दाङ्गे विश्वस्यैकमात्रहिन्दुराष्ट्रे नेपाले एकस्य संस्कृतविश्वविद्यालयस्य स्थापना भवत्विति महत्त्वपूर्णप्रस्तावः सर्वसम्मत्या पारितः । तस्य प्रतिध्वनिरपि प्रत्येकं संस्कृतिसंस्कृतप्रणयिनां हृदयाकाशे प्रतिध्वनित एवाभवत् । परिणामस्वरूपेण द्विवर्षानन्तरं श्रुतिशृङ्गनभोभुजमितेऽब्दे (२०२४) चैत्रे प्रथमे दिने गते दाङ्ग एव विद्वत्सम्मेलनमभूत् । तस्य संक्षिप्त विवरणमिदम् :—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्वत्सम्मेलनस्य विवरणम्:—

वेदबाहुखभुजमिते (२०२४) वैक्रमे आश्विने षोडशे दिवसे गते श्रीमदञ्चलाधीशरामनारायणश्रेष्ठस्याध्यक्षतायां जातायां विजौरीजनतामहाविद्यालयसञ्चालकसमितौ सर्वसंमत्या निम्नलिखितः प्रस्तावः पारितः।

"सनातनसंस्कृतावाधारितायां वर्तमानायाः पञ्चायत्तव्यवस्थाया अनुरूपां शिक्षां प्रवर्तयितुं देशस्य समस्तमनीषिषु परमावश्यकतया प्रतीयमानस्य संस्कृतविश्वविद्यालयस्य पूर्त्तये द्वादशशतवर्गपरिमितभूमेरार्थिकस्रोतसा संयुक्तं जनतामहाविद्यालयं वर्षत्रयाभ्यन्तरे संस्कृतविश्वविद्यालयरूपेण परिणमयितुं पवित्रसंकल्पोऽनया समित्या क्रियते तथाद्यप्रभृति महाविद्यालयस्यास्य सम्पूर्णकार्यकलापो लक्ष्यमेतदभिलक्ष्य क्रियेत"।

अस्य विश्वविद्यालयस्य स्थापनया सह सम्बद्धान् विचारविमर्शान् कर्तुं नेपालभारतयोर्गरिष्ठानां विदुषामेकं सम्मेलनं विधातुं तच्च सम्मेलनमुद्घाटयितुं राष्ट्रनायके श्री ५ महाराजाधिराजे निवेदयितुं सम्मेलनस्य स्वागताध्यक्षपदे स्थातुं त्रिभुवनविश्वविद्यालयस्योपकुलपतिमनुरोद्धुं च प्रस्तावास्तस्मिन्नेव दिने निश्चिताः।

माघे मासि जनतामहाविद्यालये समागतात् शिक्षासहसचिवात् श्रीदीर्घराजकोइरालातः संम्मेलनस्यास्यावश्यकतां सम्मेलने च यथाशक्ति सहयोगदानवचनञ्च प्राप्य सञ्चालकसमितेः सम्मेलनं प्रति वृद्धिमुत्साहो गतः। राष्ट्रियान्तराष्ट्रियकार्यकलापव्यस्तस्य श्री ५ महाराजाधिराजस्य सम्मेलनोद्घाटनस्वीकृतिं प्राप्तुं तदनुकूलसमये च सम्मेलनं कर्तुमुचितमिति तस्य निर्धारणाय स्वभावतः समयाधिक्यमपेक्षितं स्थितम्. द्वयोरनयोः कार्ययोर्निश्चये जाते हि सम्मेलनस्यायोजनार्थं विचारविमर्शं कर्तुमामन्त्रितायाः संचालकसमितेरधिवेशनेन विरिञ्चाननबाहुगगनशृङ्गमिते (२०२४) वैक्रमे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माघे मास्येकविंशे दिवसे गते द्वादशवादनसमये एकविंशतियुत-शतजनसदस्यं (१२१) समवेताऽयोजकसमितिः संघटिता।

अब्धिकर्णाकाशबाहुसम्बद्धे वैक्रमे फाल्गुनेऽष्टादशदिवसे गते जनतामहाविद्यालये विद्वत्सम्मेलनायोजकसमितेरधिवेशनेन एका कार्यकारिणी समितिर्विभिन्ना उपसमितयश्च घटिताः। (सदस्यानां नामानि भाषाभागे सन्ति)

श्री ५ महाराजाधिराजानां स्वीकृतिं प्राप्तुं विद्वत्सु च निमन्त्रणापत्रं प्रापय्य तेषामागमनव्यवस्थां मेलयितुं जनतामहाविद्यालस्य निदेशकः श्री गङ्गाधरशास्त्री पराजुली काष्ठमण्डपं वाराणसीं प्रति च प्रस्थितः। प्राध्यापकः श्री सुरेन्द्रनाथझा अयोध्यां लक्ष्मणपुरं हरद्वारं प्रति प्रस्थितो विदुष आमन्त्रयितुम्, भूतपूर्वसचिवः श्रीरामप्रसाद उपाध्यायो दरभङ्गां जनकपुरं विजयपुरं प्रति च प्रस्थितः।

भारतात् सम्मेलनसम्बन्धिविशेषसामग्रीजातं क्रीत्वा नेपालगञ्जतः प्रस्थापयितुमभिभारोजनतामहाविद्यालयस्य भूतपूर्वसचिवेन श्री अमरराजशर्मणा गृहीतः कोलावासाच्च तत्तद्वस्तुजातं प्रस्थापयितुमभिभारः श्री रणबहादुरसाहेन गृहीतः।

नेपालगञ्जस्य बाटेनागन्तॄणामतिथीनां सुव्यवस्थायाः अभिभारः श्रीदत्तात्रेयशर्मणा महेन्द्रमाध्यमिकविद्यालयस्य सचिवेन गृहीतः। कोलवासस्य बाटेनागन्तुकविद्वद्वर्गस्य स्वागतसेवादिकार्यभारः सीमाशुल्कशालाधिकृतेन द्वारिकाप्रसादश्रेष्ठेन पण्डितप्रयागनारायणमिश्रेण च नीतः।

श्री ५ महाराजाधिराजानां शुभागमनस्वीकृतिः प्रान्ते प्राप्तेति सम्मेलनव्यवस्थामेलनेऽतीव तीव्रतापेक्षिता, विद्यालयपरिष्कारः, सहस्राणां दर्शकानां कृते प्राङ्गणसंस्कारः, मञ्चवेदिकानिर्माणमतिथिनिवासकुटीररचना, भोजनादिसामग्रीसंकलनं, पाकशालाप्रबन्धः, स्वयंपाकानां कृते पृथक्प्रबन्धश्चान्यच्च स्थानीयजनतायाः सहयोगेन कृताः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विमानद्वारागन्तुकातिथीनां गव्यूतिदूरविमानघट्टात्, रयलद्वारागन्तूनां योजनाष्टकात् नेपालगञ्जात्, त्रयोदशगव्यूतिदूरात् कोलवासादागन्तूनामतिथीनां सुव्यवस्था सर्वात्मना विधातुमुचिता स्थिता, कार्यमिदं व्यावसायिकदृष्टिकोणवतां जनानां द्वारा स्वागतसम्मानानुकूलं न भावीति दृष्ट्वाऽऽयोजकसमित्या स्वयमुचितं कर्तुमभूत्। संस्कृतरक्षां प्रति राजानं प्रति विद्वद्वर्गं प्रति च श्रद्धातिशयशालिनी स्थानीयातिथेयी जनता घोटमोटरादिस्व-स्वसाधनैर्विनीतचालकैः स्वयमेवातिथियात्रासौविध्यं व्यधत्त सारल्येन साकल्येन च।

श्री गङ्गाधरपराजुलीप्रार्थनया महा-कार्यि श्री पुष्पराजसत्प्रयासेन श्री५महाराजाधिराजादेशादुपनतविमानद्वारा देशविदेशयोर्विद्वद्वर्गातिथिसमानयनप्रापणसौविध्यमजनि।

स्वागताध्यक्षस्य त्रिभुवनविश्वविद्यालयोपकुलपतेः श्रीरुद्रराज पाण्डेयस्य शिक्षामन्त्रालयसहसचिवस्य श्रीदीर्घराजकोइरालामहोदयेस्य च सम्मेलनप्रारम्भाद् दिनत्रयपूर्वंसम्मेलनस्थलोपस्थित्या सम्मेलनायोजकजनेषूत्साहातिशयसञ्चारः संजातः। त्रिभुवनविश्वविद्यालस्य प्राध्यापकः श्रीविद्यानाथभट्टोऽपि कतिपयदिवसेभ्यः प्रागेवायोजनसहयोगे संलग्नोऽवर्तत।

विजौरीग्राममूर्धन्यस्य जनतामहाविद्यालस्याग्रे दक्षिणप्राङ्गणे गोपालगङ्गापूर्वतटे तुङ्गे मनोहरतरे पूर्वाभिमुखस्थायिमञ्चः प्रकल्पितः। प्रथमागता उपकुलपति-सहसचिव-पत्रकार-राजकर्मचारि-विद्वांसो महाविद्यालयसम्बद्धभवनेषु निवासिताः। शिष्टसम्पूर्णविदुषां योगश्वराणां राजदूतानामावासकृते छात्रावासं दक्षिणेन मनोहरचत्वरे पृथक् पृथक् स्वच्छाः पर्णशाला रचिताः।

श्री ५ महाराजाधिराजा महेन्द्रवीरविक्रमसाहदेवा राजकीयेन विशेषविमानेन फाल्गुनस्य त्रिंशत्तमे दिवा सार्धवादने दाङ्गटरीग्रामस्थितविमानघट्टमवतीर्णाः। विमानादवतरति राजनि जनतया माल्यार्पणमकारि। विद्वत्सम्मेलनायोजकसमित्यध्यक्षरावत्यैञ्चला-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



श्रीरामचन्द्र-शर्म-विद्वद्वरजल्पितं शृण्वन् ।
श्रीकीर्ति-दीर्घराज-प्रभृतियुतो भूपतिर्जयति ॥



संस्कृतवाणीवर्द्धनपत्रं सत्रावलोकयन् सभ्यैः ।
मञ्चासनमधिरूढो नेपालाधीश्वरो जयति ॥

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धीशरामनारायणश्रेष्ठद्वाराऽऽयोजकसमितिसदस्यानां विदुषां च परिचयं प्राप्य जनौघोज्जृम्भितजयजीवारावैः सह श्री ५ महाराजाधिराजास्तुलसीपुरोत्तरस्यां रक्षाचत्वरस्थितं राजशिबिरं प्रति प्रस्थिताः।

सम्मेलनस्य प्रारम्भात् त्रिचतुरदिनेभ्यः पूर्वतः कोलवासात् नेपालगञ्जतश्च विद्वदतिथीनामागमनं भवतिस्म। सम्मेलनोद्घाटनदिनस्य विभाते नवनादने काशीपीठजगद्गुरुशङ्कराचार्य महेश्वरानन्द सरस्वतीश्री स्वामिकरपात्रप्रभृतियोगिनो वाराणसेयान् विशिष्टान् विदुषो नीत्वा विमानमागतम्। तत्कालमेव काष्ठमण्डपात् पण्डितराजसोमनाथसिग्द्याल-समेतान् विशिष्टान् विदुषो नीत्वान्यो विमानः प्राप्तस्तस्मिन्नेव महामहिमभारतीयराजदूतो राजबहादुरोऽपि स्वकीयैः सहचरैः सहितः समागात्।

विमानघट्टादतिथीनानीयावासभूमिं स्नानपानभोजनादि सादरं कारयन्त्युत्सुका दाङ्गजनता हर्षगद्गदादृश्यत, चिरप्रतीक्षितं सम्मेलनकार्यक्रमं द्रष्टुमचिरवत्यञ्चललुम्बिन्यञ्चलधवलागिर्यञ्चलभेर्य्यञ्चलकर्णाल्यञ्चलनारायण्यञ्चल-प्रभृति-पार्श्ववर्त्यञ्चलानामसङ्ख्यदर्शकजनता सम्मेलनस्थले स्वस्थतया संमिलिता स्थिता।

मञ्चस्योच्चस्थले श्री ५ महाराजाधिराजराजासनविराजितायां प्रथमायां पङ्क्तौ महामहिमराजदूतोपप्रधानमन्त्युपकुलपतिजगद्गुरुशंकराचार्यस्वामिकरपात्रप्रभृतिकृते कल्पितान्यासनान्यवर्तन्त।

द्वितीयायां तृतीयायां च पङ्क्तौ वरिष्ठानां विदुषामतिथीनामासनानि स्थापितान्यभूवन्। चतुर्थ्यां पञ्चम्यांञ्च पङ्क्तौ राजकीयानां कर्मचारिणां दाङ्गस्थानीयानां विदुषां माननीयानां राष्ट्रियपञ्चायत्तसदस्यानां तथाञ्चलमण्डलग्रामपञ्चायत्तप्रधानवर्गीयसंघटनाध्यक्षप्रमुखासनानि नियतानि स्थितानि।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सभाग्रस्थले उत्तरभागे पत्रकाराणां दक्षिणभागे च सञ्चालक-समितिसदस्यानां जनतामहाविद्यालयार्थभूमिदातॄणां कृते स्थातुं व्यवस्था स्थिता ।

मञ्चस्य पूर्वभागे महिलानां कृते स्थानं सुरक्षितमविद्यत । ततः परं पूर्वोत्तरदक्षिणभागेषु सहस्रशो जनताः प्रथमत एव सम्भूय सोत्कण्ठा सम्मेलनस्य कार्यक्रमं दिदृक्षवः स्थिताः । सर्वत्र ध्वनि। विस्तारकयन्त्राणि स्फारितानि स्थितानि, प्रतिबिम्बग्रहाः स्थले स्थले चित्रयन्त्राणि सज्जीकृत्य स्थिताः ।

पूर्वनिश्चितप्रक्रमानुसारं सकरतलध्वनि शंखनिनादवाद्य-पञ्चकोदञ्चितमनोहरगुञ्जनेन सार्धमपराह्णत्रिवादनवेलायां श्री ५ महाराजाधिराजप्रभौ मञ्चमारूढे राष्ट्रियगानं वैदिकस्वस्ति-वाचनञ्च जातम् ।

ततःस्वस्वासनमधिष्ठितेषु सर्वेषु श्री ५ महाराजाधिराजप्रभौ वैदेशिक-वरिष्ठविद्वद्वर्गस्य योगीश्वराणाञ्च परिचय उपकुलपति-ना निदेशकेन च प्रदत्तः । मञ्चे च श्री ५ महाराजाधिराजेन सह अनेके सभासदः कार्यकर्तार उपस्थिताः । (एतेषां नामानि भाषाभागे द्रष्टव्यानि)

तदनन्तरं विद्वत्सम्मेलनोद्घाटनसमारोहस्यास्य सभापतिपदे उपप्रधानमन्त्री श्री कीर्तिनिधिविष्टो वृतः, इत्थञ्च सभाप्रक्रमः प्रचलितः । आदौ स्वागताध्यक्षस्त्रिभुवनविश्वविद्यालयोपकुलपती रुद्रराजपाण्डेयः स्वागतभाषणमकरोत् :–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



परिचयनिचयं शृण्वन् विदुषां काशीजुषां निदेशकतः ।
ससचिवः प्रमुदितमनाः श्रीमान् भूपश्चिरञ्जयति ॥
उपप्रधानामात्यः पार्श्वे भूपस्य कीर्तिनिधिर्विष्टः ।
साभापत्यं कुर्वन्विराजतेऽयं मुदाऽऽविष्टः ॥



नेपालीयस्य विदुषो वेदानन्दस्य परिचयं श्रुत्वा ।
गङ्गाधरशास्त्रिमुखान्नन्दति नृपतिः प्रजास्नेही ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काष्ठमण्डपीयस्य त्रिभुवन–विश्वविद्यालयस्य उपकुलपति–पदभाजां श्रीमतां सरदार—रुद्रराजपाण्डेय—महोदयानां विद्वत्सम्मेलनावसरे स्वागतभाषणम्

अयि श्रीपञ्चकविलसिता विश्वस्मिन्नेकमात्रस्वतन्त्रहिन्दूराष्ट्रनेपालसम्राजः सुरसरस्वतीपरिचरणपरायणा आर्यधर्मैकप्राणा विद्वद्वरिष्ठाः सभास्ताराश्च !

अद्यास्मिन् विद्वत्सम्मेलने अमूल्यं स्वकीयं समयं व्ययीकृत्य अस्मत्प्रार्थनावशंवदानां नानास्थानेभ्यः समुपागतानां तत्र भवतां श्रीमतां भवतां कैः शब्दैरभिनन्दनादिकं समुपहराम इति चिरं विचिन्तयन्तोऽपि निश्चेतुं नैव पारयामो वयम् । नेपाला नाम उदीचीस्थाश्चिरन्तनकालादेव प्रथितप्रथिता देवविलासकाननरूपास्तथा अष्टाङ्गयोगपरिशीलनशालिनां वेदान्तचर्चानिरस्ताज्ञानध्वान्तानाम् ऋषीणां मुनीनाञ्च तपोवनभूमयः। अत्रैव रामायणकूजनपरायणस्य महर्षेर्वाल्मीकेस्तथा पुलहभरतादीनां बहुसंख्यकानां महर्षिराजर्षीणां परमपावनानि तपोवनानि प्रख्यातानि ।

ब्रह्मविद्याविश्रुतस्य जगन्मान्यस्य राजर्षेर्जनकस्य मिथिलापुरी रुरुक्षेत्रं वराहक्षेत्रं मुक्तिक्षेत्रं गोस्वामिकुण्डं तथा प्रयततमानि संख्यातीतानि स्थानानि अत्रैव विलसन्ति । वाग्वती—गण्डकी—विष्णुमत्यादयः सप्त कौशिक्यः सरितश्च अत्रैव प्रवहन्त्यो जनानां निखिलानि कल्मषाणि दूरीकुर्वन्ति ।

सतीशिरोमणेर्भगवत्याः सीतादेव्या जगद्वन्द्यस्य निर्वाणमार्गप्रबोधनपरस्य भगवतो बुद्धदेवस्यापि जन्मानुग्रहपूततमा भूमिरप्यत्रैव वरीवर्तीति को नाम कोविदो वार्तामिमां न जानाति ।

स्मरणातीतकालादारभ्य अत्रैवार्यसंस्कृतिरप्रतिहतरूपेणाविलभावेन च स्वस्वरूपं प्रकाशयन्ती सहृदयवरान् आर्यजातीयान् जनान् मुहुर्मुहुः प्रमोमुद्यमानमानसान् करोतितरां सुतराम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आर्यभूपालस्य सूर्यचन्द्राङ्कितो ध्वजोप्येत्रैव द्योतमानः सर्वतन्त्र-स्वातन्त्र्यं प्रकाशयन् आत्मीयां लोकोत्तरामसाधारणतां प्रकाशयंन् विराजते। अत्रत्याः शासकाः किरातराजाः सूर्यवंशप्रभवा लिच्छवयो मल्लाः साहवंशावतंसाः क्षत्रियाश्च ऐकमत्येन निर्विरोधभावेन च आर्यसंस्कृतिपरम्परासंरक्षणपरा इत्यत्र संशयस्य लवोऽपि नैवावका-शमासादयति। पूर्वोल्लिखितानां भूपालानां बहुसंख्यका अभिलेखा अपि संस्कृतभाषायामेव समुपलभ्यन्ते।

लिच्छविराजानां शासनकाले संस्कृतमेव नेपालस्य राष्ट्रभाषा साहित्यिकभाषा शिलालेखादेश्च भाषा आसीत्। लिच्छविकालिका अभिलेखाः संस्कृत एवोपलभ्यन्ते। पश्चात् मल्लराजानां काले अरि-मल्लदेवादारभ्य जयप्रकाशमल्लपर्यन्तं संस्कृतसाहित्यस्य महानभ्यु-दयोऽभूत्। एतत्कालिकाः सुललितसंस्कृते रचिता न केवलमनेके अभिलेखा उपलब्धाः सन्ति अपि तु परःशतानि नाटकानि अनेके च काव्यग्रन्थाः संस्कृतसाहित्यस्य भाण्डागारं प्रपूरयन्ति। तस्मिन् समये परराष्ट्रेण सह पत्राचारादिकमपि संस्कृते एवाभूदित्यपि इतिहासः प्रमाणयति। ततः परमपि गोरक्षाधीशमहाराजानां शासनसमये सन्धिपत्रादिकमपि संस्कृते लिखितं प्राप्यते। श्रीमन्महाराजाधिराज-रणबहादुरसाहदेवस्य संस्कृतभाषायां लिखितं सन्धिपत्रन्तु प्रसिद्धमेव। पावनताया वीरतायाः प्रकृतिदेव्या लोकोत्तररमणीयतायाश्च त्रिवेणी-सङ्गमसदृशी मेदिनी नेपालेष्वेव नयेनपथातिथिर्भवति। शक्तिपीठेषु परमप्रतिष्ठं गुह्येश्वरीपीठमत्रैव। एवञ्च जगत्पतेर्भगवतः पशुपति-नाथस्य सान्निध्येन नेपालराष्ट्रमेव पाशुपतक्षेत्रापरपर्यायं लोकोत्तरं शिवक्षेत्रम्।

यहूदी—क्रिश्चियन-मुस्लिम—धर्मानुयायिनां धर्मकलहेन यथा रक्तरञ्जिता यूरोपभूमिस्तथैव भारतेऽप्यार्यबौद्धादीनां धार्मिकमतभे-देन रुधिरारुणा धरणिः। परं नेपालराष्ट्रे स्मरणातीतसमयादेव वैदिकानां बौद्धानाञ्च सामञ्जस्यपूर्णः समन्वयवादो वरीवर्तीति निर्वि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वादम् । यस्य परिणामेन भगवतः पशुपतिनाथस्य बुद्धदेवस्य च समानरूपेण अत्रत्या जना उपासनां विदधति । विषयेऽस्मिन् देशान्तरस्था जना अपि नेपालराष्ट्रतः शिक्षामधिगन्तुमर्हा इत्यत्र केऽपि विद्वांसो नैव द्वापरपरा भविष्यन्तीति निश्चप्रचम् ।

नेपालराष्ट्रं नाम न केवलं तपसो वीरतायाः प्रकृतिच्छटाया एव, प्रत्युत नानागमपारगानां कोविदानाञ्च विद्योपासनाया भूमिः ।

अत्र केषाञ्चिद् विद्वज्जनानां स्मृतिपथायातानां कालमनादृत्य स्थालीपुलाकन्यायेन नामानि श्रीमतां पुरतः समुपहरामि ।

प्रायश्चित्तप्रदीप--वाणीविलाससिद्धान्त-- प्रशस्तिरत्नादिकर्ता वाणीविलासपाण्डेयो नित्यकर्मप्रकाशिकादिकर्ता कुलनिधिश्च अत्रैव समजनिषाताम् ।

नेपालराष्ट्रनिर्मातुः सुगृहीतनामधेयस्य श्री ५ महाराजाधिराज-पृथ्वीनारायणसाहस्य समय एव कतिपये प्रथिताभिधाना विद्वांसो बभूवुस्तत्र केचिद् यथा—

जैमिनिसूत्रटीका—पञ्चाङ्गसिध्यादिग्रन्थकारो जोश्युपाख्यनीलकण्ठो भक्तविजयपृथ्वीन्द्रवर्णोदयकाव्यकारो ललिताबल्लभकविः कवितानिकषोपलकर्ता लक्ष्मणसूरिश्चैते त्रयोऽपि परमख्यातिभाजोऽभूवन् ।

लम्बकर्णभट्टः कर्पूरस्तवव्याख्याकारः पण्डितराजो रङ्गनाथ ईशतत्त्वविवेचनकारो धरणीधरपन्तो जयरत्नाकरनाटकहास्यकदम्बनिर्माता शक्तिबल्लभपण्डितश्चात्रैवाजायन्त ।

इहैव सर्वतन्त्रस्वतन्त्रा विद्वत्प्रकाण्डनीलदेवपन्ताः समभूवन्, ये खलु न्यायमीमांसावेदान्ताभिख्ये शास्त्रत्रयेऽपि भारतस्थानां महाविदुषां म० म० सीतारामशास्त्रि म० म० चित्रधरझा म० म० सुब्रह्मण्यशास्त्रिणामध्यापकत्वेनापि लोकातिशायिनीं ख्यातिं समुपजग्मुः ।

एवमेव कार्त्तवीर्यविजयमहाकाव्यकर्ता सुकृतिपरः सुकृतिदत्तपन्तोऽत्रैव समजायत । इत्थञ्च विद्वद्वरेण्या वाचस्पतिपन्त—गंगादत्त—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विष्णुहरि विश्वनाथशास्त्रि–नरनाथ–जीवनाथ—श्रीरङ्गादयो न्याय-व्याकरणवेदान्तवेदादिशास्त्रेष्वध्यापनपरम्परां निर्बाधां समकार्षुः।

तथा च राजपुरोहितवंश्ये उमानाथोऽर्ज्यालमहोदयश्च न्याय-व्याकरणाद्यनेकशास्त्रेषु टीकाटिप्पण्यादिभिः वामननामकौमुद्यादिभिर्ग्रन्थैश्च परप्रथितः समभवत्। एवमेव वीरेन्द्रकेशरि-विज्ञान-केशरि-हरिनाथ-धर्मदत्त–गोपालपाण्डेय–हिमनाथपन्त–प्रभृतयोऽनेके विद्वांसो न्यायव्याकरणधर्मशास्त्रज्योतिषादिशास्त्रेषु विलक्षणां प्रतिभां समदर्शयन्।

सर्दारच्छविलालसूरिश्च सुरभारत्यां सुन्दरचरितकुशलवोदयादि-नाटक-वृत्तालङ्कार–विरक्तितरङ्गिण्यादिग्रन्थनिर्माणेन न केवलमिहैव देशान्तरेष्वपि ख्यातेरतिशयं संप्राप। विद्वच्छिरोमणिः कुलचन्द्रशर्मा च भागवतमञ्जरीहरिवरिवस्या-गङ्गागौरवादिकाव्यनिर्माणेन नेपालिभाषायां च राघवालङ्कारदत्तचर्याप्रभृतिग्रन्थनिर्माणेन च स्वदेशे देशान्तरेषु च लोकातिशायिनीं कीर्तिं प्रादर्शयत्।

एवमेव विद्वच्छिरोमणीराजगुरुर्हेमराजशर्मा चानेकशास्त्रा-कलनेन एशियाखण्डस्थेषु विद्वत्सु शीर्षस्थानं संप्राप्तवान्।

किं बहुना—अत्रत्याः शासका अपि प्रतापमल्ल–प्रभृतयो नाटक-काव्यादिप्रणयनेन सप्रणयं सुरभारतीं पर्यचरन्।

एवमेव साहवंशेऽपि द्रव्यसाह-श्री ५ प्रतापसिंहसाह-गीर्वाण-विक्रमसाह-राजेन्द्रविक्रमसाहादयः, चमत्कारयोगरहस्य-पुरश्चर्यार्णव-गीर्वाणरत्नावली-त्रिकर्मविधिप्रभृतिग्रन्थनिर्माणेन योग–तन्त्र - धर्म-शास्त्रादिप्रचारेण देशगौरवमक्षतं चक्रुः।

एवमेव राष्ट्रस्य सौभाग्येन साम्प्रतमस्माकं महाराजाधिराजाः प्रजावत्सला राष्ट्रोन्नयने सततं जागरूका युगपुरुषाः सुकवय आर्य-संस्कृतेः सुरसरस्वत्याश्च संरक्षणवर्द्धनपरायणा वर्तन्ते। विषयेऽस्मिन् न केवलं नेपालदेशवास्तव्यानामेव प्रत्युत समस्तानामार्यजनाना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मपि वाचामगोचरो हर्षप्रकर्षः । अतः पूर्णरूपेण आशास्यते तन्निर्देशेन नूनमचिरकालेनैव नेपाले संस्कृतविश्वविद्यालयः प्रादुर्भविष्यतीति ।

अद्यापि नेपाले राजकीयसंस्कृतमहाविद्यालयप्रधानाचार्यवरा गोरखादक्षिणबाहु—पण्डितराजाः सोमनाथशर्माणः सुरसरस्वत्यां नैपाल्यां च नैकविधग्रन्थनिर्माणेन अध्यापनकर्मणा च प्राचीनविद्वत्-परंपराधुरां बिभ्रतितमामित्येतन् महत्प्रमोदस्थानम् ।

एवमेव राजकीयसंस्कृतमहाविद्यालये-प्रधानाचार्यवरा विद्वद्वरेण्याः सर्वतन्त्रस्वतन्त्रा गोरखादक्षिणबाहुपद्मप्रसादोपाध्यायमहोदया नाना-शास्त्रग्रन्थसम्पादनेन वाराणस्यामत्र च अध्यापनकर्मणा पुरातनविद्व-त्परंपराधुरां बिभ्रतितमामित्यपि महत्प्रमोदस्थानम् ।

किञ्चोपाध्यायमहोदयानां छात्रा न केवलमत्रैव भारतेऽपि यत्र तत्र महाविद्यालयेषु प्राध्यापनं कुर्वन्तोऽनुपमं स्वकीयाचार्यमहत्त्वं ख्यापयन्तो विराजन्त इदमपरं महत्प्रमोदस्थानम् ।

अद्य तावत्तादृशनेपालराष्ट्रस्य राप्त्यञ्चलान्तर्गते दाङ्गनामके मण्डले विद्यमाने विद्वत्सम्मेलने समवेतानामार्यगौरवसंवर्द्धकानां प्रजावत्सलानां श्री ५ नेपालसम्राजां तथा नानास्थानेभ्यः समुपागतानां सौजन्यधन्यानां सज्जनानां च हार्दिकं स्वागतं विदधानोऽहमात्मानं परमसौभाग्यभाजनं चिन्तयामीति शम् ।

वि० सं० २०२४
फाल्गुनपूर्णिमायाम्

ततः परं जनता महाविद्यालयसञ्चालकसमितिसचिवो जागे-श्वरब्राह्मणो महाराजाधिराजेषु माल्यार्पणमकरोत् ।

महाविद्यालयनिर्देशको गङ्गाधरोऽभिनन्दनपत्रं पठित्वा महाराजा धिराजानां करकमलयोः समर्पितवान् । (अभिनन्दनपत्रं भाषा-भागेऽस्ति)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदनन्तरं स्थानीयमण्डलपञ्चकपञ्चायत्तवर्गीयसंघटनविविध-शिक्षणसंस्थाप्रधानैः स्वस्वप्रकल्पिताभिनन्दनपत्राणि महाराजाधिराजे समर्पितानि ।

ततश्च विद्वत्सम्मेलनायोजकसमितिसचिवेन श्री केशवदीपकेन साहित्याचार्येण विद्वत्सम्मेलनसम्बन्धि प्रतिवेदनं प्रस्तुतम् । (प्रतिवेदनमिदं भाषाभागेऽस्ति)

तदनु श्री ५ महाराजाधिराजकरकमलद्वारा सकरतलध्वनि विद्वत्सम्मेलनोद्घाटनं सम्पन्नम् । ततः परं प्रवचनानां प्रारम्भो जातः । जगद्गुरु : शङ्कराचार्यः शुभकामनां व्यक्तीकुर्वन् नेपालस्य मूर्धाभिषिक्तो राजा न केवलं नेपालीयानामपि तु सम्पूर्णस्यार्यजगतो गौरवस्वरूपमस्ति, विश्वस्य हिन्दूनामाशानुरूपः संस्कृतविश्वविद्यालयो नेपाले नूनं प्रचलतु इत्यादि प्रावोचत । तदनु महामहिमभारतीय-राजदूतः श्रीराजबहादुरः शुभाशंसां विज्ञापयन् विद्वत्सम्मेलनमिदं नेपालभारतयोर्मैत्रीसम्बन्धग्रन्थिं द्रढीयसीं विधास्यतीति भणतिस्म । इतःपरं श्रात् माननीयस्य शिक्षामन्त्रिणः श्री सुरेन्द्रबहादुर बस्ने-तस्य शुभकामनासन्देशः श्रावितः । तस्य संस्कृतेऽनुवादोऽधस्ताद्दीयतेः—

प्रियमहोदय !

विद्वत्सम्मेलनस्यावसरे मह्यं सभापतेरासनग्रहणार्थं भवता प्रेषिताया निमन्त्रणायाः कृतेः हार्दिकान् धन्यवादान् ज्ञापयामि । आवश्यककार्यवशात्तस्मिन् सम्मेलने उपस्थातुमशक्नुवन्नपि श्री ५ महाराजाधिराजसर्वकारस्य कृपापूर्णायामुपस्थितौ सर्वकारस्यैव करकमलद्वारा समुद्घाट्यमानस्यास्य विद्वत्सम्मेलनस्य विशेषमहत्त्वेन भवितव्यमिति विश्वसिमि । अस्मिन् सम्मिलिता विद्वांसः सर्वेषां विषयाणां सम्यक्तया विचारं कृत्वा देशकाल-परिस्थितिशोभनां संमतिं दास्यन्तीति मे धारणाऽऽस्ते। सम्मेलनमिदं वर्तमानस्य सामाजिकार्थिकबौद्धिकजगतः संदर्भे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



राजवहादुरनाम्ना महामहिम्ना विदेशदूतेन ।
विद्वत्ससदि पश्यन् राजा रञ्जयति तान् सभ्यान् ॥



भ्राजति शिरसा धार्यो जगद्गुरुः शङ्कराचार्यः ।
राजति राजवहादुरसिंहोऽसौ भारतीयदूतश्च ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भविष्ये स्थापनीयस्य प्रस्तावितस्य संस्कृतविश्वविद्यालयस्य कृते का कीदृशी व्यवस्था कर्तुमुचितेति सम्यक्तया विचार-विनिमयं कृत्वैकां व्यावहारिकीं संमतिं प्रतिवेदनरूपेण शासने (श्री५को सरकारमा) विचारार्थं प्रस्तुवीतेति मे सदिच्छा तथा शुभकामना च वर्तते ।

श्रीरामनारायण श्रेष्ठः **सुरेन्द्र बहादुरः. शिक्षामन्त्री**

अध्यक्षे विद्वत्सम्मेलनस्य २०२४।१२।१

आयोजकसमितेर्जनतामहाविद्यालयदाङ्गस्थितायाः ।

ततो जगद्गुरुणा शङ्कराचार्येण पण्डितकालीप्रसादमिश्रेण पण्डितकमलाकान्त मिश्रेण च शुभाशंसात्मकं वक्तव्यं संस्कृतभाषायां प्रदत्तम् ।

ततः परं श्री स्वामिकरपात्रः सार्धघण्टापर्यन्तं हिन्दयां धारा-प्रवाहरूपेण भाषमाणो विद्यालयप्रसङ्गे राजनीतिव्यवहाराचार-विचारादिविषयेषु शास्त्रीयदृष्ट्या प्रकाशमपातयत् । हिन्दुशास्त्रे राज्ञः प्रजानां च सम्बन्धो बप्पसन्तानयोरिव वर्तत इति भणन् द्वयोस्तयोः कर्तव्यं स्पष्टतया विश्लेषितवान् । सर्वप्रकारासु शासनप्रणालीषु राजतन्त्रात्मिका प्रणाली श्रेष्ठतमास्ति । किन्तु राजा सदा कर्त-व्यपरायणो नीतिनिष्णातश्च सुतरामपेक्षितः । धर्मनियन्त्रितो राजा धर्मराज्ञनियन्त्रिता प्रजा च वाञ्छनीया । प्रजानां सुखदुःखे आत्मनः सुखदुःखे मन्वान एव वास्तविको राजा भवति । राज्ञा सर्वदा दण्डशक्तिः स्वहस्ते स्थापनीया, कृतदोषे च निःसंकोचं दण्डः पातनीयः दण्डद्वारैव राज्ञा प्रजाचरित्रं नियन्त्रणीयम् । नीतिनिष्णातो राजा साक्षादी-श्वरस्यावतारो भवति । एतादृशा राजानो यत्र जाग्रति ते देशाः स्वतो धनधान्यसम्पन्ना भवन्ति । तादृशो राजानो यावत्तिष्ठन्ति तावत्तेषु देशेषु नेतिभीतिर्नाधिव्याधयो भवन्ति । हिन्दुसंस्कृतौ न केवलं राजा शासक एव प्रत्युत प्रजानां लेखायां परमादरणीयः पितेव । अतो हेतो राज्ञ आशौचवारणं तर्पणपिण्डादिप्रदानं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च कुर्वन्ति । या संस्कृती राजानमेतादृशि स्थूले पदे रक्षति सा संकृती राज्ञापि सर्वात्मना रक्षणीयेति परमकर्तव्यम् । राजतन्त्रात्मिका शासन-प्रणाली वेदशास्त्रनुमोदितसंस्कृतिशिक्षाद्वारैव रक्षिता भवति, अतस्तस्याःसंरक्षणाय संवर्धनाय च संस्कृतविश्वविद्यालयस्य स्थापना नेपाले सुतरामनिवार्या । विश्वविद्यालयशिक्षानीतिचर्यां कुर्वता श्री स्वामिकरपात्रेण संस्कृतविश्वविद्यालयादस्मादाधुनिकलोक-व्यवहारेऽपि क्षमाः संस्कृतवाङ्मयेगरिमाणं वर्धयितुं स्नातकाः संपादनीया इत्यपि दृढतया भणितमभूत् ।

तदुपरि विद्वद्वर्गमुपस्थितमहिलाजनसमाजञ्च संबोध्य श्री ५ महाराजाधिराज इत्थमादिशत् :—

श्री ५ महाराजाधिराजानामभिभाषणम्

उपस्थित विद्वद्वर्ग, महिलास्तथा सज्जनवृन्द !

अद्य गौरवमयेतिहासेन परम्परया संस्कृत्या चोतप्रोतस्यास्माकं नेपालस्यास्मिन्भागे (राप्त्यञ्चलान्तर्गतदाङ्गस्थितजनतासंस्कृत-महाविद्यालये) संस्कृत्या सह सम्बद्धानां संस्कृतविदुषां मध्ये स्वात्मानं लब्धवतो हर्षः स्वाभाविक एव । उपस्थितानां सर्वेषामतिथीनां हार्दिकं स्वागतं करोमि ।

संसारस्य सभ्यताया इतिहासस्य विकासे संस्कृतभाषाया महत्त्व-पूर्णं दायित्वमस्ति । वैदिके काले कीदृशानामुच्चादर्शानामुत्कृष्टानां भाव्वनानां चोत्थानेनार्यसंस्कृतेः प्रवाहः प्रवहन्नागतः, अस्माकं दैनिके जीवन एव तस्य कीदृशः प्रभावः पतितोऽस्ति, प्रत्यक्षमेवास्ति । संस्कृतस्य ज्ञानं विना वयमात्मन एवाचार-विचारयोर्मर्मापि बोद्धुं न शक्नुमः । मन्ये समयस्य परिवर्तनेन भवेत्, तेनैव ज्ञानेन विनाऽस्माभिः स्वीयेषु सारवत्सु विषयेष्वपि अबोधेन श्रद्धा लघूकृतास्ते । विशेषतया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चास्मदीया नेपालीया नवयुवानो युवतयश्च विषयेऽस्मिन्संन्दिह्या-भ्रान्ता न सन्तीति वक्तुं विवशाःस्मः ।

पुरातनकालादेव नेपालेन संस्कृतेऽभिरुची रक्षिता बुध्यते, क्रमेण चोन्नतिरपि कृतासीत् । यदि वयमस्माकमेव शैक्षिकमितिहासं निपुणतया पश्यामस्तदापीदं भणितुं शक्नुमो यद्दीर्घकालपर्यन्तं नेपालस्य शिक्षा-पद्धतिरेव संस्कृतमयी स्थितेति । संभवतः सर्वैर्नेपालिभिः सेयं पद्धति-रङ्गीकृता स्थिता । एता वार्ता अस्मत्सविधे स्थितेभ्यः शिलापत्रेभ्यः ताम्रपत्र म्यः सन्धिपत्रेभ्यो ग्रन्थेभ्योऽपि प्रमाणिता भवन्ति ।

अस्माकं स्वर्गमस्तक (सगरमाथा-माउण्ट-एवरेष्ट) सदृशेन संसारे सर्वोच्चेन शिखरेण शोभितस्य हिमवत्खण्डस्य माहात्म्यमपि संस्कृत एव प्राम्यते । अथ च सतीशिरोमणेरादर्शगृहिण्याः श्रीजानक्या एव न, किन्तु विश्वशान्तेः प्रसिद्धस्य पूजकस्य युवराजस्य सिद्धार्थस्य (भगवतो गौतमबुद्धस्य) अप्यस्यामेव पावनभूमौ प्रादुर्भावोऽभूत् । अस्यामेव भूम्यां वाल्मीकिना रामायणं महाकाव्यं व्यलेखि, जडभरतेन वानप्रस्थाश्रमो विहितः पुलस्त्येन ऋष्यशृङ्गेण च ऋषिणा तपस्त-प्तम् । वात्स्यायनेन कामसूत्रं लिखितम् । गोरखनाथ-मत्स्येन्द्रनाथाभ्यां नाथसम्प्रदायाच्च देवभाषया महती प्रेरणा प्राप्ता । पश्चादपि प्रति-वेशिराष्ट्रेषु विदेशेषु च नष्ट-भ्रष्ट-विलुप्तानां बहूनां ग्रन्थानामत्रैव संरक्षणं जातम् । अनेके विद्वांस आगत्यात्रैवासन्नत्रैव च ते पुष्पिताः फलिताश्च सर्वस्यास्य विषयस्य पुष्टिरस्माकं पुस्तकालयेषु अगामागारेषु मन्दिरेषु गुहासु च स्थितैर्ग्रन्थैर्लभ्यते । प्रायो बहुषु विषयेषु अतुल्या अमूल्याश्च ग्रन्था अस्मत्सबिधे हस्तलिखितरूपाः साम्प्रतमपि सन्त्येव। वार्तेयं सर्वैर्विदितप्रायैव ।

परं परिवर्तनशीलः समयः परिवर्तमान एवागतः संसारस्य विभिन्नोन्नतराष्ट्रेषु भौतिकवादः सर्वत्र व्याप्तः, सांसारिका भोगवि-लासा एव मानवजीवनस्य लक्ष्यीभूता जाताः । ततश्चाध्यात्मिकबाद आवश्यकानावश्यकान्धपरम्पराभिर्मतमतान्तरैश्च मलिनीकृतः स्वभा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वतो जातः। अस्माकं प्राचीनानामुपयुक्तानां च ग्रन्थानामध्ययनं पाश्चात्त्यैर्विदद्भिः कर्तुमारब्धम्। सारो गृहीतः, समालोचना विहिता, उपयोगश्च कृतः। पाश्चात्त्यशिक्षया सभ्यतया च शनै रञ्जितैरस्माभिश्च तस्यामेव दिशि दृष्टिं पातयितुमारब्धम्। तैः प्रतिपादितेषु विषयेषु क्षणिकसुखभोगस्य लालसया चक्षुषी निमील्य वयं दृढामास्थां दर्शयितुं लग्नाः, अस्माकं महत्तायाः परिचायका अद्य ते जाता इति कथने नात्युक्तिः। इतश्च संस्कृतज्ञा शिथिलतां गताः। वयं केवलमस्माकं शास्त्रेषु एतादृशं वर्तत इति वार्तामात्रे गर्वं गृहीत्वा स्थिता; व्यावहारिका न सञ्जाताः रटनात्मकविद्यायामेवाधिकं प्रयतिताः, समयं परिचेतुं प्रयत्नं नकृतवन्तः, आवश्यकानुसन्धानदिशि दृष्टिमेव नदत्तवन्तः। इयमतिदुःखदा वार्ता अस्याः फलस्वरूपतोऽद्यास्मासु क्रमश आत्महीनताऽऽयाता, मानसिकी दुर्बलता सञ्जाता, अनुशासनादाचरणात्सत्याच्चवयं पश्चात्पतितुमारब्धाः।

अत एवातः परं नास्माभिर्विषयेष्वेतादृशेषु लज्जा कार्या प्रत्युत जातास्त्रुटीः सुधार्य समयं परिचित्य समुचितेन ज्ञानविज्ञानयोः समन्वयेन प्राचीनेतिहासस्य परम्परायाश्चाधारशिलां स्थिरीकृत्याधुनिके व्यावहारिके कर्मणि चरित्रे च कथमावश्यकः सुधारो विधेयः? अथाहमनयैव विद्वत्सम्मेलनद्वारा संसारस्य सर्वान् संस्कृतानुयायिनो लेखकान्कवीदुषः पण्डितान्विशेषज्ञान्सर्वसमक्षं हृदानुरुन्धे विज्ञापयामि चाथ स्मिन्विषये दृढ़मनुसन्धानं व्यावहारिकं कार्यान्वयनं च नितान्त- मावश्यकम्, अपेक्षितं च।

यद्यप्येतादृशेषु गहनेषु विषयेष्वधिकं वक्तंनाहं कोऽपि विद्वान्, तथापीयं हर्षस्य वार्तास्ति यदद्यास्माकं संस्कृतज्ञानां दृष्टिकोणेऽपि परिवर्तनं दृश्यमानमस्ति, तस्यैव फलस्वरूपतो वयमद्यात्र समवेताः। उदारतयात्मगौरवेण सार्धमवसरोचितं कृत्वाऽस्माभिरस्माकं पुस्तकालयेषु विद्यमानानां ग्रन्थानामध्ययनेऽनुसन्धाने च निष्पक्षपद्धत्या क्रियमाणेऽस्माभिरिदमप्येकं दिनं पुनर्दृश्येत यद्विज्ञानं पाश्चात्त्यसभ्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ताया एव पारिबर्हनास्तीति। अस्माकं सङ्घेऽपि लोकोत्तरा वैज्ञानिका ग्रन्थाः सन्ति, येभ्यो जीवशास्त्रे, वनस्पतिशास्त्रे आयुर्वेदे, रसायनशास्त्रे च महान् प्रभावः पतितुं शक्नोति। वैज्ञानिकेषु संस्कृतज्ञानं संस्कृतज्ञेषु च विज्ञानाभिरुचिर्यदि न स्यात्तदाद्यास्माभिरेषा समस्या दुष्पूरा स्यात्, अत एतयोर्द्वयोः (ज्ञान-विज्ञानयोः) समन्वयोऽपेक्षितः तदैव शुद्धानुसन्धानस्य वातावरणं भावि, तत एव च संसारे ज्ञान-विज्ञानद्वारा सुखं सुविधाः शान्तिश्च भविष्यन्ति, मानवसमाजश्च प्रफुल्लः फलितश्च स्यात्।

अपरत्र दर्शनेऽप्यस्माकं नेपालस्यैकं विशिष्टं दायित्वमस्ति। विदेहदर्शनेन याज्ञवल्क्यस्मृत्या च सममेव बौद्धदर्शनस्याप्यत्रैव प्रादुर्भावोऽभवत्। परमनयोर्द्वयोर्दर्शनयोः समुन्नतिद्वारा नेपालीयैः समन्वयवादः स्थापितः, अन्यत्रैव परस्परममेलनं भवितुं न दत्तम्। धार्मिकी व्यावहारिकी च सहिष्णुतैवास्माकं दर्शनस्याधारस्तम्भायमानासीदस्ति च। 'वसुधैव कुटुम्बकम्' इतिभावनैवास्य स्रोतोऽस्ति। वयं तर्पणं कर्मः, जड़चेतनात्मक- निखिल-प्राणिमात्रस्य तृप्तिं कामयामहे, देवताः पितृश्च सर्वान् मन्यामहे, कस्मिन्नपि कर्मणि क्रियमाणेऽपि फलाशां त्यक्त्वा कर्तव्यं ज्ञात्वा करणमेवोत्तममित्यत्र विश्वसिमः। एता भावना एवाद्यत्व आधुनिकेषु दार्शनिकसिन्तेष्वपि गम्भीरतया यदि बद्धमूला भवेयुस्तदैव विश्वस्मिन्घटमाना विघ्नबाधा अपसरिष्यन्ति। 'सर्वभूतहिते रताः' इत्यस्य सत्यं स्वरूपं द्रष्टुंलभ्येतेति वक्तुं नाहमात्मानमसमर्थं मन्ये। एवमस्मिन्नेव समन्वयवादेऽस्माकं निर्दलीया पञ्चायतप्रजातान्त्रिकव्यवस्था साम्प्रतं निर्विकल्पा व्यवस्था सम्पन्नेति वदामि।

वयं समन्वयवादे विश्वासं रक्षामः। समन्वयात्मकदर्शनद्वारैव विश्वसमस्यापूर्तिर्भवितुं शक्नोतीति धारणास्माकमास्ते। अस्माकमसंलग्ना परराष्ट्रनीतिरपि समन्वयवाद एवाधारितास्ति एतस्मादपि कारणादस्यां दिशि साम्प्रतमस्माभिः पादश्चालनीय इति वक्तुमहं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वकर्तव्यं मन्ये। अध्ययेनस्याध्यापनस्य चात्यावश्यकतास्ति। एतेषु सर्वेषु कार्येषु संस्कृतविदुषां महदुत्तरदायित्वमासीदस्ति भविष्यति चेत्यत्रापि नास्ति मे शङ्का।

अयं च खलु प्रमोदस्य विषयोऽस्ति यद् विशेषतः पुरातनकालादेव समये समये समापतिता अनेका विघ्नबाधा निरस्य कालस्य परिस्थितेर्जनाकाङ्क्षायाश्चानुरूपं नेपालेन स्वास्यास्तित्वं नेपालीयैश्च स्वस्य व्यक्तित्वं संरक्षितमस्ति। अस्मिन्नपि कर्मणि अस्माकं संस्कृतेः परम्परायां वीरपूर्वजानां विदुषां च महद्दायित्वमस्ति। इदं च विश्वस्य सर्वैर्विद्वद्भिर्विदितमेवास्ति।

अथैकमात्रहिन्दूराष्ट्रे नेपाले संस्कृतविश्वविद्यालयस्यात्यावश्यकतास्माभिः सर्वैर्नेपालीयैर्विशेषतया च नेपालीयैर्विद्वद्भिरननुभूता नास्ति, परं कदा कथं चैष सम्भवति, कीदृशरूपे परिणाम्यमानो देशोचितो भविष्यति, किं कृत्वा चाधुनिकपद्धत्यास्माकं विद्वत्तायाः परम्परा स्थायिनी भवतीत्येतत्र विषये ऽत्रोपस्थितैर्विद्वद्भिरारब्धस्य विचारविनिमयस्याहं हृदा सहर्षं स्वागतं करोमि, तथेदमपि वक्तुमभिलष्यामि यदतः परमस्माभिः कैरपि नेत्रे निमील्यान्धविश्वासतो विना कारणं कुत्रापि विषये क्रियमाणमन्धानुकरणं नेपालीयसमाजस्य कृते न शोभते। विश्वविद्यालयपर्यन्तेन प्रत्येकशिक्षालयेन तादृशः कार्यक्रमः प्रस्तोतव्यो यत्ततः शिक्षालयाद्विश्वविद्यालयाद्वा निर्गतः कोऽपि नेपालीयः स्नातकः सर्वप्रथममनुशासितश्चरित्रवानाधुनिकश्च सम्पन्नः परानपि तथा निर्मातुं शक्नुयात्। अत्र नान्यस्तर्को भवितुं शक्नोति। इदमपि साम्प्रतमत्र वक्तुं वाञ्छामि।

अस्मिन्नेव प्रसङ्गे मण्डलस्यास्य जनतायाः सविधेऽपि पुनरेकवारमागत्येत्थं मिलितुं प्राप्ततया नितरां प्रीतोऽस्मि। अद्यास्माकं देशस्य सफलता समस्या च कस्मादपि नेपालिनस्तिरोहिता नास्ति, अत एव चास्मिन्विषयेऽधिकं वक्तुमावश्यकतां न पश्यामि। मयापि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च स्वाभिप्रेताः सर्वे भावा जनसमक्षं समुपस्थापिता एवेत्यतः परं प्रत्येकनेपालीयसविधे इदमेव वक्तुमभिलष्यामि यन्मया यथासमयमुपस्थापितानां विचाराणां कुशले कार्यान्वयने एव प्रत्येकनेपालिनो ध्याने गते यथापूर्वमहं सर्वेषां कृतज्ञो भविष्यामि। अस्माभिः सर्वैर्नेपालीयैर्यथा गुरुतरकाय स्यारम्भः क्रियते तथैव तस्य पूर्णतां विधातुमपि शक्तैर्भवितव्यम्।

अन्ते चोपस्थितस्य सर्वस्य विद्वद्वर्गस्योपर्युल्लिखितविषये पुनरेकवारं ध्यानमाकृष्य सम्मेलनस्यास्य साफल्यकामनया सार्धं समारोहस्यास्य सम्बन्धेभ्यः सर्वेभ्यो हार्दिकं धन्यवादं ज्ञापयामि।

जय नेपाल !

२०२४ सौरचैत्रे गते गुरुवासरे दाङ्गे

(प्रतिवेदनसमितेः कृते नेपालीयभाषातः संस्कृतेनुवक्ता

गङ्गाधराशास्त्री पराजुली)

उपस्थिताः सर्वेऽतिथयो राष्ट्रभाषायां जातं भाषणं सर्वात्मना न बुध्यन्ते इति हरिप्रसाद आचार्योऽन्ववदत् संस्कृते।

तदनन्तरं ज. म. वि. वि सहसचिवः श्री जागेश्वरो ब्राह्मणः सम्मेलनोद्घाटनानुकम्पां कृतवते श्री ५ महाराजाधिराजाय तथोपस्थितातिथिवृन्द-विद्वद्वर्गयोगिसमुदाय-कार्यकर्तृ-सदस्यादिभ्यश्च कृतज्ञतां व्यज्ञापयत्।

विद्वत्सम्मेलनावसरे

जनता-महा-विद्यालयसञ्चालकसमितेः सचिवेन

श्री जागेश्वर ब्राह्मणेन प्रस्तुतं

धन्यवादभाषणम्

समादरणीया राष्ट्रनायकाः श्री ५ महाराजाधिराजदेवाः, महामहिमराजदूतमहाभागाः, उपकुलपतिमहोदयाः, विभिन्नस्थानेभ्यः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समुपस्थिता विशिष्टविद्वांसः सज्जनाश्च, अहमद्य अत्यन्तं हर्षितोऽस्मि यद् हिन्दूराष्ट्रनायकै श्री ५ महाराजाधिराजदेवैः सह हिन्दू संस्कृतिमहिम-मर्मविज्ञं विदुषां सम्मेलनमत्र द्रष्टुं प्राप्तवानस्मि। अस्माकं सश्रद्धमामन्त्रणं स्वीकृत्य अनेकानि कष्टानि सहित्वा अद्य सम्मिलितेषु श्री ५ महाराजाधिराजदेवेषु सर्वेषु समादरणीयेषु विद्वत्सु च अर्पयितुमुचिता सामग्री नास्ति, नचाल्पज्ञस्य मे हृदये शब्दा अपि स्फुरन्ति तथापि अनन्येन भक्तिभावेन प्रस्तावितसंस्कृत-विश्वविद्यालयमधिकृत्य संपत्स्यमानस्य अस्य सम्मेलनस्य लक्ष्यमभिप्रेत्य किमपि निवेदयामि।

जनतासंस्कृतमहाविद्यालयोऽयं नेपाले प्रजातन्त्रस्य उषः काले २००८ वि. संवत्सरे तदनुसारं १९५१ ईशवीयेवर्षे लघुविद्यालयरूपेण जातः। क्रमशोऽस्माभिर्यथोत्तरं विकासमुपनीतः २०११ वैक्रमाब्दे अस्माकं प्रार्थनया प्रधानाचार्यपदं स्वीकृत्य अत्र समागतानां विश्रुतविद्याप्रभावाणां श्री आनन्दझामहोदयानां सुसञ्चालनानुग्रहैर्जनतासंस्कृत-महाविद्यालयरूपतां प्राप्तः। अद्य यावत् बहूनां भारतीयानां नेपालीयानां प्रकाण्डविदुषाञ्च सहयोगेनाऽस्माभिः सञ्चालितः। अद्यपर्यन्तं पश्चिमे नेपाले सहस्रश संस्कृतविपश्चितो देशाय उपहरन् प्रथमं वाराणसीतः मध्यमा-पर्यन्तं स्वीकृतपरीक्षा केन्द्रः, अनन्तरं त्रिभुवनविश्वविद्यालयतः स्वीकृतशास्त्रि पर्यन्तपरीक्षाकेन्द्रो हिन्दुसंस्कृतेः संस्कृतस्य च गौरवस्य सरक्षणाय संवर्द्धनाय च बहुकृतपरिश्रमोऽयं विद्यालय इति विदितमस्तु।

शीघ्रमावश्यकस्य संकृतविश्वविद्यालयस्य स्थानं ग्रहीतुमेष संस्कृत-जनता-महाविद्यालयः प्रसारितकरो विद्यते। एतत्स्थाननिवासिनां संस्कृतप्रियाणां समेषां सदिच्छा चेयम्। सा च श्रीमतां भवतां सक्रियसहयोगैः संपूर्णा भविष्यतीति निवेदयन् सम्मेलनेऽस्मिन् विराजमानेभ्यः राष्ट्रनायकेभ्यस्तथा विशिष्टविद्वद्भ्यश्च सविनयं शतशो धन्यवादान् प्रयच्छामि। जयतु संस्कृतम् जयतु नरेशः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीमद्-विज्ञशिरोमणि-झोपाह्वानन्द-पण्डिताध्यक्ष्ये ।
स्वामी श्रीकरपात्री विराजते सदसि भाषणं कुर्वन् ॥

तपोग्रणीः सुसचिवो विश्वविद्यालयप्रणी ।
जागेश्वरो ब्राह्मणोऽयं जीवताज्जनतामणिः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समयसमासात् सम्मेलनसभायां प्रथमायामन्येभ्यो विद्वद्भ्यो वक्तुमवसरो न पर्याप्त इति सभापतेरासनादुपप्रधानमन्त्रिणा श्री कीर्तिनिधिविष्टेन संस्कृतविश्वविद्यालयप्रयोजनोपरि विशेष-दार्ढ्यं ददता उपस्थितायां विद्वन्मण्डल्यां निजनिजामूल्यसम्मतिप्रदानानुरोधं विधाय सभाविसर्जनमकारि।

मञ्चादवतीर्य श्री ५ महाराजाधिराजो भाविविश्वविद्यालयं वर्तमानमहाविद्यालयं निरीक्षितुमट्टालिकायां तस्य समारुरोह सानुचरः। ततश्चतुर्दिक्षु दृष्ट्वा प्राकृतिकं सौन्दर्यं पृष्ट्वा च तानि दृश्यानि स्थानानि नाम्ना पर्यचिनोत्। विद्यालयादवतीर्यातिथिनिवासपर्णकुटीरचत्वरं प्रविष्टः। यत्र मध्ये राज्ञस्तथातिथीनां सम्मानार्थं भक्तिपूर्वकं पत्रपुष्पफलं जलपानायोजनमभूत्। तत्र राजदूतेन स्वामिकरपात्रेण विद्वद्वर्गेण च साकं कतिपयपलपर्यन्तं वार्तालापं विधाय विद्यालयस्य भूमिःकियती? तस्यायः कियान्? अन्यदायस्रोतः किमस्ति? इत्यादिविषयजिज्ञासां कृत्वा तत्तद्विशेषज्ञेभ्यो जनतामहाविद्यालयसम्बद्धेभ्यो बुद्ध्वातिथिकुटीरनिरीक्षणं विदधत् प्रसन्नमुद्रो बहिरागत्य मरुत्तर-द्वारा रक्षाचत्वरसंनिविष्टराजशिबिरं प्रति प्रस्थितः।

द्वितीयेऽहनि चैत्रस्य द्वितीयदिवसे गते विभाते सार्धसप्तनादने पण्डितराजसोमनाथसिंहस्य सभापत्ये सम्मेलनस्य प्रवचनप्रक्रमः प्रारब्धः, अस्यां सभायां निम्नाङ्किता महानुभावाः प्रमुखा वक्तारोऽभवन्।

१ पण्डितो हरिराम शुक्लः साङ्ख्ययोगविभागाध्यक्षो वा०सं०वि०वि०
२ पण्डितः सुब्रह्मण्यंशास्त्री मीमांसाविभागाध्यक्षः काशी हि०वि०वि०
३ पण्डितः कालीप्रसादमिश्र : भू०पू० प्रधानाचार्यः ,, ,, ,,
४ पण्डितः कमलाकान्तमिश्रः जो० म० गोयनका म० वि० भू० पू० प्र० आ० काशी
५ पं०बलदेवो पाध्यायः अनुसंधानविभागाध्यक्षः वा० सं० वि० वि०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६ पण्डितो रुद्रधर झा न्यायप्राध्यापकः काशी हि० वि० वि०
७ पं० रामेश्वरशर्मा प्रा० त्रि० वि० वि० काष्ठमण्डपम् नेपालः

स्वस्वसारगर्भितभाषणेषु वक्तृभिर्वेदादिशास्त्राणां तदनुकूलाचरणानां महत्ता दर्शिताभूत् । संस्कृतविश्वविद्यालयसम्बद्धास्तेषामभिव्यक्तयश्चेत्थमैकमत्येनाभूवन्:—प्रकृतिदेव्या अनुकम्पया विभिन्नसुविधासम्पन्ने नेपाले पुराकालादद्यावधि येन विधिना संस्कृतवाङ्मयरक्षापरम्परा चलन्ती समायातास्ते, साग्रेऽपि रक्षणीया । संस्कृत-विश्वविद्यालयस्थापनां कृत्वा वर्तमानवैज्ञानिकयुगशोभनस्य विश्वबन्धुत्वस्यादर्शं व्यवहारे प्रवर्तयितुं शक्ता अनुकरणीयचरित्राः स्नातकाः संपादनीयाः । वाराणसेयसंस्कृतविश्वविद्यालयेऽपि प्रायःश्छात्राणां सङ्ख्या नेपालीयविद्यार्थिभिरेव पूरितेति नेपाले संस्कृतविश्वविद्यालयो निश्चयेन चलितुं शक्नोत्येव यत्र वेदादिशास्त्रानुमोदितः क्षत्रियो राजा जागर्ति, यत्र वर्णाश्रमधर्मः श्रद्धापूर्वकं प्रतिपाल्यते तत्र प्रचलितयुगेन साकं सन्तुलितं सं० विश्वविद्यालयं सञ्चालयितुं नितान्तमावश्यकमस्ति ।

संस्कृते विज्ञानस्य न्यूनता नास्ति, न्यूनतास्ते तस्यानुसन्धानं विधाय व्यवहारोपयोगिरूपेण विश्वसमक्षे रक्षणस्य । अन्यदावश्यकमस्ति संसारेऽशान्तवातावरणस्य सृष्टिकर्तृणामद्यतनभोगप्रधानवादानां प्राचीनदार्शनिकाध्यात्मिकसरणिद्वारा खण्डनपूर्वकं शान्तेः सद्भावनायास्त्यागस्य चोदाहरणं जनसमक्षे रक्षित्वा जीवितुं जीवयितुं शक्ताया मानवजीवनपद्धतेः प्रचारप्रसारयोः । एतत्सर्वलक्षपूर्तिः केवलं विश्वविद्यालयनामकरणमात्रेण भवितुं न शक्नोति । तत्पूर्त्यै तु निरन्तरं शासनस्य जनतायाश्च सर्वतोभावेन प्रयत्नशीलतापेक्षिता । सा यदि न स्यात् तदाद्यावधि विभिन्नस्थानेषु स्थापितविश्वविद्यालयानां या चिन्तनीया स्थितिरस्ति सैव स्थितिः प्रस्तावितविश्वविद्यालयेस्यापि सम्भाव्यते । अतः सर्वैः सप्रयत्नैरादर्शरक्षा कार्या । हिन्दुजातौ राष्ट्रस्य विशेषता पूर्वार्जितागाधज्ञानविज्ञानराशिरेव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तद्राशिनाशेन हिन्दुजातिनाशो मा भूत् तदर्थं तद्रक्षणसक्षणां विकासकुशलां शिक्षां प्रवर्त्य पथभ्रष्टतोन्मुखयुवकान् समावर्जयितुं सर्वथोचितमित्यादि ।

द्वितीयदिनस्येयं प्रथमा सभा सार्धैकादशनादने विसृष्टा, सर्वे जनाः स्वस्वावासकुटीराभिमुखा भोजनविश्रामादिकृते प्रस्थिताः । भोजनानन्तरं केचिदतिथिगणाः श्री ५ महाराजाधिराजस्य माननीयोपप्रधानमन्त्रिणो महामहिमराजदूतस्योपकुलपतेश्च विसर्जनाय विमानघट्टं टरीग्रामं प्रति प्रस्थिताः । तान् विसृज्य समागत्याप्पराह्णे त्रिनादनसमये समेषां विदुषामतिथीनां जनानाञ्च मञ्चे संमेलनमभूत् । श्री सुब्रह्मण्यशास्त्रिसभापतित्वे सभायाः प्रक्रमः प्रारब्धः । तत्र सभायां प्रमुखा वक्तारो निम्नाङ्किताः स्थिताः—

१ पं० कालीप्रसादमिश्रः २ पं० रामचन्द्रशास्त्री
३ डा० जयमन्तमिश्रः ४ पं० पट्टाभिरामशास्त्री
५ पं० विश्वनाथशास्त्री

वक्तृणां भणितिरभूत्:—वैज्ञानिकैः साधनैरद्य विश्वं संकुचितमिव प्रतिभाति । सर्वासां संस्कृतीनां परस्परं सम्मिश्रणमादानं प्रदानञ्च सम्पद्यत एव । या भाषा पठ्यते यद्देश उष्यते तस्याः भाषायाःस्तस्य च देशस्यं संस्कृतेः प्रभावोन न भवति । कामपि जातिं तदीया संस्कृतिरेव जीवयति । आर्यसंस्कृतेर्मूलाधारः संस्कृतवाङ्मयमेव वर्तते । अतस्तदीयं प्रचारं प्रसारमन्तरा संस्कृतेः संरक्षणमसम्भवि तदन्तरेण च जातिसंरक्षणमशक्यमेव । तस्मात्कारणादस्माकं जातीयरक्षार्थं संस्कृतविश्वविद्यालयः परमावश्यक इत्यादि । अस्याः सभायाः कार्यक्रमे प्रवर्तमान एव सहसा झञ्झावातेन कृतान्तरायाः सर्वे ज० म० विद्यालयाभ्यन्तरे प्रविश्य सभां पुनः प्रवर्त्य हरद्वार-ऋषिकुलविद्यापीठप्रधानाचार्यवेदानन्दझाप्रभृतीनां पण्डितानां पूर्वोक्तप्रसङ्गसङ्गतानि भाषणान्यभवन् । ततः सभापतिप्रवचनानन्तरं वैदिकशान्तिपाठेन सभाविसर्जनं जातम् । अत्रापि रात्रौ संस्कृते मृच्छकटिकनाटकाभिनयकार्यक्रमो विद्यालयस्यं छात्रैः क्रियमाणश्चण्डवृष्ट्या प्रतिरुद्धः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तृतीयदिवसे प्रातः सप्तनादने लक्ष्मणपुरविश्वविद्यालयस्य प्राच्य-विद्याध्यक्षो भूतपूर्वो जनतामहाविद्यालयस्य प्रधानाचार्यः श्रीमदानन्द-झाः सभापतिपदे वृतः। ततो वैदिकस्वस्तिवाचनपुरःसरञ्च विद्व-त्सम्मेलनस्य तृतीयदिवसीयप्रक्रमः प्रक्रान्तः। प्रवक्तारश्च प्रमुखा इमेऽभवन्—

१—योगी श्री नरहरिनाथः

२—श्री खेमराज केशवशरणः

३—श्री निरीक्षणपतिमिश्रः

४—श्री योगी शङ्करनाथः फलेग्रहिः

५—श्री स्वामी करपात्रमहोदयः

६—श्री आनन्दझा इत्यादयः।

अस्याः सभायाः प्रवक्तृभिरपि श्री५महाजाधिराजस्य भाषण आकाङ्क्षितभावनानुकूला विचारधाराः प्रकटिताः स्थिताः। विभिन्नविषयेष्वद्यावधि लब्धज्ञान-विज्ञानयोः समन्वयं कर्तुम्प्राचीना-ध्यात्मिकग्रन्थानां गंभीरमध्ययनमध्यापनं मननमनुसन्धानञ्च विधातुं बद्धपरिकरः संस्कृतविश्वविद्यालयः सुतरामनिवार्यः। संस्कृत-विद्यायाः प्राणा आस्तिकतासच्चरित्रतात्यागतपस्यादयः सन्ति। एतैरेव विश्वशान्तिर्विश्वकल्याणञ्च सम्भवति। अतः साम्प्रतं प्रतिदिनं प्रादुर्भवद्भौतिकविज्ञानाध्ययनमङ्गीकृत्यापि दृढतयो-पर्युक्तानाङ्गणानाम्प्रतिपालनङ्कर्तुं शक्ताः स्नातकाः संस्कृतविश्व-विद्यालयादस्मात्समुत्पद्यन्ताम्। वर्तमाना शिक्षाप्रणाली परीक्षाप्रणाली च दोषमयीति सर्वे जानन्त्येव। गुरुशिष्यादिषु सौहार्दविधात्रीं त्याग-प्रधानां शिक्षां शास्त्रार्थपद्धतिमेवमाधुनिकप्रतियोगिप्रकारं चाङ्गी-कुर्वती परीक्षणसरणी रक्षणीया। ज्ञानविरहितं विज्ञानं विश्वस्य कृते भयङ्करम्प्रतिभातमस्ति, अतो ज्ञानविज्ञानयोः समन्वय एवैतस्य सं० विश्वविद्यालयस्य प्रधानं लक्षं भवतु।

विश्वस्मिन्नधुनाऽनेकविधा वादाः प्रचलिताः सन्ति, तेषां यथार्थ-मुत्तरं स्वकीयेन दार्शनिकेन दृष्टिकोणेन दातुं शक्तेषु स्नातकेषु सम्पा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दितेष्वेव संस्कृतभाषायान्तदीयदर्शनदिशि च विश्वस्यास्था वर्द्धितुं शक्नोति । एतासां सर्वासामेव समस्यानाम्पूर्तये संस्कृतविश्वविद्यालयस्येह स्थापना परमावश्यकीति भणद्भिर्निम्नाङ्किताश्चत्वारः प्रस्तावाः सर्वसम्मत्या पारिताः, पादोननवनादनवेलायां सभा च विसर्जिता । इत्थन्ते प्रस्तावा :—

(१) वैक्रमे चतुर्विंशत्युत्तरसहस्रद्वयसिते (२०२४) चैत्रस्य प्रथमे दिने गते दाङ्गविजौरीजनतामहाविद्यालयप्राङ्गणे हिन्दुराष्ट्रनायकेन श्रीपञ्च महाराजाधिराजेन स्वकरकमलद्वारा स्वदेशीयविदेशीय विशिष्टविदुषां महतां योगीश्वराणाञ्च यत्सम्मेलनं समुद्घाटितन्तत्र सम्मिलिताः सर्वे वयं तत्र भवतः श्रीमतो राष्ट्रनायकस्य भाषणानुसारमावश्यकत्वेनानुभूतस्य संस्कृतविश्वविद्यालयस्य स्थापनाविषयं लक्ष्यीकृत्य दृढं सङ्कल्पं कुर्मो यदिमं संस्कृतविश्वविद्यालयं प्रकृत्या मनोहरे संस्कृतसम्वर्द्धनोत्साहसम्पन्नजनतासहिते नेपालदाङ्गविजौरीस्थल एव तथा स्थापयेम यथैतस्मान्निर्गताः स्नातका गंभीरविद्वत्तासम्पन्ना भवेयुः ।

(२) संस्कृतविश्वविद्यालयस्य तदीयरूपरेखायाश्च सम्बन्धे वयमैकमत्येन निश्चयं कुर्वीमहि यत् "आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च शाश्वती" वचनानुसारं (क) तर्कशास्त्रम् (ख) वेदाः साङ्गाः (ग) कृषिः, पाशुपाल्यम्, वाणिज्यम्, (घ) राजनीतिरर्थशास्त्रमिति चत्वारः सङ्काया रक्ष्यन्ताम्, एतेष्वेवान्ये विभागा गर्भिता भवन्तु ।

(३) सम्मेलनमिदं श्री ५ महाराजाधिराजमहेन्द्रवीरविक्रमसाहदेवे धन्यवादान् शुभाशीर्वादांश्च समर्पयत्तत्र भवतः संस्कृतवाङ्मयसंरक्षणसदिच्छा पूर्णा भवत्विति कामयते ।

(४) सम्मेलनमेतत् संस्कृतविश्वविद्यालयस्य प्रतिवेदनं प्रस्तोतुं निम्नाङ्कितसदस्यानां प्रतिवेदनसमितिमेकां घटयति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नामानीमानि—१ श्री गङ्गाधर पराजुली (ज०म०वि०निदेशकः) संयोजकः

(२) श्री छविलाल पोख्रेलः प्र० आ० पि० सं० म० वि० विजयपुरम्। सदस्यः

(३) श्री केशवदीपकः (वि० सं० आ० स० सचिवः) सदस्यः

(४) श्रीरामेश्वर शर्मा (प्रा०त्रि०वि०वि० काष्ठमण्डपं) सदस्यः

(५) श्री टेकनाथ गौतमः सदस्यः

(६) श्री एकराज शर्मा ,,

(७) योगी नरहरिनाथः ,,

विसर्जितायां सभायामस्यां परावर्तितुकामा भारतस्य काष्ठमण्डपस्य च विद्वांसो राजकीयविमानद्वारा वाराणसीं काष्ठमण्डपं प्रति प्रस्थापिताः। भारतीयविद्वद्भ्यो हिन्दुपरम्परानुसारं यथाशक्ति दक्षिणापि समर्पिताऽभूत्। केचन विद्वांसः सेवाविमानेनापि काष्ठमण्डपं प्रापिताः। अवशिष्टैर्विद्वद्भिःसम्मेलनस्य कार्यवाही चालित एव स्थितः।

श्री कुलमणिदेवकूटाध्यक्षतायामेकादशवादनवेलातः पुनरपि सभा समारब्धा। श्री ५ महाराजाधिराजस्यास्वस्थताया दुःखदसमाचारे समापतिते सभासद्भिः सर्वैस्तत्र भवतो गात्रे शीघ्रस्वास्थ्यलाभार्थं श्रद्धाभक्तिपुरःसरं श्री पशुपतिनाथः प्रार्थितः। आयोजकसमित्या विद्वद्भ्यो रुद्राध्यायपाठहवनादिकृत्यं विहितम्। अस्याः सभायाः प्रक्रमे पादोनचतुर्वादनवेलायां सम्पूर्णे पुनश्चतुर्वादनकालाद् रात्रावष्टवादनवेलापर्यन्तं तृतीयदिवसीयान्तिमा सभाऽभवत्, योगिनो नरहरिनाथस्य सञ्चालकतायामस्याः सभाया अध्यक्षता श्री स्वामीश्वरानन्देव विहिता स्थिता। अनयोः सभयोरुभयोरुपस्थिताः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रायो बहवो विद्वांसो वक्तारोऽभवन् । द्वयोरपि सभयोः पूर्वोक्तविषयेषु बलाधानपूर्वकं विशेषा सम्मतिरियमप्यागता यत्:—

कस्याश्चिदपि भाषायाः साहित्यस्य दर्शनादीनां च प्रचारे तत्रत्येन शासनेन यावन्न शक्तिरारोप्यते तावत् तत्र साफल्यं नायाति । प्राचीने काले आर्याणां संस्कृतिसाहित्य-दर्शनादिषु तात्कालिकैः राजभिर्विपुलं बलमाहितम्। ऋषिकुलगुरुकुलादीनामाश्रयदातारोपि राजान एव भवन्तिस्म । विक्रमादित्यन्पुष्यमित्र-कनिष्क-हर्ष-भोज-शक-लिच्छवि-गुप्त-चोलादि सम्राजां नामान्यत्र कर्मणि प्रसिद्धानि । बौद्धधर्मस्य बौद्धदर्शनस्य च प्रचारे सम्राजा अशोकेन राज्यशक्तिर्यदि नाहिताऽभविष्यत तदा तेन वेगेन तादृशो व्यापकः प्रचारो नाभविष्यत् । यवनवादशाहानान्तु शासनापेक्षयापि मुख्यङ्कार्यमिस्लामीयसंस्कृतेरारब्यूर्दूप्रभृतिभाषाणां च प्रचार आसीत् । वृटिशफ्रेञ्चादीनां पूर्वैशियायां शासनं स्थापितं यदि नाभविष्यत् न च तैः शासनशक्तिरारोपिताऽभविष्यत्तदात्र तदीयभाषासंस्कृत्योरियताल्पीयसानेहसा इत्थङ्कारं प्रचारो नाभविष्यत् । किमपि राष्ट्रं यदि हिन्दूसंस्कृते : हिन्दूदर्शनस्य च प्रचारप्रसारौ वाञ्छति, तर्हि तौ मनोरथमात्रेण नसम्भविष्यतः । तयोः कृते समाजेन सहैव शासनस्यापि विशेषसहयोगः सुतरामनिवार्यः । कस्याश्चिदपि संस्कृतेर्दर्शनस्य च प्रचारप्रसारसंरक्षणानि केवलं तर्कपूर्णवादविवादद्वारा जातानि नदृष्टानि । संस्कृतविश्वविद्यालय-स्थापनमात्रेण भौतिकवादे सर्वथानुरक्तमाधुनिकं भोगलोलुपं समाजं स्वानुकूलव्यवस्थाम्प्रत्यावर्तयिष्याम इति चिन्तनं केवलं कल्पनैव भविष्यति । तस्य कृते तु श्रम-त्याग-तपश्चर्य्यादिभावनां भृत्वा विश्वशान्तिदिश्यग्रेसरं कर्तुं समाजस्य शासनस्य च बहुविधायाः निरन्तरसेवाया आवश्यकताऽऽस्ते ।

अर्थशास्त्रस्य संस्कृतेश्च संरक्षणसम्वर्धनादिकृते संस्कृतविश्व-विद्यालयेऽस्मिन् निम्नाङ्कितविषयाणां तत्परतया कार्यान्वयनं नितरा-मावश्यकमिति सर्वेषामेव वक्तृविदुषां बलवदैकमत्यमभूत् । इमे च ते विषयाः—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१—राष्ट्रियशिक्षाया माध्यमं साधनं क्रमशः संस्कृतभाषैव कर्तव्या ।

२—आकाशवाणी (ने० रे०) द्वारा संस्कृतेऽपि समाचारः प्रसारणीयः ।

३—अन्यभाषाशिक्षायामपि प्रारम्भकक्षातः सर्वोच्चकक्षापर्यन्तं सर्वत्र संस्कृतभाषाध्ययनमनिवार्यङ्कार्यम् ।

४—संस्कृतेऽपि 'द राइजिंग नेपाल' तुल्यमेकं समाचारपत्रं प्रकाशनीयम्

५—संस्कृतभाषायामलब्धानां व्यवहारोपयोगिनां वैज्ञानिकानामन्यभाषाग्रन्थानामपि संस्कृतेऽनुवादः कार्यः ।

६—सस्कृतभाषायामाधुनिकव्यवहारोपयोगिमौलिकग्रन्थलेखनेपि लेखकाः समुचितपुरस्कारप्रदानघोषणया प्रोत्साहनीयाः ।

७—सर्वैः राजकीयपदाधिकारिभिः साधारणसंस्कृतभाषाज्ञानं रक्षितुमनिवार्यम् ।

८—शासनपदेषु संस्कृतविद्वद्भ्यः प्राथमिकता दीयेत ।

९—संस्कृते लिखितानां प्राचीनानां वैज्ञानिकविषयाणामनुसन्धानं विधेयम् ।

१०—संस्कृते काव्यनाटकानां प्रचारप्रसारौ नवलेखनं वृत्तपत्रप्रचारश्च कर्तव्यः

११—सर्वत्र धर्मशास्त्राणामध्ययनाध्यापनप्रचाराः प्राचुर्येण कार्याः ।

१२—स्वभावतः संस्कृतिसंरक्षणमूलस्रोतसि महिलावर्गे गृहस्वास्थ्यविज्ञानादिशिक्षा सरलसंस्कृतमाध्यमेनैव दातुमनिवार्या विधेया ।

१३—संस्कृतभाषाप्रणयिभिर्मित्रराष्ट्रैः सह पूर्वोक्तविषयेषु सहयोगादानप्रदानसम्बन्धोपि विधेयः ।

१४—आर्यसंस्कृतेरनुयायिना हिन्दुधर्मावलम्बेन हिन्दुराष्ट्रेण आर्यसंस्कृतेर्मूलाधारस्वरूपां संस्कृतभाषां सहराष्ट्रभाषामुद्घोष्य निजेतिहासे स्वर्णवर्णमभिनवं पत्रं स्थापनीयम् ।

उपर्युक्तसम्मत्या सह बहुभिर्विद्वद्भिः स्वस्वभाषणे दृढ़तया भणितं यत् प्रस्तावितसंस्कृतविश्वविद्यालयेऽस्मिन् अध्यापकाः स्वल्पा एव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नियोक्तव्याः। उच्चकक्षाध्येतारः कुशाग्रबुद्धयो व्युत्पन्ना विद्यार्थिनो निम्नकक्षाध्येतॄन् विद्यार्थिबन्धूनध्यापयन्तु । परिपाटीयम्प्रमुखा रक्षणीयेति। ततः सभापतिप्रवचनानन्तरं वैदिकस्वस्तिवाचनपुरःसरं सभाविर्सनमजनि । पूर्वेद्युर्दृश्यतयोपस्थापयितुं निश्चितस्य मृच्छकटिकनाम्नः संस्कृतरूपकस्याभिनयो रात्रौ नवनादनाद् द्वादशवादनपर्यन्तं विहितः। इत्थमवसितं सम्मेलनमिदम्।

अन्येद्युरवशिष्टानतिथीन् सादरं विसृज्यायोजकसमितेः सचिवः सम्मेलनेऽनवरतसहयोगिभ्यो जनेभ्यः पञ्चायत्त-वर्गीयसङ्घटन-सदस्य-राजकीयकर्मचारि-मरुत्तर-शालिक-चालक-प्रभृतिभ्यश्च कृतज्ञतापूर्वकं धन्यवादं ज्ञापयित्वा सम्मेलने जातानां त्रुटीनां कृते आयोजकसमितेः प्रातिनिध्येन क्षमामयाचत।

सम्मेलनेऽवसिते तत्सम्बद्धशेषकृत्यजातपूर्तेरुत्तरदायित्वमायोजकसमितेरध्यक्षस्याचिरवत्यञ्चलाधीश - श्रीरामनारायणश्रेष्ठस्याज्ञया जनतामहाविद्यालयस्य सञ्चालकसमितये प्रादायि।

सम्मेलनसम्बद्धायव्ययविवरणं भाषाभागे ४२ पृष्टे द्रष्टव्यम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीं

प्रस्तावित-संस्कृतविश्वविद्यालयस्य प्रतिवेदनम्

प्रतिवेदनसामग्रीसङ्कलनम्

विद्वत्सम्मेलने समाप्ते द्वितीयादेव दिवसात् प्रतिवेदनसमिते-रायोजकसहिताः श्रीसुरेन्द्रझाप्रभृतयः केऽपि विद्वांसः स्थानीये सूदय-रामेश्वरमन्दिरे राष्ट्रनायकस्य स्वास्थ्येलाभार्थं कतिपयदिनपर्यन्त-मनुष्ठाने लग्नाः।

ततः परं प्रस्तावितस्य संस्कृतविश्वविद्यालयस्य सम्बन्धे विशि-ष्टानां विदुषां लिखिताः सम्मतीः प्राप्तुं पत्रव्यवहारे कृते कतिपयानां विदुषां सम्मतयः शुभकामनाश्च प्राप्ताः। किन्तु भारतीया अधिका विबुधास्तस्यां वेलायां ग्रीष्मावकाशे भ्रमणार्थं गता अभवन्निति समये पत्रमप्राप्य सम्मतीर्दातुं न प्राभवन्। श्रावणस्य तृतीयसप्ताहे प्रतिवेदन-समित्यायोजकगङ्गाधरशास्त्री पराजुली विदुषां सम्मतीः शुभकामना-श्च प्राप्तुं वाराणसीं प्रति प्रयातः। पूज्यपादस्वामि श्री १००८ हरिहरानन्दसरस्वती (करपात्रमहाराज) सर्वतन्त्रस्वतन्त्र-महामहो-पाध्याय-श्रीगोपीनाथकविराज-पण्डितराज- श्रीराजेश्वरशास्त्रिद्रविड-प्रभृतिविशिष्टविदुषामपि शुभाशीःस्वरूपाःसम्मतीर्नीत्वा भाद्रमासान्ते गङ्गाधरशास्त्री दाङ्गमागात्।

तदनन्तरं विद्वद्भाषण-सम्मति-प्रभृतीनामाधारे प्रतिवेदनस्य प्रारूपे रच्यमाने ज० म० वि० स० सचिवः श्री जागेश्वरब्राह्मणः प्रतिवेदनसम्बन्धे सम्मतिं नेतुं शीघ्रं काष्ठमण्डपमागम्यतामिति वारं वारं सूचनां दातुमारभत। तत्कालं प्रतिवेदनसमितेरुपस्थितसदस्यैः श्रीटेकनाथगौतम-श्रीकेशवदीपकायोजकैः प्रतिवेदनस्य संक्षिप्तां रूपरेखां प्रस्ताव्य तां नीत्वायोजकगङ्गाधरशास्त्री आश्विने २९ गते काष्ठमण्डपं गत :।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यामेव वेलायां स्वास्थ्यपरीक्षणार्थं राष्ट्रनायकः शीघ्रमेव बहिरेतीति चर्चा चलिता, प्रतिवेदनं प्रस्तोतुं च कियानपि समयोऽपेक्षित इति हेमन्तसमये व्यवस्थितां योजनां सम्मतिं च दातुं शक्ताः सदक्षिणापथस्थिताः केऽपि विशिष्टा विद्वांस आह्वयितव्याः, एका विद्वद्गोष्ठी समायोजनीया, तस्यामेव गोष्ठ्यां प्रतिवेदनसमितिसदस्यसमुल्लसितायां विविधाङ्गेषु पूर्णविवेचनेन साकं प्रतिवेदनं पूरणीयमिति ध्येयं लक्षीकृत्य प्रतिवेदनसम्बन्धेऽद्यावधि जातौ गतिविधी अवगतौ कारयितुं वाल्मीकिसंस्कृतमहाविद्यालये पण्डितराजश्री सोमनाथसिग्द्यालसाभापत्ये कार्त्तिके ३ गते एकां विद्वत्सभामामन्त्र्योपस्थितविद्वद्वर्गद्वारा प्रतिवेदनस्य रूपरेखायामनुमोदने प्राप्ते तस्यैवाधारे प्रस्तावितसंस्कृतविश्वविद्यालयस्यावश्यकतायाः सैद्धान्तिकस्वरूपमात्रस्य च काञ्चिच्चर्चां कृत्वा निवेदनमेकं सज्जीकृत्य कार्तिके ४ गते तात्कालिकमाननीयशिक्षामन्त्रिश्रीवासुदेवप्रसाद ढुङ्गानाद्वारा श्री ५ महाराजाधिराजसमक्षं प्रापयितुं सहसचिव श्री जागेश्वरब्राह्मण-निदेशक श्रीगङ्गाधर शास्त्रिभ्यां प्रस्तुतम्, भाविन्या विद्वद्गोष्ठ्याः कृतेऽपेक्षितैः कतिपयैर्भारतीयविद्वद्भिः सह सम्पर्कं रक्षितुं महामहिम्ना श्री भारतीयराजदूतेन सह परामर्शश्च कृतः।

२०२५ कार्तिके ४ गते प्रस्तुतं सङ्क्षिप्तं निवेदनम्

श्री ५ महाराजाधिराज सर्वकार,

२०२४ सम्वत्सरे चैत्रे १ गते दाङ्गस्थितजनतामहाविद्यालयप्राङ्गणे समायोजितस्य विद्वत्सम्मेलनस्य समुद्घाटनं तत्र भवतां करकमलद्वारा सम्पादयितुं प्राप्नुवद्भिरसीमहर्षोऽनुभूयते। विद्वत्सम्मेलनमिदं प्रस्तावितस्य संस्कृतविश्वविद्यालयस्य पृष्ठभूमावायोजितमासीत्। केवलं त्रयोदशदिनानां स्वल्पेन समयेन या सज्जा भवितुं शक्ता, विद्वद्वर्गस्य साधुसमुदायस्य च योपस्थितिर्भवितुं शक्ता तत्सर्वं तत्र भवतः प्रतापस्य प्रभावः। त्रिदिवसीयसम्मेलनस्यास्य कार्यविव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रणं सङ्क्षेपतः पृथक्प्रकाश्यमानमस्ति । राष्ट्रनायकैः स्वकीये समुद्घाटनभाषणे व्यक्तीकृतमनुरोधं विचार्य सम्मेलनसमये विद्वद्वर्गैर्यो विचारविनिमयो विहितः, भाषणानि कृतानि, पश्चाच्च समागतविद्वद्भिः सम्पर्कं स्थापयित्वा समानीतासु लिखितसम्मतिषु य आशय उपलब्धः, निरुक्तं सर्वं विषयवस्तु समधीत्य तस्यैवाधारे प्रस्तावित-संस्कृत विश्वविद्यालयस्यावश्यकतां स्वरूपञ्चाधिकृत्य राष्ट्रनायकसमक्षं सङ्क्षेपतो निवेदनमिदं प्रस्तूयते ।

दाङ्गात्प्रस्थानस्य दिवस एव सहसा तत्र भवतोऽस्वस्थीभावस्य दुःखदघटनया किञ्चित्कालपर्यन्तं कार्येऽस्मिञ्शैथिल्यस्य समागमनाद्विद्वत्सम्मतिसङ्कलने च कियतोऽपि समयस्य संलग्नत्वात्कार्येऽस्मिन्कियानपि विलम्बो जातः ।

तत्र भवतः समुद्घाटनभाषणीयघोषणानुसारं कियद्वर्षपूर्वं शिक्षास्माकं संस्कृतमयी आसीत् । अस्माकं समस्ता व्यवहाराः संस्कृतशिक्षाया एवाधारे प्रचलन्तिस्म । धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ । यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित्, इयं सिंहगर्जनासीत। दुर्भाग्यवशादार्यदेशस्यैकस्मिन्विशाले भागे शक-हूण-यवन-आङ्लानामाक्रमणं सञ्जातम् । आर्यसंस्कृत्युपरि नानाघातप्रत्याघाता आपतिताः। आर्यसंस्कृतेर्मूलाधारभूतं संस्कृतवाङ्मयमुपेक्षितं भवितुमारब्धम् । एतस्य प्रभावोऽस्माकं देशेऽपि पतितुमारब्धः । संस्कृतमय्याऽस्मच्छिक्षयाद्यान्यदेव रूपं परिग्रहीतुमारब्धम् । संस्कृतशिक्षां प्रति निष्ठा क्षीयमाणास्ते । अस्मद्धर्मसंस्कृतिपरम्परा एवास्माकं राष्ट्रियतास्ति । अस्मद्धर्मसंस्कृतिपरम्पराः संस्कृतशिक्षायामेवाधारिताः सन्ति । धर्मसंस्कृतिपरम्परारूपां राष्ट्रियतां दृढीकर्तुमपि अद्यास्माकं कृते संस्कृतशिक्षात्यावश्यिकास्ति । अस्मद्देशो विश्वस्यैकमात्रं हिन्दू-अधिराज्यमस्तीति हिन्दूसंस्कृतेः प्राणमयस्य संस्कृतवाङ्मयस्य संरक्षणं संवर्धनञ्चास्माकं परमं कर्तव्यमापतितमस्ति । वर्तमानायाः पञ्चायत्तप्रजातन्त्रप्रणाल्या आधारशिलां दृढीकृत्य विकासं कर्तुं च संस्कृतवाङ्मयस्योत्थानमत्यावश्यकमापतितं विद्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संस्कृतवाङ्मयस्य वेद-वेदाङ्ग-दर्शनस्मृतीतिहास-पुराणानि प्रायोऽस्माकमेव हिमालस्य कन्दरासु तपस्यतां महर्षीणां मस्तिष्केष्वाविर्भूतानि सन्ति। अस्माकं देशः संस्कृतवाङ्मयस्य मूलस्थलमित्युक्तौ न भविष्यत्यत्युक्तिः । पुरातनसमयेऽस्मद्देशे विद्वांसः प्रतिगृहं पाठशालाश्चालयन्तिस्म। दूरादागताश्छात्रा भोजनवस्त्रादिप्रबन्धपूर्वकमध्याप्यन्तेस्म। एतादृशेभ्यो विद्वद्भ्यस्तात्कालिका राजानःसर्वाङ्क्षमापत्रं प्रदाय संस्कृतं प्रति स्त्रीयां निष्ठां व्यञ्जयन्तिस्म। अद्य तत्प्रचलनं हारितम्। पर्वतेषु नगरेषु ग्रामेषु खेटखर्वटेषु कोणेषु च यत्र तत्र संस्कृतप्रतिकूला शिक्षा प्रचलितास्ति । अस्मत्कुमारेषु स्वकीयधर्मसंस्कृतिपरम्पराः प्रति श्रद्धा क्रमात्क्षीयते । अस्यामवस्थायां संस्कृतशिक्षादिशि ध्याने न दत्तेऽस्माकं राष्ट्रियतैव सङ्कटे पतिष्यतीति संम्भाव्यते। राष्ट्रियतानुकूलशिक्षा राज्याश्रयमलभमाना राष्ट्रियतामपि समादाय समाप्ता भवति। राष्ट्रनायकपूर्वजानां शाखासु श्रीकुलमण्डनसाहेन कास्कीपण्डितानां ज्यौतिषिकाणाञ्च सहयोगस्य प्राप्ततया सा शाखा स्फार्यमाणा लंतर्जुङ्ग-गोरखाविदुषाञ्च साहाय्यमासादयन्ती काष्ठमण्डपमागत्य विशालनेपालसंघटनशक्ताऽभवत्, अन्या ढ़ोर-भिरकोट-गह्रौंकोटाद्याः शाखा विद्वत्प्रश्रयमनवाप्यैव सीदन्त्यो गता इति साहवंशस्य पूर्वेतिहासेनापि सूचितमेवास्ते। अतो राष्ट्रियतानुकूलशिक्षायाः संरक्षणं राष्ट्रस्य कृते श्रेयेस्करमस्ति ।

राजनीतिकदृष्टचा पृथग्भूता अपि विश्वस्य हिन्दवः सांस्कृतिकदृष्टचाऽस्माकं देशं राजमुकुटञ्चात्मीयं मत्वा सश्रद्धं सगौरवं च पश्यन्ति। हिन्दूसंस्कृतिमूलाधारभूतसंस्कृतवाङ्मयसंरक्षणसंवर्धनं नेपालोऽवश्यं करिष्यतीत्याशान्विताश्च सन्ति, सहायतां चास्माकं कर्तुन्तत्पराः सन्ति। अतो हेतोरस्मद्देशे संस्कृतवाङ्मयप्रतिष्ठापनायै प्रयत्नस्य भवनमनिवार्यमास्ते।

राष्ट्रनायकैः समुद्घाटनभाषणे भणितमेवास्ते अस्माकं पुस्तकालयेषु अनल्पमूल्यानि ग्रन्थरत्नानि सन्तीति । तेषां ग्रन्थानामध्ययनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मननमनुसन्धानं सारग्रहणञ्च विधाय प्रचारे प्रसारे च कृते वयं स्वभङ्ग्यैव वैज्ञानिकचमत्कारेण विश्वमाकृष्टुं शक्नुमः, सन्मार्गे प्रवर्तयितुं प्रभवामो, विश्वशान्तिं च स्थापयितुं समर्थाः स्याम । अतोऽस्माकं देशे संस्कृतविश्वविद्यालयोऽत्यावश्यकोऽस्ति । अद्यत्वे ऽस्माकं प्रतिवेशिराष्ट्रेषु विश्वविद्यालयानां यत्स्वरूपमस्ति, अस्माकं प्रस्तावितसंस्कृतविश्वविद्यालयास्यापि तदेव स्वरूपं यदि भवेत्तदाऽस्माकमाकाङ्क्षाः कदापि साकारा न स्युरतोऽस्य स्वरूपेण विलग्नेनैव भवितव्यम् ।

विगते विद्वत्सम्मेलने त्वरावशात्सम्पर्कमप्राप्तान्व्यवस्थितयोजना दातुं समर्थान् दक्षिणभारतीयैः सह कतिपयान्विशिष्टविदुष आमन्त्र्यास्मिन्नेव हेमन्तसमये स्वल्पाया एकस्या विद्वद्गोष्ठ्याआयोजनस्य सञ्चालकसमितितो निर्णीततया तस्यामेव गोष्ठ्यां संस्कृतविश्वविद्यालयस्य विस्तृतं स्वरूपं, पाठ्यक्रमं, कुटीरव्यवस्थां प्रशासनसञ्चालनप्रभृतिकार्यव्ययस्याकलनादिविषयञ्च पूर्णतो विविच्य निर्णयस्य ध्येयं रक्षित्वा सांप्रतं केवलं सैद्धान्तिकरूपेण संस्कृतविश्वविद्यालयस्य स्वरूपं निम्नधारासु प्रस्तूयमानमस्ति ।

१. संस्कृतव्याकरणे व्युत्पन्नान् कतिचन छात्रान्विदेशशिक्षास्वपि व्युत्पन्नान् विधाय तत्सारभूतमावश्यकं चांशं संस्कृते नेपालीयभाषायां चानुवादं कारयित्वा संस्कृतस्य नेपालीयभाषायो एव वा शिक्षयैव चिकित्सकाञ्शिल्पिनश्च सम्पाद्य विदेशशिक्षायां जातस्य समय-साधन-शक्तीनां राष्ट्रियस्यापव्ययस्य निवारणे प्रयत्नो विधेयः ।

२. आधुनिकसंस्कृतविद्यालयैरुपेक्षितान्परमाधुनिकसामाजिकजीवने नितान्तमपेक्षितान्पौरोहित्यशास्त्रव्यवहारशास्त्रार्थशास्त्रवार्ता-विद्या (कृषि-पशुपालन-वाणिज्य) स्थापत्य (वास्तुविद्या) नागरिकशास्त्र - राजशास्त्र- गणित-भूगोल-खगोलेतिहासभूगर्भ-पत्रकारिता-लोकभाषादिकानपि पाठयितुंलक्षीकृत्यानुसधानं कार्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३. आयुवदस्यास्त्रविद्यासहितधनुर्वेदस्य स्थापत्यशास्त्रस्य यन्त्रशास्त्रस्य भूगर्भशास्त्रस्य जीवशास्त्रस्य रसायनशास्त्रस्य चागमोक्तविषयस्याध्यात्मिकं भौतिकञ्चेति द्विविधाभ्यां साधनाभ्यामनुसंधानं कृत्वा हिन्दूसंस्कृतेः प्रतिष्ठां पूर्ववज्जागरूकां रक्षितुं प्रयत्नः कार्यः।

४. 'ज्ञानं भारः क्रियां विना' यस्तु क्रियावान्पुरुषः स विद्वान्' इमं सिद्धान्तं ध्याने रक्षित्वा रचनात्मिकाया व्यावसायिक्याश्च शिक्षायाः पूर्णव्यवस्थां विधाय स्नातकान्स्वावलम्बान् कृत्वा राष्ट्रमात्मनिर्भरं विधातव्यम्।

५. कस्मिंश्चिदपि पुस्तके न लिखितानां परं पूर्वजक्रमाद्धस्तक्रियाद्वाराऽस्मद्देशे प्रचलितानां सांप्रतिकनिष्क्रियशिक्षया विनाश्यमानानां गृहशिल्पकला-मन्त्रवैद्यकप्रणालीनां संरक्षण-संवर्धने प्रचार-प्रसारौ च विधेयौ।

६. राजतन्त्रसंरक्षणं हिन्दुसंस्कृतेर्हिन्दुजातेश्च विकासं च कर्तुं वर्तमानं भोगाभिमुखमशान्तं समाजं संयमस्यादर्शं दर्शयित्वा शान्तं गुरुशिष्यसम्बन्धं च सुमधुरं विधातुं प्राचीनगुरुकुलपद्धत्या ब्रह्मचर्याश्रमं संस्थाप्य विश्वबन्धुत्वभावनां स्थिरीकृत्य विश्वकल्याणं सम्पादयितुमात्मबलशालिनः कर्मठाः सदाचाराश्च स्नातका निष्पाद्याः।

७. संस्कृतवाङ्मयेतिहासस्य तत्सम्बद्धलोकभाषाणां चान्वेषणं कार्यम्।

८. योग-योगाङ्गोपासनानां क्रियात्मकशिक्षाद्वाराऽऽगमशास्त्ररहस्यानुसन्धानं विधेयम्।

९. अस्मत्पुस्तकालयस्थितानां प्राचीनवैज्ञानिकग्रन्थानां प्रकाशन-मननानुसन्धानसारग्रहणं कृत्वाऽऽध्यात्मिकसम्पत्तिसंपुटितस्य स्वस्यैव विज्ञानस्य प्रचारेण विश्वं कल्याणमयमार्गे प्रवर्तनीयम्।

१०. विश्वबन्धुत्वस्यादर्शसंमुखे कृत्वा पौरस्त्याध्यात्मिकरहस्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जिज्ञासवे पाश्चात्त्यजगते यथाविधि आध्यात्मिकरहस्यस्य परिचयो देयः ।

११. 'यन्नवे भाजने लग्नः संस्कारो नान्यथा भवेत्' नीत्यनुसारं छात्रानात्मबलसम्पन्नांश्चरित्रशालिनोऽनुशासितान्राष्ट्रियतां प्रति निष्ठावतश्च कर्तुं सप्ताष्टवर्षावस्थात एव प्रवेशो विधेयः ।

१२. प्रविष्टच्छात्रेभ्यः पूर्वं वेदवेदाङ्गानां साधारणशिक्षा ततः पौरस्त्यपाश्चात्त्यज्ञानविज्ञानयोःसमन्वयात्मकपद्धत्योच्चशिक्षा दातव्या ।

१३. विशिष्टानामनुभविनां च विदुषां समित्या ज्ञानविज्ञानयोः समन्वयात्मकः पाठ्यक्रमो निर्धार्यः ।

१४. वादविवादग्रस्ते वर्तमाने जगति अस्माकं नेपालस्य समन्वयसहिष्णुतयोःसिद्धान्तः प्रचार्यः ।

१५. भवनसज्जायां बहुव्ययमकृत्वाग्ने रक्षितुं पुस्तकालयभोजनालयकार्यालयादिकृत एव भवनानि निर्मायान्यत्सर्वं कार्यं कुटीरेषु निर्वाह्यम् ।

१६. आन्वीक्षिकीत्रयीवार्तादण्डनीतिभेदैश्चतुर्षु सङ्कायेषु विभक्ता विद्याः प्रचारयितुं प्रसारयितुं च यथासम्भवं प्रयत्नो विधेयः ।

१७ परीक्षाध्यापनानुसन्धानैस्त्रिधा भिन्नानि विश्वविद्यालयमूलस्रोतांसि सम्यक्संचालयितुं सदावधातव्यम् ।

१८. स्नातकान्वैदुष्यसम्पन्नानात्मनिर्भरांश्च संपादयितुं यथाविषयं मौखिकी लिखिता प्रायोगिकी वा त्रिविधा परीक्षा व्यवस्थाप्या ।

१९. छात्राणां बोधं संस्कारं च दृढं सम्पादयितुमध्यापनव्ययभारं न्यूनीकर्तुं चोच्चकक्षश्छात्रद्वारा निम्नकक्षच्छात्राणामध्यापनसञ्चालनरूपायाः प्राचीनप्रणाल्या यथासम्भवं प्रयोगो विधेयः ।

२०. प्रात्यहिककार्यजातपत्र-पत्रिकादीनामनुसंहितविषयाणां च प्रकाशार्थं मुद्रणालयव्यवस्था कार्या ।

२१. अध्ययनाध्यापनलेखनभाषणप्रभृतिनिखिल व्यवहारमाध्यमं सुबोधं सरलं सरसं सभ्यं च संस्कृतं कृत्वा साधारणजनेषु प्रचारो विधेयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२२. संस्कृतप्रौढ़पाण्डित्यरक्षणपूर्वकं विवेचनाशक्तेरपि संवर्धनं कार्यम् ।

२३. त्यागस्य तपस्याया मितव्ययितायाश्चादर्शं पुरो निधाय समस्तं कार्यजातं कार्यम् ।

२४. महेन्द्रसंस्कृतविश्वविद्यालयेनाम्ना दाङ्ग-विजौर्यां संस्कृतविश्वविद्यालयः स्थापनीयः ।

२५. 'शस्त्रेण रक्षिते राष्ट्रे शास्त्रचिन्ता प्रवर्तते' नीत्यनुसारं राष्ट्रे सुरक्षिते सत्येव सर्वस्यापि कार्यस्य संभवाद्राष्ट्रं दृढीकर्तुं प्राचीनराजशास्त्रमनुसन्धाय तदाधारेण पञ्चायतदर्शनं परिपुष्टं परिष्कृतञ्च विधेयम् ।

प्रस्तावितसंस्कृतविश्वविद्यालयस्य वास्तविकं स्वरूपं स्थापनोत्तरं शनै पूर्णं भविष्यति । प्रारम्भिकं स्वरूपं स्वल्पं स्वल्पतरं वा भवतु परं किञ्चित्समयानन्तरमेवासौ विशुद्धमपेक्षितञ्च स्वरूपं धृत्वावश्यं नेपालस्य प्रतिष्ठां वर्धयिष्यति महतोऽभावस्य च पूर्तिं करिष्यति ।

विश्वविद्यालयोऽयं कुत्र स्थाने स्थापनीय इत्यस्मिन्विषये विद्वत्सम्मेलने बहूहापोहौ विचारविनिमयं च कृत्वान्ते सर्वसम्मत्या दाङ्गविजौरीभूमावेव स्थापनीय इति प्रस्तावः पारितोऽस्ति । दाङ्गीयजनतायाः संस्कृते निष्ठोत्साहश्च सम्मेलन उपस्थितैः सर्वैर्विदितावेवास्ताम् । विगत २००८ वत्सरीयवात्यायां बहुषु नेपालीयजनेषु आङ्गलविद्यालयोद्घाटनपरेषु दाङ्गीयजनतया संस्कृतविद्यालयं संस्थाप्य बहुमूल्यां स्वकीयां १२०० वर्गपरिमितां भूमिं विद्यालयाय प्रदाय संस्कृतं प्रति स्वीयश्रद्धाविश्वासौ विशदीकृतौ । दाङ्गीयवायुजलयोः पर्वतवासिनस्तलवासिनश्च रमन्ते । नागरेणान्येन केनापि बाह्याकर्षणेनाध्यापनाध्ययनमननानुसन्धानेषु कस्यापि क्षोभस्याशङ्कात्र नास्ति । विश्वविद्यालयार्थमपेक्षितायाः समतलभूमेर्नैयून्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मप्यत्र नास्ति न वा सीम्नः समीपतया विदेशीयप्रभावापातस्याशङ्कात्र विद्यते। सम्मेलने समुपस्थाय दाङ्गोपत्यकां साक्षात्कर्तारो बहवो विद्वांसो दाङ्गीयां प्रशान्तरमणीयां भूमिमेव संस्कृतवाङ्मयानुशीलनोपयुक्तां निर्धार्य तदनुसारं स्वसम्मतिष्वाशयं प्रकटितवन्तः। साम्प्रतिकाणवीययुगे सुरक्षाया दृष्टयापि अस्मत्संस्कृतिसर्वस्वसंस्कृतवाङ्मयस्य ग्रामप्रत्यावर्तनमेव श्रेयस्करं प्रतिभाति। दाङ्गे संस्कृतविश्वविद्यालये स्थापिते सति पूर्वपश्चिमयोः २३क्रोशविस्तृताया दक्षिणोत्तरयोश्च क्रोशपञ्चकात्क्रोशनवकपर्यन्तमायताया दाङ्गोपत्यकायास्तथा ततः पादोनाया देवखुन्युपत्यकायाः पार्श्वस्थितानामन्येषां मण्डलानां विकासतो बहुमात्रायां राष्ट्रियलाभोऽपि स्यात्। विश्वविद्यालयनिर्माणार्थमपेक्षितं मुख्यवस्तु आर्थिकस्त्रोत एवास्ते, देवखुर्यामेवोर्वरायामुपत्यकायां विद्यालयस्य १२०० वर्गपरिमिता भूरस्त्येव। वैज्ञानिकसाधनैरुत्पादने वर्धिते चतुःपञ्चवर्षानन्तरमष्टादशलक्षरुप्यकाणां वार्षिकस्यायस्यानुमानं विशेषज्ञैः कृतमस्ति। प्राचीनैरपि साधनैर्व्यवस्थितरूपेणोत्पादनवर्धनार्थं प्रयत्ने कृते वर्षत्रयाभ्यन्तर एव चतुर्लक्षरूप्यकाणां वार्षिक आयस्तु सहजत एव भविष्यति।

दाङ्गे बिजौर्यां स्थापितं जनतामहाविद्यालयं महेन्द्रसंस्कृतविश्वविद्यालयरूपेण परिणमयतां दाङ्गीयजनानां शिवं सङ्कल्पं स्वीकृत्य राप्त्यञ्चलाधीशस्याध्यक्षतायां संघटितायै वर्तमानायै सञ्चालकसमितये यथावश्यकं विशेषज्ञप्रग्रहणेऽनुमतिपूर्वकं विश्वविद्यालयसञ्चालनार्थमपेक्षितस्यार्थराशेर्विद्यालयसविधेऽभावाल्लक्षपञ्चक—रूप्येकाणामनुदाने प्रदत्ते सति प्रारम्भिकीं व्यवस्थां पूर्णां कृत्वा शीघ्रातिशीघ्रं तत्र भवतां राष्ट्रनायकानां करकमलद्वारोक्तविश्वविद्यालयं समुद्घाट्य दाङ्गीयजनतायाः सदिच्छां साकारीकर्तुं सविनयं प्रार्थयामहे तत्र भवतां यथाज्ञा। यथा वा दया।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निवेदकौ

जागेश्वरो ब्राह्मणः गङ्गाधरशास्त्री पराजुली
जनतामहाविद्यालयस्य सहसचिवः। जनतामहाविद्यालयनिदेशकः।
प्रतिवेदनसमितेरायोजकसदस्यश्च।
१७।१६१ टंगालगैरीधारा,
काठमाडौं नेपाल २०२५।७।४।१

इदं निवेदनं प्रस्तुत्य दाङ्गे प्राप्ते प्रतिवेदनसमितेर्वरिष्ठतमसदस्यो योगी नरहरिनाथो दक्षिणापथयात्राया दाङ्गमागात्। तस्य समक्षे प्रतिवेदनसम्बन्धे जायमाना वस्तुस्थितिर्दर्शिता। तेन सह स्थित्वा प्रतिवेदनसमितेः सदस्यैर्विहिते विचार-विनिमये विश्वस्य कोऽपि विश्वविद्यालयः प्रारम्भ एव पूर्णो भूत्वा न प्रादुर्भूतः। सर्वे शनैः शनैः पूर्यन्ते। अस्माभिरपि लघुयोजनां निर्मायास्य महत्त्वपूर्णकार्यस्य शुभारम्भो लघुनैव रूपेणापि शीघ्रं विधातव्यः। शुभारम्भसमारोह एव शिष्टविशिष्टदक्षिणोत्तरापथस्थितान् विदुष आमन्त्र्य तत्सत्परामर्शमात्मानुरूपं नीत्वा क्रमात् कार्यान्वितं करिष्यामः। अद्य पुनर्विद्वद्गोष्ठीसमायोजनपक्षे न गत्वा संस्कृतविश्वविद्यालयस्य शुभारम्भपक्ष एव सर्वप्रकारं प्रयत्नं कुर्वीमहीति निर्णयं कृत्वा द्वितीयविद्वद्गोष्ठीसमायोजनां स्थगयित्वा गतविद्वत्सम्मेलने व्यक्तीकृतानां मन्तव्यानां पुनः प्राप्तानां सम्मतीनां चाधारे लघुतरमेतत् प्रतिवेदनं प्रस्तूयतेः—

प्रतिवेदनम्

प्रतिवेदनशब्दोच्चारणसमकालमेव स्वभावतो वेदनं प्रति ध्यानमाकृष्यते। आशानुसारा प्रत्याशा, क्रियानुरूपा प्रतिक्रिया, उत्तरानुकूलं प्रत्युत्तरं, बिम्बमिलितं प्रतिबिम्बमिव वेदनसंवादि प्रतिवेदनमेव नैसर्गिकजिज्ञासाविषयो जायते। यं विषयं लक्षीकृत्य वेदनमायाति प्रतिवेदनमपि तमेव विषयमधिकृत्य न प्रस्तूयेत चेत् 'आम्रान् पृष्टः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कोविदारानाचष्टे' न्यायस्य विषयीभूयोपहासास्पदं भवति। अतः कस्मिंश्चिदपि प्रतिवेदने प्रस्तावनीये वेदनसम्बद्धान्विषयान्विश्लिष्य निर्धारयितुमत्यावश्यकं भवति। प्रकृतं प्रतिवेदनं राष्ट्रनायकसमक्षं प्रस्तोतव्यमिति राष्ट्रनायकैर्विद्वत्सम्मेलने किं किं वेदितं, वेदनस्यास्य लक्ष्यीभूता विषयाश्च के के आसन्निति तेषु विषयेष्वत्र किञ्चिच्चिन्तनमप्रासङ्गिकं न भवेत्।

सर्वप्रथमं विद्वत्सम्मेलनस्यायोजकानां प्रार्थनां स्वीकृत्य विभिन्नेषु महत्त्वपूर्णकार्येषु व्यापारणीयं बहुमूल्यं समयं प्रदाय राष्ट्रनायकैः सम्मेलनमिदमुद्घाटितम्, तथा विद्वद्वर्गस्य साधुसमुदायस्य च यातायातार्थं विशेषव्यवस्थापूर्वकं राजकीयविमानसेवासौविध्यं चार्पितमित्येतो विद्वत्सम्मेलनस्योद्देश्यं सहस्रं कार्याण्यपि विहाय साधनीयं नितान्तमपेक्षितमत्यावश्यकञ्चेति विषयाणां वेदनं राष्ट्रनायकैः स्पष्टीकृतमुपलभ्यते। तथैव राष्ट्रनायकैर्विहितात्सारगर्भिताद्भाषणादपि महत्त्वपूर्णेषु बहुषु विषयेषु विस्मयकारीणि वेदनानि प्राप्तानि सन्ति। अस्य समुद्घाटनभाषणस्यैकैकेन पदेन तलस्पर्शिन्य उत्कृष्टा भावनाः सृष्टाः सन्ति चिरप्रसुप्तंचार्यसन्ततिहृदयं कार्योन्मुखीकर्तुं प्रत्युद्बोधितमस्ति। यदि सत्यमेव कथ्यते तदैकस्माद् हिन्दुसमाजः सकाशादात्मनः संस्कृतिं प्रति तथा तदाधारभूतं संस्कृतवाङ्मयं प्रति च सर्वोच्चकोटिकीं श्रद्धां तादृशीमेवास्थां वा व्यक्तीकर्त्तुमेतेभ्योऽधिकोपयुक्ता पदावली न लभ्यत इति भणितुं शक्यते।

ज्ञानविज्ञानयोः समन्वयपूर्वकमध्यनाध्यापनानुसन्धानानां क्रमं संचाल्याधुनिकसामाजिकजनजीवनेऽन्तःप्रविश्यैवार्यसंकृतेर्गौरवं संस्कृतवाङ्मयप्रौढिं च रक्षितुं समर्थान् चरित्रवतोऽनुशासितान् राष्ट्रियताभक्तान् स्नातकान्निष्पादयितुं शक्तेन संस्कृतविश्वविद्यालयेन भवितव्यमिति राष्ट्रनायकस्य सदिच्छा सारांशतोऽनेन सम्बोधनभाषणेनाभिव्यक्ता प्राप्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञानविज्ञान-समन्वयः

ज्ञानविज्ञानयोर्भेदको 'वि' शब्द एवास्ते। विशिष्टं ज्ञानं विज्ञानमिति व्युत्पत्त्या विशिष्टार्थको विशब्दो ज्ञायते। ज्ञानं स्वभावतो निराकारं भवति, निराकारं ज्ञानं कार्यरूपे परिणमय्य साकारीकरणमेवात्र वैशिष्ट्यम्। एतदाशयेनैवाचार्य उदयन उक्तवान् 'अर्थेनैव विशेषो हि निराकारतया धियाम्'। एतावतैतत्सिद्धं भवति कार्यरूपे परिणमितं ज्ञानमेव विज्ञानं भवतीति। ज्ञानं हि कार्यरूपेऽपरिणमितं भाररूपं भवति। 'ज्ञानं भारः क्रियां विना'। ज्ञानं कार्यरूपे परिणमयितुं शक्त एव पुरुषो विद्वान्भवति। 'यस्तु क्रियावान् पुरुषः स विद्वान्'। निराकारज्ञानं कार्यरूपे परिणमय्य साकारीकरणमेव ज्ञानविज्ञानसमन्वयो भण्यते।

आर्याणां समस्ताः शिक्षा ज्ञानविज्ञानसमन्वयपद्धत्यैव सञ्चाल्यन्ते स्म। तत एव चाचार्यद्रोणस्येदं गर्जनमासीत् 'अग्रतश्चतुरो वेदान्पृष्ठतः सशरं धनुः। इदं ब्राह्ममिदं क्षात्रं शापादपि शरादपि'। प्राच्यविज्ञानं हि दिव्यदृष्टिसम्पन्नानां दयामयमहर्षीणां तपःपरिपूते मस्तिष्के आविर्भूतत्वादनेककल्पपर्यन्तं प्रयुज्य परिशोधितत्वाच्च तलस्पर्शि परिपक्वं पूर्णं च विद्यते। आधुनिकं विज्ञानं तु अद्याप्यभ्यासावस्थायामेव सत्त्वात्पूर्णं नास्ति विकलमेव वर्तते। दशवर्षपूर्वमेकस्मिन्सिद्धान्ते स्थिरीकृत्य प्रयुज्यमानमाधुनिकविज्ञानं गुणदोषयोर्निकषोपले सम्यगवतरितुमशक्तमद्य सिद्धान्तान्तरे परिणम्यत इति न तिरोहितम्। प्राच्यं विज्ञानं कतिपयादर्वाचीनसमयाद्विरलं प्रयुज्यमानमपि पूर्णरूपेणाव्यवहृतत्वादस्तव्यस्तायां सङ्कीर्ण-प्रकीर्णायाञ्चावस्थायामवश्यमस्ति।

अद्य स्वकीयपद्धतेरव्यवहृतत्वादेवाङ्गलशिक्षां विना चिकित्सकेन (डाक्तर) स्थपतिना (इञ्जीनियर) वा भवितुं न शक्यत इति भ्रमोऽस्मासु पदमाधत्ते। एतदर्थमस्माभिर्विश्वस्य पर्यटकानामाकर्ष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णस्य केन्द्रबिन्दूभूतानि आङ्गलभाषानभिज्ञैरेव स्थपतिभिर्निर्मितानि प्राचीनमठमन्दिराणि चक्षुषाऽवलोक्यानि। परिशुद्धायाः परिपूर्णायाश्च स्वपद्धत्या अनुसन्धानं परिशीलनं च कृत्वा व्यवहर्तव्यमस्ति। अपेक्षितमावश्यकं चांशमेवाधुनिकविज्ञानत आदाय समय-साधन-शक्तीनां राष्ट्रियमपव्ययं रोद्धुं स्वभाषायामनूद्य प्रयोक्तव्यमस्ति। अन्यथा ज्ञानविज्ञानसमन्वयं वाञ्छन्त आधुनिकविज्ञानस्य चाकचैक्ये रञ्जिताः स्वस्यास्तित्वमपि अपहार्यं 'वृद्धिमिच्छतो मूलमपि नष्टम्' इत्युपहासस्य पात्रतामापन्ना भवेम। अतः प्रस्तावितसंस्कृतविश्वविद्यालयेनैतस्मिन्विषये सम्यग्विचार्य पादश्चालनीयः।

अद्यास्माकं देशे प्रचलिताधुनिकी शिक्षापद्धतिः प्रतिवेशिनि भारते ब्रिटिशै राजनीतिकविजयानन्तरं धार्मिकसांस्कृतिकविजयस्य दुरभिसन्धितः सज्जीकृत्य शराग्निनागभूमितात् १८३५ ईशवीयवर्षात्प्रारब्धास्ति। अत्र पद्धतौ धार्मिकसांस्कृतिकविद्रोहक्षमं विषं पूर्णतया सम्मेलितमस्ति। अत एवाद्य संस्कृतमङ्गरेजीं च पठतोरेकस्यैव गृहस्य द्वयोर्भ्रात्रोरपि परस्परं मेलनं नास्ति। एको धत्! नास्तिक! उच्छृङ्खल! इति वदति चेदन्यो धत्! रूढिवादिन्! कूपमण्डूक! इति वदितुमारभत एव। एकस्मिन् गृहे स्थित्वैकस्यामेव स्थाल्यां भुक्त्वा स्कन्धे स्कन्धं मेलयित्वा कार्यं कृत्वा प्रगतिकरणसमये द्वयोर्भ्रात्रोः स्फोटनेनानेन महती राष्ट्रिया क्षतिरतिरोहिता विद्यते। अतः संस्कृतशिक्षायां साम्प्रतिकसामाजिकजनजीवनोपयोगिनः कतिपयानावश्यकविषयान्समावेश्य अङ्गरेजीशिक्षायां चारम्भादेव संस्कृतमनिवार्यं विधाय प्रत्येकमेम् ए० परीक्षासु सुयोग्यपण्डितद्वारा मनुयाज्ञवल्क्यग्रन्थानामनिवार्यरूपेण विधिवदध्यापनव्यवस्थापूर्वकं धार्मिकसांस्कृतिकचेतनां जागरूकां रक्षित्वा संस्कृतमङ्गरेजीं च पठतोर्भ्रात्रोर्मध्ये स्थितं गर्तं पूरयित्वा द्वौ भ्रातरावेकस्मिन्नेव स्थाने संस्थाप्य कार्यं विधेयम्। तत एव ज्ञानविज्ञानसमन्वयार्थं बलवती पृष्ठभूमिः संपन्ना भवेत्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संस्कृतविश्वविद्यालयस्यावश्यकता

संविधानेनैवात्मानमार्यसंस्कृतेरनुयायिं हिन्दुधर्मावलम्बनं हिन्दुराष्ट्रं घोषयित्वा गौरवानुभवकर्त्तुर्नेपालसदृशाद्देशादद्यतनेन हिन्दुजगता हिन्दुत्वस्य पूर्णं संरक्षणं संवर्धनं चाशास्यते । आत्मनः सांस्कृतिकीं परम्परां विस्मृत्य किमपि राष्ट्रं कापि जातिर्वा जीवितुं न शक्नोति । अत्यन्त-वेगेन भौतिके प्रवाहे वहदद्यतनजनमनः समृद्धिशालिनोऽतीतस्य गौरवमयं ज्ञानराशिम्, 'वसुधैव कुटुम्बकम्, स्वदेशो भुवनत्रयेम्' इत्याद्युदात्तभावनां च बोधयित्वा 'तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद् धनम्' । 'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः ।' इत्याध्यात्मिकसिद्धान्ते प्रवर्त्य हिन्दूपरम्परां संस्कृतिं च संरक्षितुं संस्कृतविश्वविद्यालयपरिचालनादृते नान्यत्साधनं दृश्यते ।

युगस्य परिस्थितेश्चापेक्षां बुद्धा राष्ट्रस्यानुकूलं चरित्रं निर्मातुं निर्मापयितुं च प्रवृत्तेन राजवंशेन प्रत्यक्षतो धार्मिकं सांस्कृतिकं च नेतृत्वं प्रदत्तमित्येष विषयो न तिरोहित इतिहासे । राज्ञो जनकस्यैवाश्रये राज्यविज्ञानस्य विदेहज्ञानस्य च समन्वयोऽभूत् । अस्माकमेव नेपालजनन्या वरिष्ठपुत्रः सिद्धार्थो धार्मिकं सांस्कृतिकं च नेतृत्वं यदि नादास्यत् तदा बुद्धधर्मः संसारेऽमरो नाभविष्यत्, पालीसाहित्यं च राज्याश्रयं यदि न प्राप्स्यत् तदाऽन्ताराष्ट्रियख्यातिं नालप्स्येत । राज्ञो महावीरस्य नेतृत्वे जैनधर्मः सम्राजोऽशोकस्य नेतृत्वे बौद्धधर्मः संस्कृतिश्च यदि राजप्रश्रयं नालप्स्यतां तदा पुष्टतया विकासं नालप्स्यताम् ।

तदर्थं विभिन्नराजनीतिक-वादानालिङ्गतो वर्तमानविश्वस्य मध्ये स्वीयजलवायुमृत्तिकाशोभनीयां स्वसंस्कृतिपरम्परानुरूपां राजतन्त्रात्मकपञ्चायत्तपद्धतिमस्माकं देश आश्लिष्यतीत्येतच्छु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भावसरेऽस्माकं देशे संस्कृतशिक्षायै राज्याश्रयप्रदानं युक्तिसङ्गतं दृश्यते । संस्कृतं विस्मृत्य संस्कृतिसंरक्षणं न संभवतीति निर्विकल्पम् ।

संस्कृतशिक्षा चान्यविद्यालयैरेव सम्यग् दातुं न शक्येति विविक्तेन विशिष्टेन च संस्कृतविश्वविद्यालयेन भाव्यमेव । अद्य लुप्त-गुप्त-नष्ट-भ्रष्टावस्थायामपि प्रकाशिता अप्रकाशिताश्च संस्कृतग्रन्था लक्षशः सन्ति । सर्वे च ते ग्रन्थाःकस्या अप्यन्यस्या भाषाया अनूदिता न भूत्वा मौलिका एव संस्कृते सन्ति ।

तेषु केचिदिमे—ऋग्यजुःसामाथर्वाणो वेदाः । एकविंशतिधा बाहवृच्यम् । एकशतमध्वर्यु शाखाः । सहस्रवर्त्मा सामवेदः । नवधार्थर्वणो वेदः । शतशो भागेषु विभक्ता आयुर्धनुर्गान्धर्वस्थापत्याख्या उपवेदाः । शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्यौतिषमिति षड्वेदाङ्गानि । चतुष्षष्टिकोटिप्रमाण आगमः । गौतमस्य कणादस्य कपिलस्य पतञ्जलेः । व्यासस्य जैमिनेश्चापि दर्शनानि षडेव हि । इति षड्दर्शनानि । बौद्ध-जैन-चार्वाकादीनि षडुपदर्शनानि । उपनिषदः शतशः । मनुयाज्ञवल्क्य-शुक्र-गार्ग्यायण-गौतमात्रि-हारीतापस्तम्ब-शंख-लिखित नारद-पराशरादिकृता अष्टादश स्मृतयो धर्मशास्त्राणि । अमरसिंहादिकृता अष्टादशाधिकाः कोषाः । अष्टादश पुराणानि, तथा तदधिकान्युपपुराणानि । रामायण-महाभारत-हिमवत्खण्डादय इतिहासाः । गद्य-पद्य-चम्पू-प्रमुखतया सहस्रधा विभक्तं श्रव्यम्, आख्यानाख्यायिका-प्रहसन-भाण-सट्टक-लटकमेलक-प्रहेलिका-प्रभृतिरूपेण सहस्रधा विभक्तं दृश्यं च काव्य-नाटकादिकम् । चतुष्षष्टिः कलाः । नल-भीमादिकृतानि पाकशास्त्राणि । मार्कण्डेयविभाण्डकदुर्वासोलोमश-वामदेवशुकमत्स्येन्द्रगोरक्ष-प्रमुख-लिखितानि कुण्डलिनी-क्रियायोग-शास्त्राणि । रावण-महीधरोवट-सायण-भर्तृहरि-प्रभृतिभणितानि वेदादिभाष्याणि । कौटलीयादीन्यर्थशास्त्राणि । वात्स्यायनादिकृतानि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कामशास्त्राणि । भरतादिभणितानि नाट्यशास्त्राणि । मम्मट-दण्डि-विश्वनाथ-जगन्नाथादिकथितानि काव्यनाटकादिलक्षणशास्त्राणि । गुणाढ्यबाणसुबन्धुविष्णुशर्मप्रधानकथिता बृहत्कथाकथासरित्सागर-कादम्बरी-वासवदत्तापञ्चतन्त्र-हितोपदेशादयः कथाः । भास-कालीदास-माघ-हर्ष-प्रभृतिकृतानि महाकाव्यानि । हनुमद्बालबाल्मी-किशक्तिबल्लभादिकृतानि महानाटकानि । माहेश्वर-पाणिनीयादीनि नव व्याकरणानि, याज्ञवल्क्य-नारद-पाणिन्यादिकृताः १८ शिक्षाः । नीतिशतकदृष्टान्तशतकादीनि नीतिशास्त्राणि । स्वरशास्त्रं, सामुद्रिकशास्त्रं शकुनशास्त्रं, प्राणिशास्त्रं, वनस्पतिशास्त्रं, शालिहोत्र-गजहोत्रशास्त्रं, रत्नपरीक्षणशास्त्रं, भूगर्भशास्त्रं, कृषिपाशुपाल्यशास्त्रं, उद्यानशास्त्रं, विश्वकर्मशिल्पशास्त्रं, भूगोलशास्त्रं, राजशास्त्रं, मन्त्र-शास्त्रं, यन्त्रशास्त्रं वाणिज्यशास्त्रं, सङ्गीतशास्त्रं चान्यच्चानन्तमिति लक्षशः ।

अस्यागाधस्यातलस्पर्शस्य संस्कृतवाङ्मयस्य सङ्कलनसंशोधन-सम्पादन-संवर्धनानुसन्धानानुवादाशिक्षण - प्रशिक्षण - परीक्षणप्रमुख-निखिल-कर्म-करणार्थमेकः स्वतन्त्र एकः संस्कृतविश्वविद्यालयोऽ निवार्यतयापेक्षितोऽस्ति ।

अन्यश्च विचारणीयो विषय एष यदुपर्युक्तानां विषयाणां सम्यग्ज्ञातारो विद्वांसः प्रतिदिनं सङ्ख्यया न्यूनतामापद्यन्ते । अद्यावधि जीवितविद्वद्वर्गे निगूढोऽसौ ज्ञानविज्ञानराशिरचिरादेवागामिन्यां सन्ततौ यदि न सारयितुं शक्यते, तदा पश्चात्तेषां विषयाणां सामान्यतया ज्ञातारोऽपि नोपलप्स्यन्ते । तानखिलान् रत्नभूतान् ग्रन्थान् नदीप्रवाहेषु प्रवाहयितुं स्थितिरुपस्थिता भवित्रीति पूर्वजैर-नवरतप्रयासेनापरिमितसमयपर्यन्तं समुपार्जितं ज्ञानं लोपमवाप्स्यति । अतः उपर्युक्तेन कारणकलापेन देशेऽस्मिन् विशेषप्रकारेण संस्कृतशिक्षाप्रदमेकमात्मन एव मातृसंस्थानं विश्वविद्यालयोऽ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तीवावश्यको वर्तते। कस्याप्येकस्य साधारणस्य विषयस्य कृतेऽपि पृथग् विश्वविद्यालया यदि स्थाप्यन्ते, तदाऽनन्तज्ञानपुञ्जीभूतस्य संस्कृतवाङ्मयस्य लोकोपयोगिकल्याणकारिकरणे संस्कृतविश्वविद्यालयस्यावश्यकतायां सन्देहप्रकटनं नितान्तदुःखदायिविषयो भविष्यति। अद्य देशेनात्यन्तावश्यकरूपेणानुभूयमानानां निम्नाङ्कितानां विषयाणां पूर्त्तये समयेन संस्कृतविश्वविद्यालयस्याह्वानं कृतमस्तिः—

१. राष्ट्रियतायै राष्ट्रियाकाङ्क्षापूर्त्तये राष्ट्रसंरक्षणाय च।
२. अस्माकं मौलिक-संस्कृति-धर्म - नीति - रीति - परम्परा-संरक्षण-संवर्धनादिकृते।
३. वैदिकाध्यात्मिक-ज्ञान-विज्ञान-परिशीलन-प्रयोग-कृते।
४. प्राचीनार्वाचीनयोर्ज्ञान-विज्ञानयोस्तुलनात्मकाध्ययनद्वारा लाभान्वितये।
५. राष्ट्रियकलानां विकासार्थम्।
६. राष्ट्रियचरित्रनिर्माणाय।
७. अन्ताराष्ट्रियसद्व्यवहारशान्तिमैत्रीबन्धुत्वविकासनार्थम्।
८. हिन्दुजगति धार्मिकं सांस्कृतिकं चैकतासूत्रं दृढं कर्तुम्।
९. राजमुकुटं प्रत्यास्थामक्षुण्णां रक्षितुम्।

सम्भावना

उपर्युक्तकारणैः संस्कृतविश्वविद्यालयस्यावश्यकत्वे दृष्टेऽपि नेपालेषु संस्कृतविश्वविद्यालयस्य सञ्चालनमुचितं नवेति विचार्यमाणे विश्वस्यैकमात्रे हिन्दूराष्ट्रे नेपाले संस्कृतविश्वविद्यालयान्तरस्याभावादत्र चानेकेषां महाविद्यालय-प्रधानपाठशाला-माध्यमिकपाठशाला-प्रारम्भिकपाठशालादीनां प्रचलतां संचालनायापि संस्कृतविश्वविद्यालयस्यैकस्य स्थापनाया औचित्येन कोऽपि सन्देहः। विद्यार्थिनो विनीता सुशीलान्सदाचारान् प्रबुद्धान्कर्मठांश्च विधातुं शिक्षायाः सामान्यतो लक्षमस्ति। एतस्य पूर्ति प्रचलितशिक्षापद्धत्या प्राप्तुमशक्तः समाजः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वमूलवत्मैंव नुकिं विस्मरिष्यतीति शङ्कया राष्ट्रस्य कर्णधारा नितान्तं चिन्तिता वर्तन्ते । तदर्थमुक्तदोषेभ्यः समाजं रक्षित्वाऽनुशासितं संयमिनं च विधातुं समर्थायाःशिक्षायाः सञ्चालने संस्कृतविश्वविद्यालये प्रभवति विद्यार्थिनस्तेषामभिभावकाः संस्कृतशिक्षामेव शिक्षयिष्यन्तीति शनैरत्र विद्यार्थिनां सङ्ख्या वृद्धिमापद्येत । परम्परात एव स्वगृहमेव गुरुकुलं मत्वा संस्कृतशिक्षां गृह्णन्तो लक्षशः परिवाराणां विद्यार्थिनोऽस्माकं विश्वविद्यालयस्य पूरकाणि अङ्गानि भवेयुः ।

अस्माकं शिक्षितसमाजे संस्कृतज्ञसङ्ख्यापि नितरामधिकास्ति यया संस्कृतं पाठयतामध्यापकानां प्रयोजनं पूर्येत । हिन्दूराष्ट्रे प्राचीननवीनयोर्ज्ञान-विज्ञानयोः समन्वयपूर्विकायाः शिक्षाप्रदानपरिपाट्याः स्थापनेऽन्ताराष्ट्रियजगतोऽप्यत्र विद्यार्थिनः पठितुमागच्छेयुः, यतः 'एतद्देशप्रसूतस्य सकाशादग्रजन्मनः । स्वं स्वं चरित्रं शिक्षेरन्पृथिव्यां सर्वमानवाः' इति मनूक्तिश्चरितार्था भवेत् । अस्मत्समाजे संस्कृतं प्रत्यास्थाद्यापि नलुप्ता । अनेन संस्कृतविश्वविद्यालयेन हिन्दूसंस्कृत्यनुरूपाया उपयोगिन्याः शिक्षायाः सञ्चालने कृते देशविदेशानां सहृदयव्यक्तिभ्यः संस्थाभ्यश्च विभिन्ना आवश्यकाः सहायता उपलभ्येरन् । संस्कृतविश्वविद्यालयं सञ्चालयितुं कतिपयानां निःस्पृहसेवोत्सुकानां जनानामावश्यकं भवति आस्तिक्येन सेवाभावेन वा तत्कर्म विनैव वेतनं कर्तुं तत्पराणां जनानां पूरणं देशीयमवश्यं करिष्यति ।

विभिन्नव्यावहारिककारणवशाज्जनतामहाविद्यालयस्य मुख्यसम्पत्तेर्देवखुरीस्थिताया द्वादशशतवर्गपरिमिताया भूमेरपेक्षितमायं कर्तुमशक्तत्वेऽपि तस्याः शनैः सुव्यवस्था विधीयमानास्तीति संस्कृतविश्वविद्यालयसम्बन्धिनं व्ययं वोढुं ततो महत्साहाय्यं भविष्यति ।

संस्कृतविश्वविद्याभवनं छात्रावासांश्च निर्मातुं जनतामहाविद्यालयस्याधिकारे वर्तमानाया भूमेर्बहु प्रयोजनं सेत्स्यति अपर्याप्तत्वे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समीपे पर्याप्ता भूमिः प्राप्तुं शक्येत। जनतामहाविद्यालयच्छात्रा-प्र० वि० विद्यालयस्य प्रारम्भिकाधारीभवितुं शक्नुयुः, बहुभिः सहृदयैर्जनैरन्यानि भवनानि निर्मातुमाश्वासनमपि प्रदत्तमस्ति।

उपर्युक्तकारणैः सह दार्ङ्गस्य वायुर्जलं च समशीतोष्णं स्वास्थ्य-करञ्चास्ति। अत्र ग्रीष्मतौंप्रस्वेदो न जायते व्यजनं च नापेक्षते, शीततौंचाधिकं जाड्यं भवति। अत्र विद्यार्थिनो द्वादशमासानपि श्रमपूर्वकं पठितुं शक्नुवन्ति। अन्नजातञ्चात्र नेपालस्यान्यैण्डला-पेक्षया प्रशस्तं भवति। स्थानमिदं पौराडम्बरेण विदेशप्रभावेण चास्पृष्टमस्ति। सर्वैरेभिः कारणैस्र सुनियोजितया सुव्यवस्थितया च शैल्या संस्कृतविश्वविद्यालयेन सञ्चलितुं शक्यमिति सम्भाव्यते।

उद्देश्यम्

मानव-विकास-द्योतकाद् वैदिकादेव कालादस्माकमेव शैल्या चिरकालपर्यन्तं चलदागतं, मध्य ऐतिहासिकघटनाक्रमेण विशृङ्ख-लतां गतं पाठ्यक्रमं सुधार्य पूर्ववज् ज्ञान-विज्ञानयोः समन्वयं कृत्वा-ध्यात्मिक-भौतिकोन्नत्योः सहसत्तां स्थायिनीं रक्षितुं क्रियाशीलशिक्षां प्रदाय विश्वात्मदर्शिनां सबलानामनुशासनशीलानामादर्शानां स्नातकानां सम्पादनमस्य संस्कृतविश्वविद्यालयस्य मूलमुद्देश्यमस्ति।

हिन्दुराष्ट्रे नेपाले हिन्दुसंस्कृतेर्मूलस्रोतसः संस्कृतवाङ्मयस्यो-पेक्षया राष्ट्राभिमानिनां हृदये जाताघातवार्ता स्वाभिमानिबुद्धिजी-विनामनुभूतविषयोऽस्ति। राष्ट्रनायकस्य नेतृत्वे शिक्षाक्षेत्रे समागताया अभूतपूर्वक्रान्तेः स्वीकारोऽद्यतनान्ववायेन सविनयं क्रियते। अतः संस्कृत-संस्कृत्यनुरागिणो राज्ञ उदारे नेतृत्वे संस्कृत-क्षेत्रस्यापि विकाससम्भावनाः परिपोषमायान्त्यो दृष्ट्वा संस्कृतज्ञाः सोत्साहं बद्धकक्षा उत्थिताः सन्ति। स्वकीयसमस्तसेवाश्चयाः समर्पितुं निर्धार्य वर्तन्ते। संस्कृतभाषाया गहनतां महत्तां मधुरतां ज्ञानगाम्भीर्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च यद्यपि संसारः स्वीकरोति तथापि एनांलोकोपयोगिनि कल्याण-कारिणि च मार्गे प्रशस्तीकर्तुमशक्तो नेति वक्तुं न शक्यते । तदर्थं संस्कृतस्य राष्ट्रियसंस्कृतेश्च संरक्षणं संवर्धनं च कृत्वा जीवनोपयोगिनि लोककल्याणकारिणि च मार्गे प्रवृत्ताः प्रबुद्धा राष्ट्रहिताश्चरित्रशालि-नोयोग्याःस्नातका निष्पन्ना भवेयुरित्युद्देश्येन प्रतीकरूपेणोदारेण प्राचीनार्वाचीनपाठचक्रमेणाचारसंहितया नूतनया परीक्षाशैल्या समाजसेवया चेत्यादिकार्यक्रमैरावश्यकसाधनसम्पन्नः संस्कृत-विश्वविद्यालय उपस्थातुमीहते ।

शिक्षानीतिः

अत्र शिक्षानीतिरुदारा भविष्यति । अन्यभाषाः प्रत्यपि मैत्री सद्भावश्च क्रियेत सापत्नव्यवहारश्च बहिष्क्रियेत । शासनस्य मान्यताया आधारेण संस्कृतशिक्षार्थिनो भाषान्तरशिक्षां प्राप्तुं शक्ष्यन्ति भाषान्तरशिक्षार्थिनां कृते च सामाञ्जस्येन संस्कृतविश्वविद्यालये प्रवेष्टुं शक्या व्यवस्था भविष्यति। एतदर्थं नेपालीहिन्द्याङ्ग्लादिभाषा-न्तरशिक्षासु प्रारम्भादुच्चकक्षापर्यन्तं संस्कृतशिक्षाऽनिवार्या इत्थमेव संस्कृतशिक्षायाः पाठयक्रमेऽपि यथायोग्यं हिन्द्यादिसमावेशोऽपेक्षितः ।

आचारसंहिता

राष्ट्रियसंस्कृत्यनुकूलमाचारं निर्मातुं शिक्षकाणां शिक्षार्थिनां पदाधिकारिणां सञ्चालकानां च कृत आचारसंहितैका निर्मीयेत या निश्चितेनैकेन नियमेन परिचालिता भविष्यति । आचारसम्बन्धिनो विषयाः परीक्षासु समावेश्याः आचारविषये न्यूनाङ्कभाजा परीक्षार्थिनोपाधिं प्राप्तुमशक्या व्यवस्था विधातव्या ।

अनुशासनम्

संपूर्णे संस्कृतविश्वविद्यालयपरिवारे सौमनस्यमेकतां बन्धुताञ्चा-नेतुं तथाधुनिकविद्यालयेषु व्याप्तं प्रच्छन्नमसन्तोषं निवारयितुं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संस्थासु पूर्णमनुशासनं प्राप्तुं सामूहिकप्रयासस्य सम्बद्धपञ्चकृतनिर्णयस्यापेक्षिततयोक्तलक्षपूर्त्यै विश्वविद्यालयस्य पदाधिकारिणामध्यापकानां च्छात्राणां च पूर्णप्रातिनिध्यं वहदेकं विश्वविद्यालयपञ्चायतं कुलगुरोरध्यक्षतायां भविष्यति यत्संस्थागतेन परिवारेण निर्वाच्येत ।

नाम

अस्य नाम महेन्द्रवीरविक्रमसाहदेवसंस्कृतविश्वविद्यालयं इति भविष्यति, संक्षिप्तं नाम म० सं० वि० वि० इति भविष्यति ।

स्वरूपम्

आर्थिकस्थितौ दृष्टिकोणं स्थापयित्वा प्रारम्भेऽस्य रूपं स्वल्पं स्वच्छं प्रभावकारि च भविष्यति । प्राच्यप्रचलितसंस्कृतसाहित्यदर्शनादिविषया यथासम्भवं समावेश्येरन्, अन्येभाषायाः साहित्यानि दर्शनानि च तुलनात्मकाध्ययनाय यथासाध्यं संस्थाप्येरन् । अद्यतनार्थिकयुगेऽर्थकारिण्या विद्यायाः स्वाभाविकमाकर्षणं विचार्य देशस्यासंख्यातानां दिव्यौषधीसञ्जीवनीनाञ्चोपयोगस्यात्यावश्यैकतामनुभूयास्मिन्संस्कृत विश्वविद्यालये विशेषविभागरूपेण प्राचीनाधुनिकविषयसमाविष्टा ऽऽयुर्वेदशिक्षा प्रभावकारिणी विधीयेत ।

प्रशासनम्

संस्कृतविश्वविद्यालयस्य प्रशासने परिचालने च सुदृढस्य सङ्घटनस्यावश्यकं भावि, यत्र कर्तव्यस्याधिकारस्य च स्पष्टं विभाजनं शासनेन (श्रीपञ्चकस्य सर्वकारेण) संस्कृतविश्वविद्यालयविधेयकद्वारा क्रियेत । यथावश्यकं विधीयमानं परिवर्तनं संस्कृतविश्वविद्यालयपञ्चायतस्य परामर्शदातृसमितेश्च सहयोगेन कुलगुरुसम्मत्या कुलपतिः करिष्यति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पदक्रमः

कुलपतिः प्राचीनपरिपाट्यामपि राज्येव विश्वविद्यालयस्य गुरुकुलस्य च सम्बन्धि प्रत्यक्षमुत्तरदायित्वमर्पितं प्राप्यत इत्ययं संस्कृतविश्वविद्यालयः कुलपतिपदं श्रीपञ्चमहाराजाधिराजेभ्यः समर्पयिष्यति, कुलपतिरेव च संस्कृतस्य चतुरस्रं विद्वांसमाचारनिष्ठमनुशासनकुशलं कुलगुरुं नियोक्ष्यति ।

कुलगुरुः विश्वविद्यालयस्यास्य प्रधानसञ्चालकः कुलगुरुरेव स्यात्, कुलगुरवे परामर्शं दातुमेका परामर्शदात्री समितिः सङ्घटिता भवेत्। यत्र विभिन्ना विभागाध्यक्षाः, पञ्चायतस्य, दातृवर्गस्य, शिक्षामन्त्रालयस्य, शिक्षाविशेषज्ञानां, समाजसेवकानां, स्थानीयशासनस्य च प्रतिनिधयः समावेश्येरन् ।

कुलसचिवः कुलसचिवः कुलगुरुसम्मत्या संस्कृतविश्वविद्यालयस्य चलाचलसम्पत्तेरार्जनं संरक्षणं सम्बर्धनं साधारणं प्रशासनं नियुक्तीः परीक्षादिकञ्च सञ्चालयिष्यति ।

निदेशकः निदेशकोऽध्यापनविभागं पुस्तकालयमनुसन्धनशाखां प्रयोगशालां छात्रावासादिकं च निरीक्ष्य संचालयिष्यति ।

छात्रसम्पत्तिः

संस्कृतविश्वविद्यालये छात्राणां सङ्ख्या पर्याप्तमात्रया प्राप्तुं संस्कृतमयवातावरणमावश्यकं भवति । एतदर्थं संस्कृतज्ञानां जीविकाक्षेत्रं विस्तृतं कर्तव्यम् । संस्कृतोपाधिप्राथम्येन लोकसेवाऽऽयोगतो विज्ञापनानि प्रकाश्यानि । सरल-सरस-संस्कृतभाषायामाकाशवाणीतः समाचारप्रसारणस्य व्यवस्था विधेया । प्रतिग्रामपञ्चायतमेका प्रारम्भिकसंस्कृतपाठशाला प्रतिमण्डलमेका संस्कृतप्रधानपाठशाला, प्रत्यञ्चलञ्चैकः संस्कृतमहाविद्यालयं आवश्यको भवति । प्रतिग्रामपञ्चायतं विशिष्टदेवमन्दिरेषु च सुयोग्यसंस्कृतपण्डितद्वारा कथायाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रवचनस्य च प्रबन्धः कर्तव्यः। इत्थं संस्कृतमये वातावरणे समुपयुक्ते सति आर्यसंस्कृतेर्गौरवमक्षुण्णं भविष्यति आर्यसन्ततिश्चान्यधर्मावलम्बनं न करिष्यति।

ब्रह्मचर्याश्रमः

संस्कृतविश्वविद्यालयस्याङ्गेषु मध्य एको ब्रह्मचर्याश्रमोऽपि प्रथमं प्रयोगात्मकरूपेण चालयिष्यते। अयं विविक्तस्थले पृथक् स्थापयिष्यते अत्र विद्यार्थिनामध्यापकानां कर्मचारिणाञ्चैकत्र भोजनादिकं भविष्यति। ब्रह्मचर्याश्रमस्य सर्वमपि कार्यजातं कुलगुरुसरक्षणे निर्दिष्टदिनचर्यानुसारतः सम्पाद्येत।

ईश्वरदेशनरेशगुरुमातापित्रादिमान्यजनेषु प्रेमभक्तिश्रद्धात्मकभावनाभावितान् सुशीलान्कर्मठान्विनयिनश्च बालकान्निर्मातुं तदनुसारं लघुनिबन्धमयपुस्तकानि सम्पाद्य विद्यार्थिभिर्ग्रहीतुं धारयितुञ्च शक्यमेव पाठयित्वा साधारणेन शास्त्रीयज्ञानेन सह क्रियात्मकं व्यावहारिकज्ञानमपि प्रदीयेत। प्रारम्भिकपरीक्षामुत्तीर्णाश्छात्रा अत्र प्रविश्य वर्षपञ्चकपर्यन्तमधीत्य पूर्वमध्यमास्तरीयां गुरुकुलपरीक्षामुत्तीर्यान्यविद्यालयेषु गन्तुमनुमता भवेयुः। आश्रमस्यास्य कृते पृथगाचारसंहिता निर्मीयेत, यस्याः पालनमत्रत्यानां समेषां कृतेऽनिवार्यं भवेत्।

आचारसंहितायां च प्रातरुत्थानकालतः सायं शयनसमयपर्यन्तं निम्नप्रकारेण कर्तव्यसमावेशो भवेत्।

प्रातः ब्राह्मे मुहूर्ते समुत्थानं, प्रातःस्मरणं मेधासूक्तादिपाठश्चदिवाधीतपाठाभ्यासः, शौचस्नानादिकं, सन्ध्यावन्दनं, समिदाधानं, वैदिकराष्ट्रियप्रार्थना, देवदेशिकदर्शनम्, आसनव्यायामाभ्यामः, धारोष्णदुग्धपानं यथालाभं कल्याशनं वा, स्वाध्यायः, सात्त्विकं भोजनम्, लेखाभ्यासः, इतिहासभूगोलदर्शनाङ्गपाहित्यपठतम् प्रयोगरूपीद्यानकृषिशिक्षा, गोसेवा, अनुकूला क्रीडा।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साथम्:–ययर्तु शौचस्नानसन्ध्यादिकम्, समिदाधानम्, देवदेशिकवन्दनम्, लघुसात्त्विभोजनम्, पाठाभ्यासः, दुग्धपानम्, गणोपस्थितिः, रात्रिसूक्तपाठः, शयनम्।

सर्वा अपि एताश्चर्या गुरुनिर्देशानुसारं घटिकासङ्केतेन भविष्यन्ति। धूमपान-कषायपानादि व्यसनं सर्वेषां सर्वथा निषिद्धं भवेत्। सर्वोऽपि व्यवहारो यथासाध्यं संस्कृतमाध्यमेनैव निर्वाह्यः। वर्षपञ्चकपर्यन्तमाश्रमवासोऽनिवार्यः परमत्याहिते कार्ये समापतिते कुलगुरुसमादेशात्सावधिकोऽवकाशो ग्रहीतुं शक्येत। अवकाशदिनेषु वनभ्रमणं वस्त्रधावनमाश्रमोद्यानगोशालादिसंस्कारः सभोपस्थितिश्चानिवार्याः। ग्रीष्मावकाशः शीतावकाशो वाऽत्र नभावी। अत्र सर्वमपि धार्मिकं कार्यजातं समन्त्रकं भविष्यति। सप्तवर्षोत्तरं द्वादशवर्षावधि बटूनां प्रवेशः स्यात्। अनुपनीतानामुपनयनमाश्रम एव भविष्यति। अत्र द्विजबटूनामेव प्रवेशो भवेत्। प्रारम्भेऽत्र पञ्चविंशतिर्ब्रह्मचारिणः प्रवेशं लभेरन् ये संस्कृतविश्वविद्यालयतोऽभिभाविता वेयुः। तदधिकाः प्रवेशकामाः स्वीयव्ययसहिता यथालाभं प्रवेशं प्राप्स्यन्ति। विश्वविद्यालयीयानां प्राध्यापकानां कर्मचारिणां च कुमाराः कुलगुरुसम्मत्या ब्रह्मचर्याश्रमवाससौविध्यं लभेरन्।

नारीशिक्षा

आर्यजातेरितिहासे सांस्कृतिकसुरक्षाकार्ये नारीभिर्महदुत्तरदायित्वं निर्व्यूढम्। परिस्थितिवशात्पुरुषेषु सांस्कृतिकसङ्कटे पतितेषु आर्यवीराङ्गनाभिरेव कृतानि सांस्कृतिकसुरक्षाकार्याणि बहूनि प्रागैतिहासिकतथ्यैः प्रमाणीक्रियन्ते, वर्तमानसमयेऽपि चार्यसंस्कृतिसंरक्षणं विशेषतो नारीसमाजादेव जातमस्ति। अतो नारीणां कृते संस्कृतशिक्षायाः प्रबन्धोऽत्यावश्यकः। नारीषु संस्कृतेन शिक्षितासु तत्सन्ततिभिः संस्कृतभाषा मातृभाषात्वेन व्यवहर्तुमपि शक्येत। परं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सहशिक्षा बहुवैगुण्यादनभिमतेति समुचितस्थले विश्वविद्यालयशाखारूपः महिलामहाविद्यालयः पृथक् स्थापनीयः यत्र यथासम्भवं शिक्षणकार्यं नारीभिरेव क्रियेत। यत्र मध्यमापर्यन्तं पाठ्यविषयेवैशिष्टयं निम्नप्रकारेण कर्तव्यम्।

१ कौमारभृत्यम् २ गृहशिल्पविज्ञानम् ३ नलभीमादिरचितं पाकशास्त्रम् ४ कुटीरोद्योगः, ५ धर्मशास्त्राणि ज्यौतिषं पुराणं च (अपेक्षितमात्रया) ६ सतीचरित्राणि ७ कोशव्याकरणादिकम् ८ इतिहासभूगोल-गणितादिकम् ९ नीतिशास्त्रञ्चेति।

संस्कृतविश्वविद्यालयस्य प्रारम्भिकं रूपम्

विश्वविद्यालयपदेनैवास्य स्वरूपं नितान्तं विस्तृतं प्रतीयते। स्वीयसंस्कृत्या सार्द्धं सम्बद्धानां साङ्गानां सरहस्यानां समस्तानां विद्यानां विधिवदुपदेशस्य व्यवस्थया सह देशकालपरिस्थित्यनुसारमावश्यकापेक्षितान्यान्यसंस्कृतिसम्वद्धविद्यानामप्यध्ययनप्रबन्धो यथासम्भवं विधेयोऽस्मिन्। तदनुसारं प्राचीनाविष्काराणामन्वेषणपूर्वकम्पुनरुज्जीवनमाधुनिकाविष्काराणाञ्च सङ्कलनं विश्वविकासस्य, विश्वशान्तेर्विश्वकल्याणस्य च लक्ष्याणां रक्षणमुद्दिश्य विधातव्ये। प्रारम्भे बहुव्ययसाध्या विशाला आविष्काराः कर्तुमशक्यास्तथापि लघूनां जीवनोपयोगिवस्तूनामुत्पादनन्कृत्वा शनैः शनैः राष्ट्रमात्मनिर्भरं विधातुं लक्ष्यमवलम्ब्य प्रवृत्ता वयमपि विकसितराष्ट्राणां तुलनायां नूनमनूनाः स्याम।

अद्यापेक्षया २०।२५ वर्षेभ्यः पूर्वमस्माकं राष्ट्रस्याधिको भागो बहुषु विषयेषु स्वावलम्बः स्थितः। परंत्वद्य विलासितायां लग्नाः वयं शनैः शनैः परमुखप्रेक्षिणो भवन्त एव वर्तामहे। कार्पासस्योर्णायाश्च समुत्पादनं स्वयं विधाय निर्वाहङ्कुर्वन्त्यो मगरी-ज्यापुनी-लिम्बुनी-गुरुङ्-से-थरूनीप्रभृतयो ललना अपि सम्प्रति नाइलोनशाटीम्परिद-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धानाः पराधीना जायमाना दृश्यन्त एव। रूसाद्दुग्धच्चीनात् सितां समानाय्य कषायतृष्णानिर्वापणप्रवृत्तिरस्माकं जायत एव। इत्थङ्क्रमशः पराधीनतां लभमाना वयमचिरादेव स्वकीयमस्तित्वं विगमयितुं प्रवणायां परिस्थितौ पतिष्यामः।

अतस्तामपाकर्तुमयं संस्कृतविश्वविद्यालयः संस्कृतवाङ्मयस्य विशिष्टाध्ययनाध्यापनमननपूर्वकं प्राचीनप्रौढ़िरक्षणपुरःसरं राष्ट्रं स्वावलम्बं विधातं प्राविधिकीं व्यावसायिकींच शिक्षां रचनात्मकरूपेण दातुमपि यथासम्भवं प्रयतिष्यते।

१ पाठ्यक्रमः

साम्प्रतिकसंस्कृतसमाजः संस्कृतमात्रस्यैकांङ्गिना रूपेण लोकजीवनव्यवहारोपयोगिनीं शिक्षां समाजे दातुं सम्भवतो न शक्येत इत्याशङ्कामवगच्छति। अनुरूपेण ज्ञानविज्ञानसमन्वयेन प्राचीनेतिहासस्य परम्परायाश्चाधारशिलां स्थिरीकृत्याधुनिकव्यावहारिककर्मचरित्रयोः कथमावश्यकः सुधारःकार्यः? इति युगस्य वेदनां हृदयतो जानाति कीदृशरूपे परिणम्यमानेऽयं (सुधारः) देशोचितो भवितुं शक्नोति? इतीमां राष्ट्रियामुत्कण्ठां बुध्यते च।

अस्माभिस्तथ्यमिदमद्यैवावगतमिति न किन्त्वस्माकं पूर्वजैरपि तथ्यमिदं ज्ञातमासीत्। पुराणमित्येव न साधु सर्वं न चापि काव्यं नवमित्यवद्यम् इति वैचारिकी क्रान्तिः क्रान्तदर्शिभिर्मनीषियुवकैरुपक्रान्तासीत्। तथापि आर्यसंस्कृतेरुपरि वैदेशिकसांस्कृतिकाक्रमणकाले भोगवादिनि रङ्गे रञ्जितेन पतनोन्मुखेन समाजेन क्रान्तिकारिणी स्वीया परम्परा रक्षितुं न शक्ता। शासनस्य विना वैदेशिकसंरक्षणं सांस्कृतिकविजयवाहिनीं प्रतिकर्तुमशक्ता तूष्णीं पश्चात्स्थितेते ऐतिहासिकतथ्यःसूच्यते। अस्माकं धर्मशास्त्राणां कांश्चिदंशान्भाषान्तरे पठित्वा न्यायाधीशोऽपराधनियन्त्रणे स्वात्मानं सफलं मन्यते चेत्, तर्कशास्त्रस्य काश्चिन्नगण्याः प्रक्रिया भाषान्तरेऽधीत्य वाक्कीला

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्यायमञ्चे तर्कं दातुं प्रभवन्ति चेत्, अस्माकं समस्तानि दर्शनशास्त्राणि विश्वस्याधुनिकदर्शनानि प्रतिस्पर्धयितुं पर्याप्तानि सन्ति चेत्, गीता चास्माकमाधुनिके जगति लोभेन लालसया च पठ्यते चेत् अस्माकं निराशीभावे न कापि वार्तास्ति । नवयं रिक्ताः स्मो न वा निःस्वाः । किमर्थमस्माभिः कस्यापि मुखं प्रेक्ष्येम् इत्यात्मविश्वासेन संस्कृतजगति जागरितव्येम् । ततश्च तातस्य कूपोऽयमिति वदद्भिर्हठधर्मिभिः सह योद्धुं शक्तव्यम् ।

मनुष्यो विवेकशीलः प्राणीति तस्य विवेकस्य स्रोतांसि उद्गमक्षेत्राणि च भाषाः साहित्यानि च भवन्ति अतो भाषायाः साहित्यस्य च समृद्धस्रोतस उद्गमस्थानरूपेण संस्कृतभाषा साहित्यं वास्तीत्यैकमत्येन संसारः स्वीकरोति । साहित्यस्यास्य चिरगुञ्जनस्यामरस्वादः सर्वैर्ग्रहीतुमिष्यत इति सर्वतो महत्वपूर्णवार्ताऽस्माभिरवगताऽऽस्ते ।

ह्यस्तनः संसार एकस्या जातेरेकभाषाभाषिणां वाऽऽसीच्चेत् आधुनिकश्चन्द्रयुगी विश्वसमाज एकस्या जातेरेकभाषाभाषिणां वा नास्ति । ततश्च संस्कृतभाषायाः संस्कृतसाहित्यस्य वा मर्मणोऽनभिज्ञाः केचनयदि विरोधं कुर्वन्ति नैतदस्वाभाविकमिति वक्तुं विवशताऽस्त्येव । विरोधमेनमार्षग्रन्थानां विश्वश्रेष्ठस्य मूलभाषासु विशालतया व्यापकतया चानुवादं कारयित्वा सारांशं निष्कास्य श्रावयितुं शिक्षयितुञ्चावश्यकमस्ति न तु नास्तिकतैतदिति कथनमेव ।

तथैव च संसारे चेतनायां ज्ञानिपिपासाशमने चास्माकं पूर्वजानां मनीषिणां पर्याप्तं योगदानमासीत् तथापि संसारस्येतराभिर्विभूतिभिरपि ज्ञानविज्ञानपिपासापूरणायात्मोत्सर्गः कृतोऽस्ति । ताभिः स्वयमन्विष्टाः प्राप्ताश्च विषयाः स्वस्वभाषासु न्यस्ताः सन्ति । एतां विचारचर्चामन्वेषणं वा अनुवादद्वारा संस्कृतजगद्बोधयितुं साम्प्रतिकसंस्कृतसन्ततेः कर्तव्यं भवति अस्मिन्नेव विचारसंदर्भे राष्ट्रस्योत्कण्ठां बुद्ध्वाऽऽर्यसंस्कृतेर्हिन्दूराष्ट्रस्य वा प्रतीके नेपालाधिराज्ये संस्कृत-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जगत आदर्शस्य परम्पराया वा प्रतीकं संस्कृतविश्वविद्यालयं हिन्दू-जगद्दिदृक्षतीति च स्पष्टतया जानीमः।

प्रारम्भे साधनस्यार्थस्य वाभावेन कतिपयकारणवशाल्लक्ष-प्राप्तेरनुरूपं विश्वविद्यालयस्य स्वरूपं प्रकारं वा प्रस्तोतुं न शक्ता अपि वयं तदैवात्मनः सफलानज्जानीमो यदा वयमस्यां लक्षितायां दिश्यग्रे प्रवर्तमाना भवामः।

अतः संस्कृतं प्रत्युपेक्षया पूर्णे वातावरणेऽस्मिन्वयमसाध्याः साडम्बराश्च योजनाः प्रभावकारिण्यो न भविष्यन्तीत्याशङ्कायां विश्वविद्यालयस्य पाठ्यक्रमेण सम्बन्धिनी सामान्या योजना प्रस्तुतास्ति।

पाठ्यक्रमसम्बन्धिनी रूपरेखा विषयदिग्दर्शनञ्च समस्ता विद्या उपविद्याश्च निम्ननिर्दिष्टेषु चतुःसङ्घायेषु विभक्ताः सन्ति।

१ आन्वीक्षिकी २ त्रयी ३ वार्ता ४ दण्डनीतिः

आन्वीक्षिकीसङ्घाये निम्नलिखिता विभागाः स्युः—

न्यायवैशेषिकसाङ्ख्ययोगबौद्धजैनन्यायागमचार्वाकरसेश्वरमनो-विज्ञानविभागाः।

त्रयीसङ्घाये—

वेदव्याकरणमीमांसावेदान्तधर्मशास्त्रज्यौतिषसाहित्येतिहासपुरा-णायुर्वेदशिक्षाविभागाः।

वार्तासङ्घाये—

वाणिज्यस्थापत्ययन्त्रभूगर्भप्राणिवनस्पतिकृषिरसायनस्वराष्ट्रभाषा-राष्ट्रान्तरभाषाचित्रकलाशास्त्रविभागाः।

दण्डनीतिसङ्घाये—

अर्थविधियुद्धनीतिपञ्चायतराजनीतिपत्रकारिताशास्त्रविभागाः।

उपर्युक्तविभागेषु मध्ये प्रारम्भे निम्नप्रकारेण विभागाश्चाल-यिष्यन्ते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आन्वीक्षिक्याम्—

न्यायवैशेषिकसाङ्ख्ययोगागमबौद्धजैनन्यायविभागाः ।

त्रय्याम्—

वेदव्याकरणज्यौतिषसहित्यायुर्वेदेतिहासपुराणधर्मशास्त्रवेदान्त - विभागाः ।

वार्तायाम्—

स्थापत्यभूगर्भवनस्पतिकृषिचित्रकलाविभागाः ।

दण्डनीतौ—

अर्थविधिपञ्चायतराजनीतिशास्त्रविभागाः ।

प्रवेशिकामारभ्यैव संस्कृतमनिवार्य्यं विधाय ज्ञानविज्ञानसमन्वय-सिद्धान्ताधारे पत्रमेकं व्यावसायिकमप्यनिवार्य्यङ्करिष्यते । वर्तमान-पाठ्यग्रन्थावल्यामावश्यकपरिवर्तनपरिवर्द्धने विधाय ज्ञानविज्ञा-नयोः समन्वयङ्कर्तुं विशिष्टानामनुभविनां विदुषामेकां समितिं सङ्घटय्य तन्निर्णयानुसारं क्रमशः स पाठ्यक्रमः प्रवर्तयिष्यते ।

२—अध्यापनम्

अस्य संस्कृतविश्वविद्यालयस्याध्यापनं प्रारम्भे निम्नाङ्कितनिकाय-चतुष्टयद्वारा चालयिष्यते:—

१. ब्रह्मचर्य्याश्रमः, (पञ्चवर्षपर्यन्तं पूर्वमध्यमास्तरस्य)

२. प्रधानपाठशाला (प्रवेशिका-प्रथमा-पूर्वमध्यमानाम्)

३. महाविद्यालयः (उत्तरमध्यमा-शास्त्र्याचार्य्याणाम्)

४. प्रशिक्षणमहाविद्यालयः (प्रवेशिकामारभ्याचार्य्यपर्यन्तस्य)

चतुर्णामपि निकायानामध्यापनं यथासाध्यं संस्कृतभाषामाध्यमेनैव विधास्यते ।

संस्कृतभाषायां प्राप्तुमशक्यान् विषयान् प्रारम्भेऽन्यभाषापुस्त-कान्यवलोक्य शिक्षकाः संस्कृतमाध्यमेनैव पाठयिष्यन्ति । शनैस्शनैः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ते विषयाः अनुवादविभागद्वारा संस्कृते आनेयाः। आध्यात्मिकविश्वास-विकासाभ्यां साद्धं भौतिकी समुन्नतिरपि अध्यापनस्य मुख्यं लक्ष्यं भविष्यति।

३—अनुसन्धानम्

सर्वप्रथमं राष्ट्रे अद्यत्वे निर्विकल्परूपेण सञ्चलन्त्या राजतन्त्रात्मिकायाः पञ्चायतप्रजातन्त्रव्यवस्थाया आधारभूतपञ्चायतदर्शनस्यानुसन्धानं प्राचीनराजशास्त्राधारेण कारयित्वा पञ्चायत्तदर्शनं विशुद्धम्परिष्कृतञ्च विधास्यते। नेपालस्य विभिन्नपुरातात्त्विकसामग्रीणामाधारे नेपालस्य विशुद्धेतिहासस्य संस्कृतेश्च वास्तविकं स्वरूपमनुसन्धाय प्रकाशयिष्यते। देशमात्मनिर्भरं निर्मातुमुपयुक्तानां विभिन्नकलाकौशलानामायुर्वेदादीनाञ्चानुसन्धानं विधाय कार्यान्वयनं करिष्यते, क्रमशश्च आधुनिकविज्ञानमपि स्वानुरूपं परिमणमय्य प्रयुज्यमानायाः पद्धतेर्गवेषणाङ्करिष्यते संस्कृतवाङ्मये प्रकीर्णा विषया उपयोगानुसारं सङ्कलयिष्यन्ते च।

प्रतिभाचारनिष्ठां राष्ट्रियभावनां क्रियाशीलताञ्च विचार्य्य विषयानुसारं लेखात्मिका मौखिक्यः प्रायोगिक्यश्च परीक्षा निष्पक्षया विशुद्धया च पद्धत्या पाक्षिक-मासिक - षाण्मासिक-वार्षिकरूपैः सञ्चाल्य अन्यैर्विश्वविद्यालयैः सह सम्पर्कं स्थापयित्वा मान्यताञ्च प्रापय्य स्नातकानां जीविकाक्षेत्रं विस्तृतं विधातुं समुचितमुदाहरणं प्रस्तोतुञ्च सर्वदा ध्यानं दीयेत।

परीक्षाश्च प्रारम्भे प्रचलितस्वरूपेष्वेव प्रवेशिकाप्रथमापूर्वमध्यमोत्तरमध्यमा शास्त्र्याचार्यभेदैः षट्सु श्रेणिषु विभाज्येरन्।

आन्वीक्षिकी त्रपी-सङ्कायथोः शास्त्रिपरीक्षायामुत्तरमध्यमोत्तीर्णा एव छात्राः प्रविष्टा भविष्यन्ति। वार्ता-दण्डनीति-सङ्कायथोः। शास्त्रिपरीक्षायान्तु संस्कृतमाश्रित्य आइ. ए० परीक्षामुत्तीर्णा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपि छात्राः प्रवेश्येरन् । इत्थमेवान्वीक्षिकीत्रयीसङ्कायशास्त्रिणः स्वविषये आचार्यकक्षायां प्रवेशं लमेरन्, संस्कृतमाश्रित्य वी०ए० परीक्षामुतीर्णाश्च वार्तादण्डनीतिसङ्काययोः स्वविषये आचार्य कक्षायां प्रवेश्येरन् ।

५ अनुवादपरिषद्

अस्मिन् संस्कृतविश्वविद्यालये संस्कृतभाषायां व्युत्पन्नानामन्यभाषाभिज्ञानां विदुषामेकाऽनुवादपरिषत् सङ्घटिता भविष्यति परिषदानया विभिन्नभाषाशास्त्रिणां सहयोगं प्राप्य अन्यभांषायाः उपयोगिन आवश्यकाश्च विषयाः सरलसंस्कृतेऽनूद्येरन् ।

६. वैतनिकपदाधिकारिणः सहायकाश्च

१. कुलगुरुः	१	**४. महाविद्यालये**	
निजसचिवः	१	सङ्कायप्रमुखाः	४
धावकः	१	(क) श्रेण्यां प्राध्यापकाः	४
	३	(ख) श्रेण्यां प्राध्यापकाः	५
२. कुलसचिवः	१	(ग) श्रेण्यां प्राध्यापकाः	६
सहायक कुलसचिवः	१	कार्यालयप्रमुखः	१
कार्यालयप्रमुखः	१	लिपिकः	१
लिपिकः	१	धावकौ	२
धावकौ	२		२३
	६	**५. प्रधानपाठशालायाम्**	
३. निदेशकः	१	अध्यापकाः	४
निजसचिवः	१	सहायकाः	३
धावकः	१	लिपिकः	१
	३	धावकः	१
			९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६. ब्रह्मचर्याश्रमे

अध्यापकौ	२
परिचारकौ	२

७. अनुसन्धानविभागे

निर्देशकः	१
सहायकौ	२
लिपिकः	१
धावकौ	२
	६

८. परीक्षा-विभागे

प्रबन्धकः	१
सहायकः	१
लिपिकौ	२
धावकौ	२
	६

९. लेखापरीक्षाविभागेः

लेखापरीक्षकः	१
सहायकः	१
लिपिकः	१
धावकः	१
	४

१०. पुस्तकालये

ग्रन्थागाराधिकृतः	१
लिपिकः	१
धावकौ	२
	४

११. प्रशिक्षणमहाविद्यालये

सङ्कायप्रमुखाः	४
(महाविद्यालयीया एव)	
(क) श्रेणिप्राध्यापकाः	४
(ख) श्रेणिप्राध्यापकाः	५
लिपिकः	१
धावकः	१
	१५

१२. भोजनालये

प्रधानपाचकः	१
सहायकाः	३
परिचारकाः	४
	८

१३. रसायन-शालायाम्

निर्देशकः	१
सहायकः	१
परिचारकाः	६
	८

१४. व्यायामविभागे

व्यायामपट्टः	१
सहयोगी	१
	२

७. वेतन-क्रमः

अत्र वैतनिकक्रमस्त्रिभुवनविश्वविद्यालयेवद्ययासम्भवं भवेत् । परिस्थित्यनुसारं न्यूनाधिकभावोऽपि सम्भवेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८. प्रारम्भिको व्ययः

कलौ धनस्योपयोगो भवनसज्जायामेव न तु दानधर्मादौ, बुद्धेश्चोपयोगो धनार्जन एव न तु स्वर्गापवर्गसाधनादावित्याशयेन महर्षिभिः प्रोक्तासु 'गृहान्ता द्रव्यसंभारा द्रव्यान्ता मतिरेव च' इत्यादिमहावाणीषु दृष्टिं संरक्ष्य भवनाडम्बरेण कलिरावाहितोमा भूदित्यत्यावश्यकपुस्तकालयादिकृत एव भवनानि निर्माय शेषं कार्यजातं कुटीरेष्वेव सम्पादनीयमित्येष सिद्धान्तोऽत्र विश्वविद्यालये प्रतिपाल्येत । अतस्तदनुसारं प्रारम्भिकव्ययस्याकलनमधस्तान्निर्दिश्यते ।

छात्रवृत्त्यर्थं कर्मचारिणां वेतनार्थञ्च वार्षिको व्ययः—४०००००)

(भवनानि)	
पुस्तकालयकृते	१०००००
कार्यालयकृते	५००००
औषधालयकृते	२५०००
भोजनालयकृते	५००००
(कुटीराणि)	
अध्यापनशालार्थम्	५००००
शिक्षकनिवासार्थम्	५००००
छात्रावासार्थम्	१०००००
अधिकारिनिवासार्थम्	३००००
अतिथिनिवासार्थम्	२००००
ब्रह्मचर्याश्रमार्थम्	२५०००
परिचारकावासार्थम्	१००००
आतुरालयं निर्मातुम्	२५०००
मुद्रणालयं निर्मातुम्	२००००
मुद्रायन्त्रं क्रेतुम्	४००००
पुस्तकानि सङ्ग्रहीतुम्	५००००
आतुरालये शय्यादिव्यवस्थायै	२५०००
आवश्यकान्योपकरणार्थम्	३००००
	११,०००००

४००००० ७०००००)

आवर्तकः 'सालवसाली') (अनावर्तकः 'पटके')

११०००००)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीं ॥

विदुषां सम्मतयः

विवेकपूतमनसां विदुषामधिकारिणाम् ।
सधन्यवादं दर्श्यन्ते शुभाः सम्मतयः सताम् ॥

महामहोपाध्याय-सर्वतन्त्र स्वतन्त्र-पद्मविभूषणानां
श्री गोपीनाथकविराजमहाशयानाम्—

2 (A) SIGRA VARANASI
3-9-1961

Mahamahopadhyaya
GOPINATH KAVIRAJ, M. A. D. LITT
Padmavibhushana

प्रथितयशसा महामहिम्ना नेपालनरेशेन महाराजमहेन्द्रेण स्वदेशे संस्कृत-विश्वविद्यालयनाम्ना कस्य चिद्विद्याभवनस्य स्थापनार्थं श्लाघनीयः प्रयत्नो विहितः । विद्याभवनमिदं हिमवत्प्रान्ते बहिर्मुखजनताकोलाहलमुखरनगरेभ्यो बहिःप्रदेशे कस्मिंश्चित् शान्ते रमणीये च स्थाने प्रतिष्ठितं भविष्यतीति सर्वथा युक्तमेव । वार्तामिमामासाद्य नितरां प्रसीदति मे चेतः । प्राधान्येन प्राचीनाया भारतीयसंस्कृतेः समुद्धरणाय तस्याः संरक्षणाय च श्लाघनीयोऽयमुद्यमः । अस्या महनीयायाः सुप्राचीनायाः संस्कृतेर्विस्तारक्रमो देवभाषायामेव निबद्धेषु श्रुति-स्मृत्याद्यगणितशास्त्रेषु काव्यदर्शनेतिहासपुराणादिषु तन्त्रकलाविद्याप्रतिपादक-ग्रन्थेषु च सम्यगुपलभ्यते । अस्याः संस्कृतेर्विभिन्नानामङ्गानां तथा कालोपयोगि-नीनां विविधविद्याकलानां च विकासः, नेपालदेशे संरक्षितविविधप्राचीन-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्रन्थानां (विशेषत आगमानाम्) प्रकाशनञ्चास्य विद्याभवनस्य मुख्यध्येयेष्वन्तर्भवतु। प्राचीनभारतस्याध्यात्मसम्पद्जिज्ञासमानाय प्रतीच्यायाकण्ठं देया, तथा च प्राचीननवीनयोः समन्वयोऽपि विधेयः। अद्यत्वे सर्वत्र समाजे परिवारे विद्यालयादिषु च यदनाचार-नीतिभ्रंश-व्यवस्थाशैथिल्यादिकं दृश्यते तत्सर्वं विद्यार्थिषु शीलसंपत्तिमनोनिग्रहादीनामसद्भावं सूचयति। वस्तुतो विद्यार्थिन एव ब्रह्मचर्यपूतचरित्रेण तथा निष्कामविश्वकल्याणव्रतचर्यया च विशुद्धजीवनस्यादर्शभूता भवितुमर्हन्ति। श्रीमतो नेपालनरेशस्य प्रशंसनीयोऽयमुद्यमो विद्यार्थिभिः स्वकृत्येन स्वाचारेण स्वजीवनेन च सफलीकरणीयः।

अभिनवं विद्याभवनमिदं विश्वकल्याणं विदधानं चिरंजीवतु इति श्रीपशुपतिनाथं सप्रश्रयमभ्यर्थये।

गोपीनाथ कविराजः
(देव शर्मा)

वाराणसेयसंस्कृतविश्वविद्यालयोपकुलपतीनां
श्रीमतां डा० गौरीनाथशास्त्रिमहाभागानाम्

वाराणसेयसंस्कृतविश्वविद्यालयः
वाराणसी २.
२४।३।१९६९

नेपालाधीश्वरेण श्रीमता महेन्द्रवीरविक्रमसाहदेवेन महताऽऽग्रहेण कञ्चन संस्कृतविश्वविद्यालयं नेपालान्तर्गतदाङ्ग्प्रदेशे प्रतिष्ठापयितुं प्रयास आस्थीयत इति श्रुत्वा नितरां प्रसीदति मे मनः।

स्वर्गं गतवता श्री लालबहादुरशास्त्रिमहोदयेन कदाचिदिदमुक्तमासीत्-भारतस्य समुन्नतये प्रतिप्रदेशमेकः संस्कृतविश्वविद्यालयो यथा निर्मितो भवति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदर्थं भारतस्य केन्द्रीयसर्वकारेण सुतरां प्रयतिष्यत इति। परं तस्य महाशयस्य सङ्कल्पो न सफलतां यातः। अविमुक्तवाराणसीक्षेत्रे एक एव संस्कृतविश्वविद्यालयोऽधुना विराजते, यस्य रूपं सर्वभारतीयमपि प्रान्तीयतां बिभर्ति। द्वितीयः संस्कृतविश्वविद्यालयो विहारप्रदेशे यो वर्तते तत्राध्यापनादि कार्यं शोधकार्यञ्च न प्रचलतीति कृत्वा तस्य रूपमपूर्णमिव प्रतिभाति। अतो नेपालाधीश्वरेण यत्सङ्कल्पितं तन्नूनं सर्वेषामेव गीर्वाणवाणीपरिशीलनपराणामानन्दकरम्।

यस्मिन्प्रान्ते पुनरस्य विश्वविद्यालयस्य संस्थापनं चिकीर्ष्यते तदपि स्थानं निसर्गसुन्दरं विद्यार्थिनां तथाऽध्यापकानां कृते सुतरामुपयोगि। अस्मिन्कर्मणि ये तावत्संस्कृतविद्याप्रणयिनः सोत्साहा वर्तन्ते तैर्यदि सम्यग्विचिन्त्य संस्कृतशिक्षाविस्तारानुगुणा पद्धतिराश्रीयेत तर्हि नूनं तेषां प्रयत्नः क्षेमाय कल्पिष्यत इति नास्ति तत्र कश्चन शङ्कावसरः।

अध्यापकानां विरलभावोऽस्माभिर्विशेषेण साम्प्रतमनुभूयते, योग्यानामध्यापकानां सम्प्रदायो यथा सुस्थितो भवेत्तदर्थं विशेषेण दृष्टिर्निक्षेपणीया। योग्यानामध्यापकानामभावेन विद्यायाः प्रचारः प्रसारश्च व्याहतो भवति। एवं सत्याग्रहवतामन्तेवासिनामपि मनसि खेदो जायते। खिन्नैरन्तेवासिभिः कथं वा गृहीतविद्यायाः संरक्षणं क्रियेत ?

शोधकार्यमपि यदिदानीं कुत्र कुत्र प्रचलति तदपि न पर्याप्तं मन्तव्यम्। एतत्तु कदापि न विस्मर्तव्यं यदस्मद्देशीया मनीषिणः स्वीयेषु ग्रन्थेषु यादृशं पाण्डित्यं प्रकटितवन्तस्तन्नूनं शोधकार्यत्वेन स्वीकर्तुमभिनन्दयितुं च निराबाधं शक्यते।

यथा तथा वा भवतु। संस्कृतविश्वविद्यालयस्य स्थापनेन समाजस्य महानुपकारः साधितो भविष्यतीत्यनुभवन् श्रीविश्वेश्वरचरणयोः सर्वतोभावेन प्रार्थयतेऽयञ्जनो यत्स परमकारुणिकः कल्याणमयः पुरुषोऽस्मिन्कर्मणि सर्वविघ्नोपशान्तिं कुर्यादिति।

निवेदनं श्री गौरीनाथशास्त्रिणः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संस्कृतविश्वविद्यालयस्य दाङ्गे समुद्घाटचमानस्य प्रतिवेदनसमितये

नेपालराजकीयसंस्कृतमहाविद्यालयस्य भूतपूर्वप्रधानाचार्याणां गोरखादक्षिण-बाहुन्यायाचार्यन्यायरत्नानां त्रिभुवनविश्वविद्यालयीयसंस्कृतविभागस्य धर्मरक्षा-महामण्डलनेपालस्य काशीस्थविद्याधर्मप्रचारिणीसमितेर्बृहदाध्यात्मिकपरिषदश्च भूतपूर्वाध्यक्षाणां द्वासप्ततिवर्षवयस्कानां **श्रीपण्डितपद्मप्रसादभट्टराईमहोदयानां** सम्मतिः।

महानयं हर्षस्य विषयो रुग्णशय्यायां शयानस्य अपि मम कृते यत्किल दाङ्गे संस्कृतविश्वविद्यालयः स्थाप्यते। अन्वर्थनामा च भविष्यतीत्यस्माकं विश्वासः।

पाठ्यक्रमे च आगमविषयो देशेऽस्माकं प्रधानविषयो भवतु। शिवधर्म-शास्त्रादिकं प्रचारे अनुसन्धाने अध्यापने च उपयुज्यताम्। अत्रत्याश्छात्रा अधीतिबोधाऽऽचरणप्रचारणेषु असाधारणा भवेयुः। सचिवालयविज्ञानमपि सानुसन्धानमध्यापनीयम्। देशानुरूपं कुटीरोद्योगमपि अध्यापयन्तु। नारी-शिक्षा अनिवार्या परं सहशिक्षा मा भूत्। स्नातकानां विद्यावैशद्येन सार्ध-माचारनिष्ठा आवश्यकी। आरम्भादेव धर्मशास्त्रं सक्रियं शिक्षणीयम्। स्नातका अनुशासनशीला राष्ट्रियभावनासम्पन्ना आर्यसंस्कृतिसंरक्षणशीलाश्च संस्कृत-विश्वविद्यालयान्निर्गच्छन्तु। विश्वविद्यालयस्य सर्वोऽपि व्यवहारः संस्कृतभाषायां भवतु इति।

आचार्याणामाज्ञानुसारेण लिपिकृन्नव्यन्यायाचार्यो मुकुन्दनाथशर्मा भट्टराई वाल्मीकिसंस्कृतमहाविद्यालयस्य प्राध्यापकः।

वि० सं० २०२५ फाल्गुनशुक्लतृतीयायां सौम्यवासरे अंशुवर्मधारा विशालनगरं काष्ठमण्डपम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काष्ठमण्डपस्थ-वाल्मीकि-संस्कृतमहाविद्यालीय प्रधानाचार्य
श्रीरामनाथाचार्याणां प्राध्यापकश्रीशेषराजशर्मणश्च

२०२५।१।२०

श्रीः

अयि महोदयाः

श्रीमद्भिः २०२४।१२।१६।२ समये प्रहितं पत्रमासादितं तत्रत्यो विषयश्चाधिगतः। प्रस्तावितसंस्कृतविश्वविद्यालयस्वरूपादिविषये केचित्स्वाभिमतविषया अधस्तात्प्रदर्श्यन्ते।

संस्कृतविश्वविद्यालये पाठ्यविषये

'अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः। धर्मशास्त्रं पुराणं च विद्या ह्येताश्चतुर्दश। आयुर्वेदो धनुर्वेदो गान्धर्वश्चेति ते त्रयः। अर्थशास्त्रं चतुर्थं तु विद्या ह्यष्टादशैव तु, इति विष्णुपुराणमतमनुसृत्य शिक्षादीनि षड् वेदाङ्गानि, तत्र शिक्षाध्यापने ध्वनिशास्त्रस्य तुलनात्मकरूपेणाध्यापनम्, एवं व्याकरणस्य निरुक्तस्य वाध्यापने भाषाविज्ञानस्य तुलनात्मकपद्धत्याऽध्यापनं कर्तव्यम्। तथैव ज्यौतिषशास्त्राध्यापनेप्याधुनिकगणितादिविषयाणामपि तुलनात्मकप्रणाल्याऽध्यापनमपेक्षितम्। चत्वारो वेदाः। मीमांसापदेन पूर्वमीमांसा (जैमिनीया) उत्तरमीमांसा (वैयासकी) चेति द्वयम्। न्यायविस्तरपदेन प्रमाणैरर्थपरीक्षणं न्यायः इति नयेन न्यायवैशेषिके, साङ्ख्ययोगौ, शैवदर्शनानि वैष्णवदर्शनानि च गृह्यन्ते। एवं च पूर्वपक्षरूपेण चार्वाक-बौद्ध-जैनदर्शनानि, पाश्चात्त्यन्यायो यूरोपीयदर्शनानि च तुलनात्मकपद्धत्याध्यापनार्थं ग्रहीतुं शक्यन्ते। धर्मशास्त्रपदेन मन्वादीनि धर्मशास्त्राणि, आपस्तम्ब-बौधायनादिधर्मसूत्राणि च गृह्यन्ते। तुलनात्मकपद्धत्याध्यापनार्थं जैन-बौद्धधर्माः, भारतीया आधुनिकधर्माः, यहूदी-पारसीक-कन्फ्युसियस-क्रिश्चियस-मुस्लिमप्रभृतिधर्माश्च सामान्यरूपेण ग्राह्याः। एवं च धर्मशास्त्रस्य व्यवहारभागे आधुनिकव्यवहारशास्त्रस्य च दिग्दर्शनमपेक्षितम्। पुराणपदे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिहासस्याप्यन्तर्भावः। एवं च पुराणपदेन ब्राह्मादीन्यष्टादश पुराणानि, पाराशरादीन्युपपुराणानि, महाभारतं, रामायणं, नीलमतपुराणं, राजतरङ्गिणी च गृह्यन्ते। इत्थमेवाधुनिकेतिहासाश्च तुलनात्मकपद्धत्याध्यापनीयाः। आयुर्वेदपदेनाष्टाङ्गा आयुर्वेदास्तथाधुनिकपाश्चात्त्यचिकित्साशास्त्राणि च दिग्दर्शनरूपेण ग्राह्याणि। गान्धर्ववेद एव सङ्गीतशास्त्रस्यान्तर्भावः। तत्र च नारदीयशिक्षा, भारतीयं नाट्यशास्त्रं च प्राधान्येन पाठ्ये। अर्थशास्त्रस्य विषयाः प्रकीर्णरूपेण रामायणे, महाभारते, मन्वादिस्मृतिषु, बार्हस्पत्यार्थशास्त्रे, शुक्रनीत्यादिषु च प्राप्यन्ते। अर्थशास्त्रस्याधुनिको मूलग्रन्थः कौटलीयमर्थशास्त्रं तत्सारभूतः कामन्दकीयनीतिसारोऽपि वर्तते। आर्यसम्प्रदायेऽर्थशास्त्र एव राजशास्त्रस्याप्यन्तर्भावः। एवं च पाश्चात्त्यार्थशास्त्रस्य राजशास्त्रस्य तुलनात्मकरूपेणाध्यापनमपेक्षितम्। कुत्र चित्त्वर्थशास्त्रस्थाने तन्त्रशास्त्रस्योपादानं, तस्यापि वेदवत्प्रामाण्याच्छिष्टपरिग्रहाच्च स्वतन्त्ररूपेणाध्यापनं कर्तव्यम्। तथा चैतासु विद्यासु सति संभवे उपयुक्तकलानाञ्च सैद्धान्तिकं प्रायोगिकं चाध्यापनं क्रमाद्विधातव्यमेव। विज्ञानविषये भारद्वाजसंहिता समराङ्गणसूत्रधारो युक्तिकल्पतरुः इत्यादीनां ग्रन्थानामधिकारिभिर्विद्वद्भिरध्यापनमुपक्रमणीयम्। प्राचीनशास्त्रमर्यादासंरक्षणपूर्वकमाधुनिकविषयाणामुपयुक्तः प्रक्षेपः कर्तव्यः।

भूमिदातृभिर्महोदयैः संरक्षितविद्यासु निरतिशयप्रेम्णः प्रदर्शितत्वात्तदिच्छामनुसृत्य पश्चादन्येषामप्युपयुक्तकार्याणां सम्भावनया, अभीप्सितपदार्थानां सौलभ्याद्, वैषयिकजनानाकीर्णत्वाच्च स्थानमेतद् विश्वविद्यालयस्योपयुक्ततरं विमृश्यते।

अथावशिष्टं समारोहे प्रबन्धविषये च स्वाभिमतप्रकाशनम्-तत्रास्माकं वक्तव्यमिदमेवास्ते यदल्पसमये स्तोकसाहाय्यलब्धावपि सुरभारतीपरिचरणपरायणैस्तत्र भवद्भिः श्रीमद्भिर्नानास्थानसमागतानां विपश्चितां यदातिथेयं समनुष्ठितम्, तदतीव श्लाघास्पदमिति सञ्चिन्त्य वितीर्यन्ते बहुशः साधुवादाः।

सत्यामावश्यकतायां पाठ्यविषये विस्तृता योजनापि प्रस्तोष्यते। अथेदमपि प्राप्तकालत्वात्समुल्लिख्यते यद्विश्वविद्यालयस्य च्छात्रसङ्ख्याप्रपूर्त्यर्थं प्राथमिक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पाठशाला-माध्यमिकपाठशाला-माध्यमिकविद्यालयोच्चविद्यालय-महाविद्यालयादीनां स्थाने स्थाने संस्थापनं कार्यम्, नो चेच्छात्रोद्गमस्थानसङ्कोचाद्विश्वविद्यालयस्य स्वरूपलाभ एव न स्यात्, तदर्थमपि प्रयतनीयमिति निवेद्य साम्प्रतमेतावदेव विरम्यत इति शिवम्।

भवदीयौ

रामनाथ आचार्यः प्रधानाचार्यः

शेषराजशर्मा प्राध्यापकः

वाल्मीकिसंस्कृतमहाविद्यालयः

नेपालः

सर्वतन्त्र-स्वतन्त्राणां पद्मविभूषणानां पण्डितराज-
श्री राजेश्वरशास्त्रिद्रविड़महोदयानाम्
"श्री गुरुः शरणम्"

दि० ७–१०–६८

नयपालराज्ये संस्कृतविश्वविद्यालयसंस्थापनवार्तामुपश्रुत्य महान्सन्तोषोऽनुभूयते। विद्याध्ययनस्य कृते ब्रह्मचर्याश्रमस्य महानस्त्युपयोगः। विशेषतश्च संस्कृतविद्यानामध्ययनमेकान्ते जनसंमर्दरहिते स्थान उपयुक्तं भवति। अत एवोक्तम्—

योऽहेरिव गणाद्भीतो मिष्टान्नादगरलादिव।
राक्षसीभ्य इव स्त्रीभ्यः स विद्यामधिगच्छति॥
'द्यूतं पुस्तकशुश्रूषा नाटकासक्तिरेव च।
स्त्रियो निद्रा च तन्द्रा च विद्यानाशकराणि षट्॥

इत्यादिना। वर्तमानसमये विशेषरूपेणेदमालोचनीयतां गतमस्ति, यत् तेषु २ पाश्चात्यपद्धत्या निर्मितेषु विश्वविद्यालयेषु छात्राणामुपद्रवस्य, सर्वथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनौचित्यपूर्णानां तेषामाकाङ्क्षाणां च यद्यालोचनं क्रियते तर्हि कथङ्कारं भविष्यत्काले शिक्षासंस्थानां सञ्चालनं सुकरं भवेदिति। सोऽयं प्रश्नः सर्वेष्वेव वैदेशिकेष्वपि शिक्षावित्सु असमाधेयतां गतो वर्तते। एवं स्थिते अस्मदीय-प्राचीनराजनीत्युक्तनियमानुसारेण क्रियमाणा विद्यालयव्यवस्थैव श्रेयस्करी भवितुमर्हति। सा च व्यवस्था कौटिलीयेऽर्थशास्त्रे एवंरूपेण निरूपिता वर्तते। तथा हि "विद्यानां तु यथास्वमाचार्यप्रामाण्याद्विनयो नियमश्च" इति।

अपमपि च प्रश्न इदानीं संस्कृतविद्यानां समुन्नतिमभिलषतां पुरतः समुपस्थितो दृश्यते, यत् एतासां विद्यानां संरक्षणं प्रचारणं च कथं भविष्यति यतो हि वर्तमानसमये संस्कृताध्येतृणां संख्या प्रतिदिनं ह्रासोन्मुखी समुपलभ्यते। अत्र किं कारणमित्यालोचने क्रियमाणे इदमेव पुरत आगच्छति यत् प्रायः संस्कृताध्यापकाः स्वीयपुत्रान् आङ्ग्लभाषाध्ययने विनियोजयन्ति। एवंविधायामवस्थायामन्येषां पुरतः संस्कृतविद्याध्ययनप्रेरणां कर्तुं कथमपि न ते पारयन्ति। अतः संस्कृताध्यापकाः स्वपुत्रान् यथा संस्कृताध्ययने प्रवर्तयेयुस्तथा कश्चनोपायोऽवलम्बनीयो वर्तते तद्विषये कौटिलीयेऽर्थशास्त्रे राज्यसंस्थाद्वारा अदण्डकरभूमिप्रदानं प्रतिपादितमास्ते। तथा हि ऋत्विगाचार्यपुरोहितश्रोत्रियेभ्यो ब्रह्मदेयान्यदण्डकराण्यभिरूपदायकानि प्रयच्छेदिति।

एवंविधायामवस्थायां वर्तमानसमये यदि तथा भूमिप्रदानमशक्यताकोटौ समागच्छेत्तदापि संस्कृताध्यापकस्य पुत्रो यदि योग्यतासम्पन्नो लभ्येत तदा पितुः स्थानं तस्मा एव प्रदातव्यमिति नियमः कृतो भवेच्चेत् स्वपुत्राणां संस्कृताध्ययने प्रवर्तनं विदुषां सम्भवति। तद्द्वारा चान्येषामपि तत्र नियोजनाय प्रयत्नो विद्वद्भिः कर्तुं शक्यते। एवमस्मदीयप्राचीनशास्त्रप्रतिपादितविद्याध्ययनक्रमे स्वीक्रियमाणे प्रायः १६ वर्षपर्यन्तं····· एतावती योग्यता तेन सम्पादनीयेति निरूपितमस्ति। तथा सम्पादितायां योग्यतायां यद्याङ्ग्लादिभाषाध्ययने कश्चित्प्रवृत्तो भवेत् तदापि तर्कदृष्टिपूर्णत्वात्स तत्रापि समीचीनां प्रतिपत्तिं लब्धुमर्हतीति प्रत्यक्षत एवानेकेषु स्थलेषु अवलोक्यते। अतः प्रथमतोऽस्मदीयपद्धत्या अध्ययनाध्यापनव्यवस्थायै एको विशुद्धः स्वतन्त्रवातावरणयुक्तः संस्कृतविश्वविद्यालयो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदि संस्थापितः स्यात् तदा तत्राधीतवतां आध्यात्मिक्या उन्नत्या सहान्यविधापि सर्वा उन्नतिः सर्वस्यापि राष्ट्रस्य कृते आदर्शमार्गभूता भवितुमर्हति।

पारवश्ये खलु जाड्यं नियतं तेन च प्रतिभाया उन्मेषो न भवति। शुकादयः पक्षिणः यदि सकृदपि पञ्जरे बद्धा भवन्ति तदा तेषामुड्डयनप्रतिभा विलुप्ता भवतीति सर्वानुभवसिद्धम्। श्रीमता काशिराजमहोदयेनापि अस्मदीयप्राचीनपद्धत्या स्वीयपुत्रस्याध्यापनव्यवस्था कृता वर्तते। एवं सम्यक् सभायां परीक्षोत्तीर्णाय सामवेदविदुषे यावज्जीवं वृत्तिव्यवस्था सम्पादिता, तत्पुत्रोऽपि यदि सर्वोच्चवैदिकपरीक्षोत्तीर्णः स्यात् तदा तस्मै अपि यावज्जीवं तादृशी वृत्तिव्यवस्था कृता। एवं त्रिपुरुषपर्यन्तं यदि वेदविद्यायां कृतपरिश्रमा विद्वांसो भवन्ति तदा मूलभूतं द्रव्यमपि तस्मै तृतीयाय देयत्वेन विनिर्णीतमस्ति। एवं विधा यदि व्यवस्था अन्येष्वपि राज्येषु भवेत् तदा संस्कृतविद्यायाः उन्नत्या सह सम्पूर्णे विश्वे सन्तोषशान्त्यादिव्यवस्थापनं भविष्यतीति विश्वसिमि (इति

श्री पू० गुरुचरणानां (राजेश्वरशास्त्रिद्रविडमहोदयानाम्) आज्ञया

रामचन्द्रशास्त्री होसमने

०

श्री डा० मङ्गलदेवशास्त्रिणाम् एम० ए० डी० लिट् पदभाजाम्

इंग्लिशिया लाइन वाराणसी २

१४।६।६७

प्रिय श्रीपराजुलीमहोदयाः

सप्रेमनमस्कारानन्तरं निवेदनम्

नेपालराष्ट्रे श्रीभूमहाराजाधिराजानां नेपालभूपालानां छत्रच्छायायां संस्कृतविश्वविद्यालयस्य स्थापनायाः समाचारः श्रूयमाणः संस्कृतज्ञविदुषां नूनमन्तस्तोषं जनयति। नैकप्रकारेण नेपालस्य भारतीयसंस्कृत्या संस्कृतेन चान्तरङ्गः सम्बन्धः। चिरकालादेव नेपालदेशीयसंस्कृतज्ञविदुषां वाराणस्यां विशिष्टस्थानमवर्ततेति सर्वैः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वीक्रियते। ततश्च तत्र राष्ट्रे संस्कृतविश्वविद्यालयस्य स्थापनया गीर्वाणवाण्याः समुद्धारे महत्साहाय्यं प्राप्स्यत इति नास्त्यत्र संदेहलवस्याप्यवकाशः। परंतस्य विश्वविद्यालयस्य स्वरूपं कीदृशं भवेदित्येष प्रश्नः प्रथमं विचारसमीक्षणमर्हति। वाराणसेयसंस्कृतविश्वविद्यालयस्य या दुर्दशाद्यत्वे मया सान्निध्येन दृष्टा सा नूनमत्यन्तखेदावहा। अतो नेपालस्थविश्वविद्यालयस्य स्थापनायाः पूर्वमेका लघ्वी समितिरावश्यकी, त्रयः पञ्च वा अनुभवन्तो विद्वसस्तस्याः सदस्याः भवेयुः। ते च तत्स्वरूपविषये तत्तद्विकल्पान् सम्यक् परीक्ष्य स्वमतं निर्धार्य तद्विषये राजशासनस्य मार्गप्रदर्शनं कुर्युः। एषा मे निश्चिता संमतिर्नूतनस्य प्रस्तुतस्य विश्वविद्यालयस्य विषये।

भावत्कः शुभाशंसी
मङ्गलदेवशास्त्री

(विद्यामार्तण्डः काशिकराजकीयसंस्कृतमहाविद्यालयस्य पूर्वप्रधानाचार्यः, वाराणसेयसंस्कृतविश्वविद्यालयस्य पूर्वोपकुलपतिश्च।)

श्री गङ्गाधरशास्त्री पराजुली निदेशकः
जनतासंस्कृतमहाविद्यालयः दाङ्गः
पो० जरवा, एक्सचेंज कोयलावास
जि० गोंडा (U. P.)

पूज्यपादानां श्री १००८ स्वामिहरिहरानन्द-सरस्वतीनां
करपात्रोपाह्वानां परमहंसपरिव्राजकाचार्याणाम्
श्रीहरिः

ब्रह्मकुटीर डी २५/१८
नारदघाट, वाराणसी १
भाद्रपदशुक्लाष्टम्याम् २०२५ वि० सं०

अङ्गीकुर्वन्ति सर्वेऽपि जनाः सर्वेषु देशेषु सर्वेषु कालेषु सर्वासु च परिस्थितिषु ज्ञानस्य माहात्म्यातिशयम्। अत एव प्रथमायामेवावस्थायां ज्ञानं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समुपार्जनीयमिति विश्वजनीनो नियमः। यया स्वदेशस्य स्वजातेः स्वपूर्वजनानाञ्च गौरवं जाग्रयात्, यया च तत्पोषकस्य स्वधर्मस्य स्वसभ्यतायाः स्वसंस्कृतेश्चरमोत्कर्ष उदियात्तस्या एव शिक्षायाः कृते ससंरम्भं प्राणपणेन प्रयतनीयं विपश्चिदपश्चिमैः। प्रमोदावहोयं विषयो यन्महामहिम्न महाराजमहेन्द्रेण नेपालनरेशेन संस्कृतविश्वविद्यालयस्थापनाय प्रयत्न आस्थितः। स च विद्यावासो नगराद् बहिः पृथक् च ग्रामेभ्यः प्रशान्ते प्रदेशे स्वसन्निवेशं स्वश्रेयसेऽपेक्षते। अस्ति चैवंविधं स्थानं यत्र परितः पर्वतश्रेणयो मधुरिमाणं बिभ्राणा विराजन्ते। सरितः कलकलारावसङ्कुलाः प्रवहन्ति। सुन्दरा द्रुमा रमणीया लता वन्याः पशवो बन्धव इव विचरन्ति। समा च विस्तृता च सा भूमिः मध्ये नेपालानां विराजते। सर्वसौविध्यकरी च सा। रोचतेऽस्मादृशेभ्योऽपि तत् रमणीयं स्थानं श्रीविश्वविद्यालयनिर्माणाय।

विश्वविद्यालये च वेदानाम्, शिक्षा-कल्प-व्याकरण-निरुक्त-छन्दो-ज्योतिषां वेदाङ्गानाम्, मन्वादिधर्मशास्त्राणां, पुराणेतिहासानां, न्यायवैशेषिकसाङ्ख्ययोगमीमांसावेदान्तानां दर्शनानाम्, आयुर्वेदार्थशास्त्राद्युपवेदानाञ्चाध्यापनं यथाधिकारमुपनीतानां द्विजातीनां कृते भवेत्। द्विजातयश्च सदाचारपरायणा गुरुशुश्रूषणरताः समिदाधानमाचरन्तो ब्रह्मचारिणः सन्तो वेदाध्ययनं विदधीरन्। उपर्युक्तानां वेदादीनां सारं सङ्कलय्य नेपालीयभाषायामनूद्य पुस्तकानि निर्माय सर्वसाधारणजनकृते शिक्षा वितरणीयेति

श्री १००८ श्रीमतां स्वामिकरपात्रिपादानामाज्ञावशम्वदतया स्थितस्य मार्कण्डेयस्य।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीः

जगद्गुरुशङ्कराचार्याणां काशीपीठाधीश्वराणां श्री १००८ महेश्वरानन्दसरस्वतीमहाभागानाम्

अहो विसुमराः श्रेणयः शिखरिणां, मनोहरध्वनयः सरःस्रोतवत्यः, हृदयहारिणी शस्यश्यामला वसुन्धरा, आवर्जनाः प्रस्थ-प्रदेशाः, बलाद् दृष्टि-बन्धनी मनःशमनी च विविक्तता समुपदिशन्तीव कस्यचित् महतो महतः कर्तव्यस्य स्वविशिष्टे समीचीनां सादयस्कावतारणाम्। वाराणसेयैर्महानुभाव-महात्ममनीषिमहनीयैः परमहंसपरिव्राजकाचार्यैर्विद्वत्तल्लजैस्तत्यैरत्रत्यैश्च विद्या-तपोव्रतविश्रुतैर्भूयोभूयोभिः स्वयं महाराजैः शौर्यवीर्यौदार्यविद्यातेजोवयोविभू-षितैरमात्यादिसहपरिकरैः शतसमुदायोपबृंहितप्रजाप्राज्यमण्डलमण्डितैः हिन्दू-राज्यमिदमेकमेवेति घोषणाप्रतिघोषपरिव्याप्तनेपालभारतदिगन्तरालबलयैः उद्-घोषितोऽभ्युपगतः अनुमोदितः समर्थितश्च संस्कृताविश्वविद्यालयः साङ्गोपाङ्ग-सम्पूर्णः प्रादुर्भवन् अत्र भवतां भवतां श्रीमहाराजानां संकल्पान् अनल्पान् परि-पूरयन् अस्मादृशामपि श्रोत्रपेयतामुपयास्यतीति। अरण्येष्वेव गुरुकुलान्यभूवन्। अभूवन् रामकृष्णादयस्तेजोमया वर्णिनः, भूस्वामिमहाभूप्रखण्डदानमपि इदमेव कर्तुं प्रेरयति। एतदपरं च भूयोऽस्मादृशानपि एतदुदीरयितुं प्रैरिरत्। दाङ्ग-प्रदेशावयवे प्रोक्तलक्षणलक्षिते शीघ्रं विधानकर्मतां गमिते संस्कृतमहेन्द्र-विश्वविद्यालये समग्राः साङ्गाः सरहस्याः संस्कृतविद्याः सधर्माचरणाः चारित्र्यो-दञ्चनचतुरा वर्णाश्रमरक्षणपरायणाः प्रकटन्तु। यदि वाञ्छ्यन्ते परेऽपि विद्यालयाः, भवन्तु अनुभ्रातरः सुश्लाघ्यमेतत्। परमत्रत्या सामग्री काचन अन्यैर्वेति।

महेश्वरानन्दसरस्वती
का० पी० शंकराचार्य
ज्ये० कृ० १२ गुरौ २०२५ वि०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाराणसेय-संस्कृतविश्वविद्यालयीयपुस्तकागारस्य भूतपूर्वाध्यक्षाणां
डा० श्री सुभद्रझामहोदयानाम्

काशी मुंशीघाट
२२।५।६८

आदरणीय पण्डितजी, सादर नमस्कार

आपका कृपापत्र यथासमय प्राप्त हुआ था। इसके पूर्व डा० जयमन्त मिश्रका भी पत्र आया था। मैने अपना मन्तव्य डा० मिश्रके पास काठमान्डू कई सप्ताह पूर्व भेज दिया है। उसकी प्रतिलिपि मेरे पास नही है। पर पत्र भेज देनेके अनन्तर कुछ ऐसी बातें आगई हैं जिनका उल्लेख करना आवश्यक है। मूल पत्रमें मैने मार्गकी असुविधाको ध्यानमें रखकर दांगसे अन्यत्र विश्व-विद्यालयकी स्थापनाका सुझाव दिया है। पर अब मैं समझता हूँ कि दांगके लोग जितने उत्सुक मालूम पड़ रहे हैं उतने उत्सुक नेपाल वा भारत वा कहिये तो संसारके किसी भी देशके मनुष्य इतने उत्सुक ऐसे कार्यके लिए मालूम नहीं पड़ते हैं। लाख-लाख नर-नारी दूर-दूर वास्तयोंसे माथेपर गठरी बाँधे दांग आकर सभाकी कार्यवाही शान्तिपूर्वक देखा। नेपाली छात्रोंका उत्साह तो मैं जीवन भर देखता आया हूँ। वे दांग जैसे दुर्गम स्थानों एवं ३ नम्बर ४ नम्बर आदि पहाड़ोंको लांघकर कई दिनोंतक पैदल चलकर काशी वा मटिहानी पढ़ने बराबर आया करते हैं। काशीके संस्कृतविश्वविद्यालयमें विशुद्ध संस्कृत पढ़ने वाले प्रायः नेपाली छात्र हैं। भारतीय छात्र तो मेरे जानने में प्रायः भोजन और निवासकी सुविधाके लोभसे यहाँ आकर अंग्रेजी स्कूलोंमें पढ़ते हैं। इस प्रकारके उत्साही दांग-निवासियों एवं नेपाली छात्रोंको दांगमें विश्वविद्यालय नहीं कर अनुत्साहित करना जातीय अपराध होगा।

जिन उत्साही दांगवासियोंने इतनी विस्तृत भूमिका दान इस महर्घताके समयमें दिया है उनकी धर्मनिष्ठा, कर्तव्यनिष्ठा, सदाचारिता आदि स्पष्ट हैं जो आज कलके दूषित वातावरण वाले भारत वा नेपालके नगरोंमें कहीं भी देखनेमें

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नहीं आई है। यदि शासनका सहयोग होगा तो रास्ता बनाना दांगके निवासियोंके लिए असम्भव नहीं है।

मुझे भय है कि अन्यत्र विश्वविद्यालय बनानेके लिए दांग वाले प्रायः अपनी बहुमूल्य भूमि नहीं देंगे।

अतः स्थानकी सुलभता वन पर्वतोंसे सुसज्जित दांगको मैं भारत तथा नेपालमें संस्कृतविश्वविद्यालयके लिए सुन्दरतम स्थान मानता हूँ। शेष बातें डा० मिश्रके पत्रसे ज्ञात होगी।

सेवामें

पं० गङ्गाधर पराजुली

दांग

भवदीय

सुभद्र झा

श्री भोलानाथ भ्रमर

एम ए. डी. फिल्. डी. लिट्

और अध्यक्ष, हिन्दी विभाग

म. ला. कु. महाविद्यालय,

बलरामपुर, गोंडा

Balarampur

३०-३-६८

माननीय महोदय,

१४, १५, और १६ मार्च ६८ को होनेवाले आपके विद्वत्सम्मेलनमें भाग लेनेका मुझे भी अवसर प्राप्त हुआ था, इसके लिए मैं आप लोगोंका आभारी हूँ। उस तीन दिनोंके प्रवासमें आपलोगोंकी सुव्यवस्थाके परिणामस्वरूप मुझको जो सुख मिला उसके लिए भी मैं आप आयोजकोंका विशेषरूपसे हृदयसे कृतज्ञ हूँ और धन्यवाद देता हूँ। वैसे इधर एक कहावत है जिसके अनुसार काम खत्म होने जाने पर कोई किसीको नहीं पूछता किन्तु सम्मेलन समाप्त होतेही आप लोगोंने मेरी सुविधा और आवश्यकताका ध्यान रखते हुए जिस तत्परताके

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साथ मेरे घरतक मुझे पहुँचा दिया उसके लिए भी मैं आभार प्रकट करता हूँ। आपने जिस स्नेह और आतिथ्यके साथ मुझे वहाँ रखा है उससे मनमें लालच पैदा होती है कि आप बार-बार मुझे बुलाएँ तो मैं बार-बार आपकी सेवामें उपस्थित होऊँ। मेरे उपर एक दायित्व था और वह यह था—शिक्षापद्धतिको निर्धारण, संस्कृतविश्वविद्यालयको आवश्यकता, सम्पूर्ण शास्त्रहरूको चौतर्फी विकास तथा संस्कृत भाषाको प्रोत्साहन तथा स्नातकहरू तयार पार्नु—विषयों पर विचारसरणि लिखितरूपेण देया। जबसे आपके यहाँसे आया हूँ तबसे अत्यधिक व्यस्त रहनेके कारण यह कार्य अभी तक नहीं कर सका। आज संलग्न पत्रोंमें अपने विचार आपके पास भेज रहा हूँ। ये अत्यन्त संक्षेपमें हैं पूर्ण नहीं है, न विस्तारके साथ हैं। इनसे आपको एक दिशा मिल सकेगी। आशा है, इससे आपको अपने विश्वविद्यालयको रूपरेखा तयार करनेमें मदद मिलेगी। यह रूपरेखा हिन्दू शास्त्रोंकी रूपरेखाके आधार पर बनाई गई है।

आपको पुनः धन्यवाद

आपका

भोलानाथ 'भ्रमर'

प्रस्तावित संस्कृतविश्वविद्यालयकी सामान्य रूपरेखा

१—उपर्युक्त विश्वविद्यालयका नाम "महेन्द्रसंस्कृतविश्वविद्यालय, बिजौरी दाङ" हो।

२—महाराजाधिराजसे प्रार्थना की जाय कि वे नैपालराष्ट्रकी राष्ट्रभाषा और राजभाषा संस्कृत घोषित करनेकी कृपा करें। यह हिन्दूसंस्कृतिके अनुरूप होगा और इससे संस्कृतके अध्ययनकी उपयोगिता बढ़ जायेगी।

३—विश्वविद्यालय पूर्णरूपेण स्वतः पूर्ण (Self Sufficient) हो, अर्थात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(i) उपकुलपति अवैतनिक हों और उनका सारा आवश्यक खर्च विश्व-विद्यालय वहन करे।

(ii) विभागाध्यक्ष एवं प्राध्यापक भी अवैतनिक हों ओर उनका भी सारा खर्च विश्वविद्यालय वहन करे।

(iii) विश्वविद्यालयकी शिक्षा निःशुल्क हो।

(iv) विश्वविद्यालयकी सम्पत्ति उसके जनसमूहकी श्रमशक्तिही हो।

(v) विश्वविद्यालयमें कोई भी छात्र पुरवासी (Day Scholar) नहीं होगा, सभी छात्रोंको छात्रावासी होकर रहना होगा।

(vi) विद्यार्थी तबतक घर न जाने पाए जबतक उसकी शिक्षा समाप्त न समझी जाय। हाँ, इस बीच उसके परिवारवाले उससे आकर मिल अवश्य सकते हैं।

(v) छात्रावासोंमें प्रधान द्वारके अतिरिक्त और कहीं भी ताला नहीं लग सकेगा—न कमरोंमें और न सन्दूकोंमें।

(vi) विश्वविद्यालयकी अपनी पुस्तकशाला (Book Depot) मक्खन एवं दुग्धशाला, गोशाला, वसनशाला, अर्थात् बाजार होनी चाहिए जिसमें विश्वविद्यालयके जीवन और मानवजीवनकी सारी वस्तुएँ विनिमयार्थ रहें (चिनीकी जगह गुड़, चायकी जगह दूध, बिस्कुटकी जगह रोटियाँ आदि रहें)।

(vii) विश्वविद्यालयकी अपनी छपाई शाला हो और उसकी अपनी कागजकी मिल हो।

(viii) विश्वविद्यालयके पास अपनी पर्याप्त भूमि हो जिसमें छात्रों, अध्यापकों और कर्मचारियोंके लिए आवश्यक अन्न उपजाया जा सके और यह कार्य विश्वविद्यालयके निवासियों द्वारा ही हो।

(ix) विश्वविद्यालयकी अपनी स्वतन्त्र रङ्गशाला हो जिसमें अनेक सांस्कृतिक कार्य-कलाप तो समय-समय पर आयोजित ही हों, साथ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ही साथ सांस्कृतिक चलचित्रोंका तथा देश-विदेशके विभिन्न महत्त्वपूर्ण दृश्योंका प्रदर्शन हो।

(x) सबका भोजन सामूहिक भोजनालयमें ही हो। व्यक्तिगत भोजन-शाला उपकुलपतिसे लेकर सामान्यसेवक तकमें किसीकी भी नहीं हो सकती। बडासे भी बडा अतिथि क्यों न हो, उसे सामूहिक भोजनालयमें ही भोजन करना होगा।

(xi) भोजन और वस्त्र सम्बन्धी किसी भी चीजके लिए मशीनोंका उपयोग यथासंभव नहीं होगा।

(xii) विश्वविद्यालयकी दिनचर्यामें सामूहिक प्रार्थना, सामूहिक रचनात्मक व्यायाम, सन्ध्या, अग्निहोत्र, सामूहिक भोजन, अनिवार्य श्रम, सामूहिक मनोरंजन आदिको अनिवार्य रूपसे स्थान देना होगा।

४—अंगरेजी चिकित्सा-पद्धतिकी जगह अनिवार्यतः प्राकृतिक चिकित्सा और विवशतः आयुर्वेदिक चिकित्सा पद्धतिका प्रयोग होना चाहिए।

५—विश्वविद्यालयकी प्रधान भाषा संस्कृत हो, सहायक भाषाके रूपमें नेपाली और अंगरेजीका भी अध्ययन किया जा सकता है; विश्वकी अन्य भाषाओं का भी अध्ययन हो सकेगा, किन्तु दैनिक व्यवहारमें विश्वविद्यालयकी सीमाके भीतर और पत्रव्यवहार आदिमें विशेषतः संस्कृत और सामान्यतः नेपालीका ही प्रयोग हो सकेगा।

६—रजिष्ट्रार आफिस, रेकर्डस आफिस आदिके अतिरिक्त सारा कार्य झोपडियोंमें चटाइ और चौकी पर ही होगा।

७—आचार्यों, छात्रों और आगन्तुकोंकी वेश-भूषा नियत और निश्चित होगी। उसमें व्यक्तिगत रुचि और व्यक्तिगत स्वतन्त्रताके लिए कोई भी संभावना नहीं होगी। यह वेश-भूषा अंगरेजी तो कदापि नहीं होगी। सामान्य नेपाली नागरिक वेश-भूषा भी वह न होगी। उसमें प्रधानता पीले रंगकी होगी। शेषका निर्णय विद्वत्समिति करें।

८—विश्वविद्यालयका अपना पेनलकोड (आचार एवं दण्ड संहिता) हो।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

९—विश्वविद्यालयका अपना स्वतन्त्र कोर्ट और काउन्सिल हो, जिसमें विभागाध्यक्ष, प्राध्यापक, सरकारी कर्मचारी और क्षेत्रके गण्य-मान्य व्यक्ति हों। उपकुलपति सभी समितियोंका, कोर्टका परिषदोंका एवं सभाओंका पदेन स्थायी सभापति होगा।

अध्ययन-अध्यापनकी सामान्य रूपरेखा

१—अक्षरज्ञानके बादका प्रारम्भिक पाठ्यक्रम व्याकरणका ज्ञान हो और यह अनिवार्य हो।

२—तत्पश्चात् प्राध्यापकमण्डल यह निश्चित करें कि छात्र किस शास्त्रका अध्ययन करेगा, वही शास्त्र उसे विश्वविद्यालयके अध्ययनकालतक पढाया जाय, जिससे वह उसीका विशेष विद्वान् बन सके। उसपर अनेक शास्त्रोंका व्यर्थका बोझ न डाला जाय।

३—जो स्नातक उस कक्षाके लिए, जिसे उत्तीर्ण करनेका वह अभ्यर्थी है, सुन्दर पुस्तक लिख दे, उसीको उत्तीर्ण घोषित करना चाहिए।

४—विद्यार्थियोंको सप्ताहमें एक दिन क्षेत्रके गावोंमें जाकर भाषण देना चाहिए। यह आनवार्य होना चाहिए।

५—विश्वविद्यालके अपने प्राध्यापकगण ही (जिनकी सङ्ख्या दो या तीनसे अधिक नहीं होगी, क्योंकि शेष अध्यापनकार्य उससे ऊँची कक्षाका विद्यार्थी करेगा) परीक्षकका कार्य करें। इसके लिए पारिश्रमिक नहीं होना चाहिए।

६—प्रत्येक विभागमें अनुसन्धानकी व्यवस्था होनी चाहिए।

७—यदि कोई थीसिस ऐसी समझी जाय जिसका पूर्ण परीक्षण विश्वविद्यालयकी विद्वत्सभिति नहीं कर सकती या जिसे बाहरके विद्वानोंको दिखानेसे प्रचारका लाभ हो सकता हो तो उसे विदेश भेजा जाय। थीसिसोंका बाहर भेजा जाना अनिवार्य नहीं होना चाहिए।

८—थीसिस पहले छप जाय, उसपर विद्वानों और पाठकोंकी प्रतिक्रिया देख ली जाय, तभी डिग्री दी जाय।

९—डिग्रीयोंका नाम अंग्रेजीके अनुकरणपर नहीं होना चाहिए।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१०—परीक्षाप्रणाली बदली जाय। रटकर सुना देना या याद करके कापीपर लिख देना ही योग्यताका मापदण्ड न हो। ऊँची कक्षाका विद्यार्थी नीची कक्षाके विद्यार्थियोंको पढाए, यह बराबर देखा जाय। उसके सालभर का अध्ययन मनन और लेखनका कार्य देखा जाय। उससे एक बडी सभामें किसी विषयपर भाषण कराया जाय। उससे उसके अपने विषय पर जो भी व्यक्ति जो भी प्रश्न चाहे पूछे। उसे सबको सन्तुष्ट करना पड़े। इन सबके निष्कर्षोंपर एक विद्वद्गुपसमिति निर्णय लें। जब सब ठीक है तभी छात्रको उत्तीर्ण घोषित किया जाय।

११—विश्वविद्यालयमें दर्शन, धर्म, व्याकरण, साहित्य, अर्थ, आयुर्वेद, राजनीति, भूगोल, समाज इतिहास आदि समस्त विषयोंके अध्ययनकी व्यवस्था हो। अध्यापनकी भाषा संस्कृत हो।

१२—जिस विषयपर संस्कृतमें पुस्तकें न हों उनका अध्यापन आचार्य स्वयं संस्कृतेतर भाषाओंकी पुस्तकोका अध्ययन करके और संस्कृतमें नोट लिखकर संस्कृतमें करें।

१३—प्रत्येक विभागके प्रत्येक आचार्यके लिए संस्कृतमें अपने-अपने शास्त्रकी एक सुन्दर पुस्तकका लिखना अनिवार्य होना चाहिए।

१४—इसी ढंगसे विज्ञानका अध्ययन भी संस्कृतमें कराया जा सकता है। प्रारम्भिक कक्षाओंसे शुरु किया जाय। पुस्तकें लिखी और लिखाई जायं।

भोलानाथ भ्रमर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ॐ

आत्मा खलु विश्वमूलम्

विद्वत्सम्मेलने प्रतिवेदनसमितौ च भावि-संस्कृत-विश्वविद्यालयकृते

सप्तसूत्री सम्मतिः

१—दाङ्गे भाविनि संस्कृत-विश्वविद्यालये मुख्यतयाऽऽर्यसंस्कृतेः संरक्षणं भवतु। चरित्रनिर्माणस्य बलिष्ठायां पृष्ठभूमौ विश्वसंबद्धमादर्शमानवजीवनं चेतनामयं सुखमयमपवर्गक्षमं च सम्पादयितुं लक्ष्यं रक्षणीयम्।

२—उपर्युक्तं लक्ष्यं लब्धुमाधारभूताऽध्यापकाऽभिभावक-सञ्चालक-परिचारक-प्रभृतिसकलसम्बद्धजनैर्नियमतः—'आचारः प्रथमो धर्मः, दशकं धर्मलक्षणम्। आत्मा खलु विश्वमूलम्' इत्यादि विश्वात्मदर्शने दृढा अन्तेवासिनः स्नातकाश्च सबलाः सम्पादनीयाः।

३—'यथा राजा तथा प्रजा' इत्यादर्शरूपामुक्तिं सार्थां स्थापयितुमत्र संस्कृत-विश्वविद्यालये राजपरिवारस्य युवराजाधिराजकुमारप्रमुखा अप्यपेक्षित-समय-पर्यन्तं प्रविश्य देशाचारकुलाचारप्रतिपालन-पूर्वकं विश्वस्यैकमात्रहिन्दू-राष्ट्रं सञ्चालयितुं समुचितां वैदिकीं लौकिकीं चानिवार्यां शिक्षां लभन्तां सुमधुरं जनसम्पर्कं च वर्धयन्तो वर्धन्ताम्।

४—कुलपति-प्रमुखाः प्राध्यापकप्रभृतयः सर्वे संस्कृत-विश्वविद्यालयसम्बद्धा बुधजना बन्धुपुत्रादीनात्मीयानत्रैव पाठयन्तु।

५—पञ्चायत्त-प्रजातन्त्र-प्रणाली चतुरङ्गिणी। विकास-दिग्जया भाति सेनेव चतुरङ्गिणी। इदमाद्यमनवद्यं हृद्यं च वैदिकं पञ्चायत्तदर्शनं क्रियात्मकमत्र विश्वविद्यालये सम्यगध्यापनीयम्।

६—इह हि पठन-पाठन-लेखन-वाचन-प्रवचन-पत्राचार-विचार-विनिमय-परीक्षा-प्रमाणपत्र-संलाप-प्रमुख-निखिल-वाग्व्यवहारः सभ्य-सरस-सरल-संस्कृत-राष्ट्र-भाषायामेव कर्तव्यः। ज्ञानविज्ञानयोः समन्वयश्च कर्तव्यः।

७—अत्र च यथारुचि सक्रियं स्वाध्यायं विधाय समुत्तीर्णः प्रतिभाशाली स्नातको जनप्रातिनिध्ये शिक्षाक्षेत्रे प्रशासनप्रमुखे च सकले देशसेवाकर्मणि प्रथमं स्थानं लभताम्।

योगिनो नरहरिनाथस्य
(२०२४।१२।३) दाङ्गे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ॐ आत्मा खलु विश्वमूलम् ।

हाम्रो संस्कृतविश्वविद्यालय कस्तो हुनु पर्छ ?

१—आर्यसंस्कृतिको संरक्षक हुनु पर्छ ।

२—पञ्चायती दर्शनको राम्रो दिग्दर्शक हुनु पर्छ ।

३—प्रत्येक अङ्गमा राष्ट्रिय भावनाका साथ मानवीय भावना रम्म हुनु पर्छ ।

४—अध्ययन अध्यापनको र व्यवहारको माध्यम राष्ट्रभाषा र संस्कृत हुनु पर्छ ।

५—प्रत्येक विषयको शिक्षा क्रियात्मक हुनु पर्छ ।

६—यथासाध्य 'आयादल्पतरो व्ययः' भन्ने अर्थशास्त्रीय सूत्रमा ध्यान राखेर प्रत्येक विभाग सञ्चालित हुनु पर्छ ।

७—छात्रवर्ग तथा अध्यापकवर्गलाई प्राकृतिक यौगिक स्वास्थ्य-विज्ञान द्वारा स्वस्थ र सबल राखनु पर्छ ।

८—कृषि गोपालनदि स्वानुरूप प्रयोगात्मक शिक्षणद्वारा स्वावलम्बी जीवन निर्माण गर्ने स्नातक उत्पन्न गर्नु पर्छ ।

९—ज्ञान र विज्ञानको पूरक समन्वय गरी समयसुहाउँदो लघुशिक्षाप्रणाली चलाउनु पर्छ ।

१०—सर्वप्रथम स्नातकहरुको चारित्रनिर्माण गर्नु पर्छ ।

११—कुनै विषयको शिक्षा दिंदा स्थानीय प्राकृतिक वस्तुको सदुपयोग गर्ने लक्ष रहनु पर्छ ।

१२—धार्मिक शिक्षा विश्लेषणात्मक र उदार हुनु पर्छ ।

१३—यस्ता प्रकारका स्नातकहरूले राष्ट्रका प्रत्येक सेवामा प्रथम स्थान पाउनु पर्छ ।

१४—शैक्षणिक योग्यता भन्दा पनि आचारनिष्ठा र राष्ट्रियभावनायुक्त क्रियाशीलताको सर्वत्र स्थान रहनु पर्छ ।

१५—छात्रवर्ग तथा अध्यापकवर्गको दिनचर्या रचनात्मक-परम्पराको निरन्तर हुनु पर्छ र आहार विहार सर्वात्मना सात्त्विक रहनु पर्छ ।

योगी नरहरिनाथः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुरेन्द्रनाथशास्त्री एम० ए०
दर्शनतीर्थ, न्यायवेदान्ताचार्य्य
वाराणसी संस्कृतविश्वविद्यालय

राजभवन
सी० २१।८७ प्लाट ए १/७
लहुरावीर, वाराणसी,
१५।४।६९

संस्कृतं नाम देवी वाक् अन्वाख्याता महर्षिभिः

विभिन्नेषु कालेषु राज्यनाशगणविप्लवादिभिः प्रतिघातकैः प्रतिहन्यमाना अप्यार्यसंस्कृतिरद्यापि मूलाद्रूपान्तरं नीयमानाऽपि वास्तविकं स्वरूपं न जहाति। कस्यापि राष्ट्रस्य स्थायि समुन्थानं सांस्कृतिकेन जागरणेनैव सम्भाव्यते। आर्य-जातेः मौलिकः सांस्कृतिक इतिहासश्च संस्कृत एव वर्तते निहितः समस्ता अपि प्रादेशिक्यो भाषाः प्रायः संस्कृतादेव प्रादुर्भूताः संस्कृतशब्दैरेव समृद्धिङ्गताः। अतः संस्कृतं प्रति जनताया अत्यादरो विद्यते। जनता संस्कृतं शिक्षितुं कामयते। तदर्थं युगानुरूपा संस्कृतशिक्षाया व्यवस्था परमावश्यकी। संस्कृतभाषायाः सामान्यविज्ञानस्य शास्त्रीयप्रौढपाण्डित्यसंरक्षणस्य चोभयोः समावेशो यथावद्रूपेण यावन्न स्यात्तावत्सर्वोपि मनोरथो विफल एव भवेत्।

अतो नयपाल (नेपाल) राज्यान्तर्गतदाङ्गस्थाने संस्थाप्यमानस्य संस्कृतविश्वविद्यालयस्य तथा कर्तव्यं परमावश्यकं यथा प्राच्य-प्रतीच्यविद्ययो पारस्परिकः समन्वयात्मकः सम्बन्ध उत्तरोत्तरं दृढ़तरं संस्थापितः सन् वर्द्धेत, स्वसंस्कृतिसंरक्षकाः कार्यकुशलाः स्नातका भाविनो विश्वविद्यालयस्य यथाभवेयु स्तथा प्रयत्नो विधेयः। एतदर्थमपेक्षितसर्वसाधनसम्पन्नेन विश्वविद्यालयेन भाव्यम् कार्येस्मिन् संलग्नाः पण्डितप्रवराः श्रीगङ्गाधरशास्त्रिमहोदयाः श्रीविश्वनाथस्यानुकम्पया सफलमनोरथा भवितार इति मे विश्वासः।

सुरेन्द्रनाथशास्त्री द्विवेदी
वा० सं० विश्वविद्यालय
वाराणसी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्वत्शिरोमणि-महामहाध्यापक—

पं० कमलाकान्तमिश्रो व्याकरणवेदान्ताचार्य :

सम्मानित-प्राध्यापको वाराणसी

वाराणसेय-संस्कृत-विश्वविद्यालयस्य : दिनांक । २३।५।१९६८

भूतपूर्वाध्यक्षो

जो० म० गोयनका संस्कृत-महाविद्यालयस्य

नेपाल-प्रदेशान्तर्गत-जनतामहाविद्यालयदाङ्गनामके शुभपदे गत-मार्चमासस्य क्रमेण १४.१५.१६ त्रिषु दिनेषु विशिष्ट-विद्वत्संमेलन-समारोहे प्रस्तावित-संस्कृत-विश्वविद्यालयस्वरूपमधिकृत्य आचार्यचरणानां महाविदुषां च विभिन्ना विचाराः समुपस्थापिताः ।

तत्र तृतीय-दिवसे सर्वसंमत्या निश्चितमिदमासीत् यत् संस्कृत-विद्यानां महाविद्यालयेऽत्र संस्कृतमाध्यमेनैव वेदवेदाङ्गानामध्ययनाध्यापनप्रक्रमो भवेत् अन्येऽपि नवीनास्ते विषया निवेष्टव्या ये तदनुरोधिनः स्युः किन्तु तेषामपि पठनं पाठनं च संस्कृतमाध्यमेनैव भवेत् । विश्वविद्यालयश्चायं नेपालदेशाधीश्वराणामाचार्यपादानां विदुषां च चरणार्पणपरिपूते तीर्थभूते दाङ्गप्रदेशे एव स्थापितो भवेत् । इहत्या भूमिस्तद्भागश्च माता-पितराविव नवजातं बालकमिव विश्वविद्यालयं जुषमाणौ यशो लभेताम् ।

कुलपतीनां नेपालमहाराजानां च सदास्य शिरसि वरदहस्तः छत्रायितः स्यात् । एवमयं विशुद्धान् स्नातकान् समुत्पाद्य देशस्य वर्णाश्रम-वैदिकधर्म-मर्यादानां रक्षां कुर्यात् । इत्थं सर्वसंमत्या निश्चितेऽहमपि संमतिं प्रदाय अत्र संवसद्भावनां श्रीपशुपतिनाथं विश्वनाथं च प्रार्थये शम् ।

कमलाकान्तमिश्रः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आचार्य आनन्द झा

प्राच्य-संस्कृत-विभागः
लखनऊ
विश्वविद्यालयः

दिनांक : २०।५।१९६८

श्रीमन्तो जनता-महाविद्यालय-निदेशका :

नमस्काराः

प्राप्तं पत्रम्। समवगतः समाचारः। नेपालीयैर्बहुभिरस्मदीयैः पृष्टं पृच्छ्यते च प्रस्तावमुपगतस्य संस्कृतविश्वविद्यालयस्य स्थानौचित्यविषये। तत्रोत्तरमिदं मदीयं अनतिपूर्वं दाङ्गविजौरीजनतामहाविद्यालयायोजितस्य विद्वत्सम्मेलनस्योद्घाटनभाषणे नेपाले संस्कृतविश्वविद्यालयस्थापनामुद्घोषयितुर्नेपालमहीमहेन्द्रस्य श्री ५ महेन्द्रवीरविक्रमसाहदेवसदासमरविजयिनस्त्विच्छा सर्वतो बलवती यद्यपि तत्स्थाननिर्वाचनविषयेऽपि, परन्तु यदि सूक्ष्मेक्षिकया निरीक्ष्यते तत्स्थानौचित्यं तदा दाङ्गभूमिरेव प्रतीतिपथमवतरति सर्वाधिक्येन तदर्थमुचिता खल्वाभियुक्तिभिः—

१—राष्ट्रस्य ननु नेपालस्य या परिलक्ष्यते दीर्घता पूर्वपश्चिमानुगामिनी तत्पूर्वार्द्धे प्रचलतो विश्वविद्यालयस्यैकस्य सत्तया तत्पश्चिमार्धं एव नूतनस्यास्य विश्वविद्यालयस्य स्थापनमुचितम्।

२—सत्यं काष्ठमण्डपस्य महत्त्वं सर्वाधिकम्, परन्तु तद्धि तस्य महत्त्वं यद्यमहतोऽपि नेपालपश्चिमाञ्चलप्रधानस्य दाङ्गस्य महत्त्वमापादयेत्। संस्कृतविश्वविद्यालयस्यैतस्य स्थापनेन तदा नेपालीयायाः जनतायाः दृष्टौ विवृद्धमेव भवेत्सर्वथा। यतो ह्यमहतोऽपि महत्त्वापादनं स्वमहिम्ना भवति सर्वाधिकं महत्त्वम्। यदि कश्चिदत्र ब्रूयात् तथा सति त्रिभुवनविश्वविद्यालयीयेन सुमहता प्रचलता प्राच्यसंस्कृतभागेन दाङ्गे महेन्द्रसंस्कृतविश्वविद्यालये समागन्तव्यं स्यात्। कथं नाम तद्रुचिकरं प्रभवेद् बहूनामिति, तत्रेदं वक्तव्यम्—कथं नाम भवेदरुचिकरं नेपालराष्ट्रैक्यं साधु विलोकयतां सहृदयानामथ केषामपि ? अथवा तथा सति तस्य तत्र यथापूर्वं समवस्थानेऽपि नूतनस्यास्य महेन्द्रसंस्कृतविश्वविद्यालयस्य स्थापना भवितुमर्हति दाङ्गे। वाराणस्यां संस्कृतविश्वविद्यालयस्य स्वतन्त्रस्यैकस्य सत्त्वेऽपि हिन्दूविश्वविद्यालयेऽपि प्राच्यसंस्कृतसङ्कायः सुमहानस्ति प्रचलन् "धर्मविज्ञानसंङ्काय", नाम्ना तथा नेपाले कुतो न भवितुमर्हेत् ? तत्रोभयत्र प्रचलन्ती यथा समवलोक्यते समानसम्माना शास्त्र्याचार्यपरीक्षा तथा नेपालीययोरपि द्वयोर्विश्वविद्यालययोः सा भवितुमर्हत्येव तथा। नोक्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मात्रमुदाहरणम्-काश्यधिकरणकाभ्यामुक्ताभ्यां विश्वविद्यालयाभ्यामन्येनास्मदीयेन "लखनऊविश्वविद्यालयेन" अपि दीयत एव स्वीयेभ्यः प्राच्यसंस्कृतान्तेवासिभ्यः शास्त्र्याचार्याद्युपाधिभ्यरते । तत्कथं न भवितुं शक्नुयात् तथा सति नेपाले तथा ?

३—काष्ठमण्डपातिरिक्तं तु महेन्द्र-संस्कृतविश्वविद्यालयस्थापनाहंतयाऽवशिष्यते स्थानद्वयम्, जनकपुरं धरान इति च । परन्तु सम्पन्नस्य पूर्वोक्तस्य विद्वत्संमेलनस्यावसरे प्रतिनिधिमेकमपि विद्वांसमप्रेषयता जनकपुरेण प्रदर्शितैव स्वीयोत्साहहीनता । धरानाच्चागतेन प्रतिनिधिना विदुषैकेन सह जातायामेतद्विषयिण्यां चर्चायां, तदानीं या ह्यभिहिता परिस्थितिस्तत्रत्यसंस्कृतविद्यालयस्य प्रचलतस्ततस्तत्रत्यानामप्युत्साहो न तथा यथास्ति दाङ्गीयानां विषये प्रकृत इति ।

"यथेच्छं तु प्रदेयानि सर्वद्रव्याणि भारत ।
अन्नं विद्या तथा कन्या नानर्थिभ्यः प्रदीयते" ॥

इति धर्मशास्त्रवचनानुसारं कथं नाम देयतामर्हेत् श्री ५ महेन्द्रेण महेन्द्रसंस्कृतविश्वविद्यालयस्तास्यामनर्थिभ्याम् ?

४—दाङ्गजनतामहाविद्यालयस्य महेन्द्रसंस्कृतविश्वविद्यालयत्वसम्पादने विहिते संस्कृतविश्वविद्यालयस्य तस्य चालनाय प्राप्यस्यार्थराशेः कियानप्यंशः (ज०म०वि०वि०) तद्भूमिसुव्यवस्थासम्पादनेन यथा लब्धुं शक्यते न तथान्यत्रेत्यपि वैशिष्ट्यं दुरपलपमेव दाङ्स्य महेन्द्रसंस्कृतविश्वविद्यालयस्थापनानुकूलम् ।

५—छात्रसम्पत्तिरपि यथा भवितुमर्हति दाङ्गे न तथाऽन्यत्र । यतो हि दाङ्गीयानामभिभावकानां यथाऽवलोक्यते श्रद्धा संस्कृतसंस्कृत्योर्न तथा स्यान्मन्येऽन्यत्रस्थानां तेषाम् ।

६—भारतादावपि सर्वत्र समवलोक्यत एव प्रचलन्ती चर्चेयं यदधुना नगरं विहाय ग्राम एव विश्वविद्यालयस्थापना श्रेयस्करी जनोत्थानदृष्ट्या । ततोऽपि हेतोः महेन्द्रसंस्कृतविश्वविद्यालयस्थापना दाङ्गे युज्यते ।

७—प्राणवे हि युगेऽस्मिन् आकस्मिकया अपि परिस्थितेरानन्त्येन सम्भाव्यमानतया राजनीतिक्या अपि दृष्ट्या तत्तद्राष्ट्रनायकाः राजधानी-विश्वविद्यालय-महापुस्तकालय-विभिन्नमहायन्त्रालयादीनां स्वराष्ट्रसम्पत्तीनां स्वराष्ट्रान्तर्विकेन्द्रणं वदन्ति राष्ट्रहितकरम् । ततोऽपि हेतोः काष्ठमण्डपातिरिक्ते दाङ्गे महेन्द्रसंस्कृतविश्वविद्यालयस्थापना शक्यते वक्तुं साधीयसी ।

८—नेपालपश्चिमाञ्चलीयानां संस्कृतच्छात्राणामधनिनां बहूनां काष्ठमण्डप-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गतागतानुकूलस्य तत्रस्थित्यनुकूलस्य चार्थस्याभावेन तेषां हितायापि नेपालपश्चिमाञ्चलप्रधाने दांगे महेन्द्रसंस्कृतविश्वविद्यालयस्थापनमुचितम् ।

९—सर्वाधिकप्रबलान्तिमा च युक्तिरियमत्र यत्र हि दांगे महता समारोहेणानतिपूर्वमभूदभूतपूर्वं संस्कृतसुमहद्विद्वत्समेलनम्, पुनीते च तदवसरे कृतः सुमहान् जयघोषो जनतया तत्रत्यया स्वनरनाथं साक्षादवतारमेव जगदवतो भगवतः समवगच्छन्त्या । नेपालमहीमहेन्द्रेण श्री ५ महेन्द्रेण च स्वदर्शनदानानुग्रहपूर्वकं विहिता श्रोतृणां समेषां समुपस्थितानामसंख्यानां निरतिशयानन्ददायिनी संस्कृतविश्वविद्यालयस्थापनघोषणा, हन्त को नामास्त्यपराधस्तस्य, यदुक्तसंस्कृतविश्वविद्यालयस्थानतया वञ्चितः कृतः स्यात् कर्तुमकर्तुमन्यथाकर्तुञ्च सर्वथा सामर्थ्यमात्मनि दधता श्री ५ महेन्द्रेण दांगोसौ ? इति ।

दाङ्ग-नेपालस्थितेन जनता-महाविद्यालयेन २०२४ वर्षे समायोजिते विद्वत्संमेलने विचारायोपस्थापिता —

संस्कृतविश्वविद्यालयस्य रूपरेखा

(१) संकायाः (फैकल्टी) चतस्रः स्युः—आन्वीक्षिकी, त्रयी, वार्ता, दण्डनीतिश्च ।

(२) तत्रान्वीक्षिकीसंकाये निम्नाः स्युर्विभागाः —

(क) न्यायवैशेषिकविभागः
(ख) सांख्ययोगविभागः
(ग) बौद्धन्यायविभागः
(घ) आगमविभागः
(ङ) चार्वाकरसेश्वरविभागः
(च) मनोविज्ञानविभागः
(छ) जैनन्यायविभागः

(३) त्रयीसंकाये निम्नाः स्युर्विभागाः—

(क) वेदविभागः
(ख) मीमांसाविभागः
(ग) व्याकरणविभागः
(घ) वेदान्तविभागः
(ङ) धर्मशास्त्रविभागः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(च) ज्यौतिषविभागः
(छ) साहित्यविभागः
(ज) शिक्षाविभागः
(झ) पुराणेतिहासविभागः
(ञ) आयुर्वेदविभागः

(४) वार्तासंकाये निम्नाःस्युर्विभागाः—
(क) वाणिज्यशास्त्रविभागः
(ख) यन्त्रशास्त्रविभागः
(ग) भूगर्भशास्त्रविभागः
(घ) प्राणिशास्त्रविभागः
(ङ) वनस्पतिशास्त्रविभागः
(च) राष्ट्रान्तरभाषाविभागः
(छ) कृषिशास्त्रविभागः
(ज) रसायनशास्त्रविभागः
(झ) स्वराष्ट्रभाषाविभागः

(५) दण्डनीतिसंकाये निम्नाः स्युर्विभागाः—
(क) अर्थशास्त्रविभागः
(ख) विधिशास्त्रविभागः
(ग) युद्धशास्त्रविभागः
(घ) नीतिशास्त्रविभागः
(ङ) पत्रकारिताशास्त्रविभागः

(६) राष्ट्रस्य परिस्थित्यनुरूपमन्येऽपि विभागाः स्थाप्यतामर्हन्ति ।

(७) सर्वत्र पाठ्यक्रमे यथायोगं प्राच्यपाश्चात्यविचारधारयोस्तुलनात्मकाध्ययनप्रयोग आवश्यकः ।

(८) सर्वमध्यापनं संस्कृतभाषामाध्यमेनैव चालनीयम् ।

(९) आरम्भावस्थायामर्थशक्त्यनुसारमुक्तेषु विभागेषु केचनैव स्थापनीयाः, परन्तु संकायाः सर्वे चालनीयाः ।

(१०) आन्वीक्षिकी-त्रयीसंकाययोः शास्त्रिपरीक्षासु मध्यमापरीक्षोत्तीर्णा एव हि छात्राः प्रवेशार्हा भवेयुः । वार्ता-दण्डनीतिसंकाययोः किन्तु संस्कृतमाश्रित्येण्टरपरीक्षोत्तीर्णा अपि । एतदर्थं प्रारम्भिक्याः शिक्षाया आरभ्येण्टरपरीक्षापर्यन्तं पाठ्यक्रमे सरलस्य संस्कृतस्य पाठ्यत्वेन निर्धारणमावश्यकम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(११) यस्मिन् विषये संस्कृतग्रन्था दुर्लभाः तस्मिन् विषये संस्कृतग्रन्थरचना विधापयितव्या, तदर्थं पूर्वं केचन संस्कृतज्ञा युवानः अध्येतृत्वेन केचन चान्ये तद्विषयज्ञा अध्यापकत्वेन विनियोजनीयाः स्युर्विशेषवृत्तिप्रदानेन। सावधितया तृतीयचतुर्थसंकाययोः स्वराष्ट्रभाषया शिक्षा देया वा।

(१२) संस्कृतविषयमाश्रित्य बी० ए० परीक्षोत्तीर्णानामाचार्य-परीक्षासु कासुचन प्रवेशो देयः। ततोऽपि विषयान्तरज्ञसौलभ्यं किञ्चिदनन्तरं प्रभवितुमर्हेत्।

(१३) वेद - मीमांसा–व्याकरण–वेदान्त-धर्मशास्त्र - पुराणेतिहास-ज्यौतिषविभागवर्जं सर्वेषु विभागेषु सर्वजातीयानां प्रवेशो भवेत्।

(१४) शिक्षा सर्वथा निश्शुल्का कार्या। प्रवेश-परीक्षा-शुल्कग्रहणं कार्यम्।

(१५) विश्वविद्यालयस्य सञ्चालनायार्थसंग्रहः शैक्षिककरग्रहणेन सम्पाद्यः। अनपत्यधनानि शिक्षामात्रोपयोगीनि विधेयानि शासनेन।

(१६) एकैकस्य संकायस्य कृते एकैकोनुसन्धानविभागः स्थापनीयः।

(१७) सुमहानेकः पुस्तकालयस्तथाविधो भवेत्, यत्रानुसंधानार्थमपेक्षितानि सर्वाणि पुस्तकानि भवेयुः। पाठ्यपुस्तकालयस्तु सर्वत्र विभागे स्वस्वतन्त्रो भवेत्।

(१८) संस्कृतविश्वविद्यालयपरीक्षोत्तीर्णानां योग्यपदलाभे प्राथम्यं देयं शासनेन।

(१९) सर्वत्र ग्रामपञ्चायते एकैकः समाजशिक्षकः स्थापनीयः शासनेन प्रथमद्वितीयसंकायाभ्यामुत्तीर्णो विद्वान् प्राप्तसच्चरित्रत्वविशेषप्रमाणपत्रः।

(२०) अस्य विश्वविद्यालयस्य नाम "महेन्द्र-संस्कृत-विश्वविद्यालयः" इति भवेत्।

(२१) अन्ये नियमा उपनियमाश्च विश्वविद्यालयान्तरनियमोपनियमवद् भवेयुः।

॥ इति ॥

आनन्द झा
प्रधानः प्राच्यसंस्कृतविभागः
लखनऊ विश्वविद्यालयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राच्य-संस्कृत विभागः

लखनऊ-विश्व-विद्यालयः

१७।४।६८

श्री निदेशकमहोदयाः

ज० म० वि० वि० दाङ्ग नेपालस्य

नमस्काराः

मन्ये नाविज्ञातं भवेद्भवतां यदव्यवहितपूर्वं सम्पन्नस्य महतो विद्वत्संमेलनस्यावसरे प्रतिवेदनसमितेः समक्षमुपस्थापनाय "संस्कृत-विश्व-विद्यालयस्य" समपेक्षितैका रूपरेखा प्रदत्ता मयेति। रूपरेखान्तामधिकृत्य लखनऊ-विश्व-विद्यालये संस्कृत-विभागाध्यक्षपदं कलासङ्कायाधिष्ठातृपदं (डीनपदं) उपकुलपतिपदं च विभूष्य वाराणसेय संस्कृत-विश्वविद्यालयोपकुलपतिपदमपि च पूर्वमलङ्कृतवता को० अ० सुब्रह्मण्य अय्यरमहोदयेन मल्लिखितं मन्तव्यं प्रदत्तमिदानीं तत्प्रतिलिपिः प्रेष्यते। विद्वत्संमेलने तस्मिन् गन्तुमशक्नुवता तावदय्यरमहोदयेन स्वकीया शुभकामना प्रोषितासीदिति कृत्वा तन्मन्तव्यमपीदं शक्यते समुपयोगे नेतुं प्रतिवेदनसमित्या भवदीययेति।

प्राच्य-संस्कृतविभागः

लखनऊ-विश्व-विद्यालयस्य

भवदीयः

आनन्द झा

सत्या प्रतिलिपिः

दृष्टा मयेयमाचार्यानन्दझामहोदयसमुत्प्रेक्षिता संस्कृतविश्व-विद्यालयस्य रूपरेखा। अर्थशास्त्रकृदाचार्य-कौटिल्यसम्मतान्वीक्षिकी - त्रयी-वार्ता-दण्डनीति-रूपविद्याचतुष्टयमाश्रितेयं रूपरेखा सर्वथा संस्कृत-विश्व-विद्यालयानुगुणा प्रतिभाति। परिस्थित्यनुरूपमन्येषामपि विभागानामस्यां रूपरेखायां स्थानस्प्रकल्पितमित्यस्या विशेषः। एतदालम्ब्य विचारं कृत्वाऽऽवश्यकानि संशोधनानि च सम्पाद्य कार्यरूपेण परिणमयितव्येति मन्यते।

भूतपूर्व-उपकुलपतिः
लक्ष्मणपुर विश्व-विद्यालयस्य
वाराणसेयसंस्कृत-विश्व-विद्यालयस्य च।

को० अ० सुब्रह्मण्य अय्यरः
१२।४।६८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संस्कृत-विभागः

लखनऊ-विश्व-विद्यालयः

दिनाङ्कः ६ । ४ । १९६८ ई०

डॉ० शिवशेखरमिश्रः

एम० ए० (संस्कृत, अङ्ग्रेजी, भारतीय-संस्कृति) एल० एल० बी० पी० एच० डी० डी० लिट्

श्रीमन्तः प्रतिवेदनसमितेः संयोजक-महोदयाः

नेपाले प्रस्तावितस्य संस्कृतविश्वविद्यालयस्य रूपरेखा कीदृशी भवेत् इत्यत्र विषये मया बहु विचारिता । विचारयता च मया इदमेव निर्णीतं यत् लखनऊ-विश्वविद्यालयप्राच्यविभागप्रधानैः श्रीआनन्दझामहोदयैः स्थिरीकृता रूपरेखैव सर्वथा साध्वी । अतस्तामेव स्वाभिमतां ज्ञापयामि पुरतः प्रतिवेदनसमितेः इति ।

भवदीयः

शिवशेखरमिश्रः

नेपालदेशे संस्कृत-विश्व-विद्यालयस्य सञ्चालनाय निम्न-निर्दिष्टा अधिकारिणोऽपेक्ष्यन्ते:—

कुलपतिः, उपकुलपतिः, प्रस्तोता (Registrar) सहायक-प्रस्तोता, निर्देशकः, प्रधाननिरीक्षकः, मुद्रणालय-प्रबन्धकश्च ।

तत्रोपकुलपतेरेव विश्व-विद्यालयसञ्चालनाधिकारस्स्यात् यद्यपेक्षा स्यात्तर्हि परामर्शदातृत्वेन द्वौ शिक्षा-शास्त्रिणौ नियोक्तुं शक्येते ।

उपकुलपति-निर्देशानुसारं प्रस्तोता व्यवस्थासबन्धीनि सर्वाणि कार्याणि पश्येत् प्रस्तोतृ-निर्देशानुसारं सहायक-प्रस्तोता परीक्षाकार्याणि सम्पादयेत् ।

निर्देशकः—विश्व-विद्यालय सम्बन्धिषु विद्यालयेषु पाठ्यक्रमं निर्द्धार्य निरीक्षक-मुखेन परिचालयेत् । एवमनुसन्धानार्थं विषयान्निर्द्धार्य तत्र योग्यानध्यापकान्नियोज्य तैर्विरचितान्निबन्धान् मुद्रणालय-द्वारा प्रकाशयितुं व्यवस्थां कुर्यात् । पाठ्य-पुस्तकान्यपि दुर्लभानि सम्पादयितुं विदुषो नियोजयेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पाठ्यक्रमः

प्राचीनैः प्रवर्तितानां चतुर्दशविद्यास्थानानां यथायथमध्यापनाय प्रबन्धः कार्यः। तेषु विद्यास्थानेषु वेदानां सांगानां यथाविध्यध्यापने विशेषतो दृष्टिरावश्यकी। नेपालदेशे यस्य वेदस्य या शाखा विशेषतः प्रचलिता वर्तते तस्या अध्यापनमावश्यकम्। प्रथमं मूलभागं तदनु विकृतिपाठब्राह्मण्याप्य वर्षत्रयेणांगाध्ययनं समापनीयम्। नेपाले प्रचलितशाखातिरिक्ता याश्शाखास्तासामप्यध्ययनाय छात्रान् भारते सम्प्रेष्य तत्तन्मूल-भागाध्ययनाय व्यवस्था विश्व-विद्यालय-द्वारा कर्तव्या। तत्रातिरिक्ता याश्शाखास्ता वेदान्तरीया एव भवेयुः न स्ववेदीयाः। अस्यायं परिणामस्स्यात् यत्कालान्तरे चतुर्णामपि वेदानामुपलभ्यमानासु शाखासु पारंगता विद्वांसः नेपाले संरक्षिता भवेयुः। वेदाध्यायिनश्छात्रा एव कर्म-प्रयोग-ग्रन्थानपि शिक्षित्वा स्मार्तानां कर्मणामनुष्ठापने यथा समर्था भवेयु स्तथा सम्पादनीया :।

एतेषु केचन श्रौतकर्मणां दर्शपूर्णमासादीनामप्यनुष्ठानेऽनुष्ठापने च प्रावीण्यं सम्पाद्याहिताग्नयो भूत्वा विश्वविद्यालय एव समुचिते स्थाने तिष्ठन्तः प्रत्यहं यथाविधि कर्माण्याचरेयुः।

छात्रावासे निवसन्तश्छात्राः शास्त्राध्यायिनो वा वेदाध्यायिनो वा नियते समये सन्ध्योपासनं गायत्रीजपं विशिष्टमन्त्रजपञ्च सनियमं यथा कुर्युः तथा एतत्संबन्धिनोऽध्यापका जागरूका भवेयुः अन्ततः केचन छात्रा एतादृशास्सम्पादनीयाः यैश्च कालान्तरे मन्त्रसिद्धेः, देवतासिद्धेश्च फलमाविष्क्रियेत।

वेदसम्बन्धिन्यः परीक्षास्सर्वा अपि वाचिक्यः प्रयोगात्मिक्यश्च भवेयुः। परीक्षायाः परिणामोऽयं भवेत् यद् अधीतस्य वेदस्य कर्मकाण्डप्रयोगस्य च वाचो विधेयता स्यात्। एतदर्थं पृथग् भवनानि कल्पनीयानि यान्याश्रमरूपाणि भवेयुः।

शास्त्राणामध्यापनं तथा सम्पादनीयं यथा निर्दिष्टे समये। नियतान् ग्रन्थान् समधीत्य तत्र तलस्पर्शि वैदुष्यं छात्रा अवाप्नुयुः। तस्य तस्य शास्त्रस्य पाठ्यक्रमनिर्द्धारणाय तत्तदभिज्ञानां कुशलानां विदुषां समितिरायोजनीया। तेऽप्यल्पानेव ग्रन्थान् पाठ्यक्रमे निर्द्धारयेयुः।

शास्त्रि-परीक्षा-पर्यन्तं राजनीतिः, अर्थशास्त्रम्, इतिहासः एतेष्वेकः देशभाषा भारतीयभाषास्वेका चेति यथायथं विषयास्समावेशनीयाः। समावेशश्च तथा कर्तव्यः यथा हि संस्कृतस्य न्यूनता न स्यात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्यां श्रेण्यां परीक्षा लेखनवाचिकाभ्यां परिचालनीयाः वाचिकपरीक्षा अधीतग्रन्थानामध्यापनरूपा सम्पादनीया। संस्कृतमाध्यमेनैवाध्यापनमावश्यकम्। अस्यां श्रेण्यां छात्रास्तथा भवेयुः यथा हि ते भाषणे लेखने च शब्ददारिद्र्यं नानुभवेयुः।

आचार्य श्रेण्यां तु विषय एक एव भवेत्। पुस्तकानि काममल्पान्येव वर्तितुमर्हन्ति किन्तु तेषामध्ययनं समीक्षात्मकं वैदुष्यसम्पादकञ्च यथा स्यात्तथा क्रमः कल्पनीयः। अध्ययनावसर एव शास्त्रान्तरैः सह येषां विषयाणां वैमत्यमस्ति तेषु शास्त्रार्थकरणेऽप्यभ्यासः कर्तव्यः। अत्रापि परीक्षाः पूर्ववदेव भवेयुः। स्वविषयेण सह शास्त्रान्तर-प्रकरण-ग्रन्थानामप्यध्ययनमनिवार्यं सम्पादनीयम्।

शास्त्रिश्रेण्यां स्वस्वविषयेण सह व्याकरणं साहित्यं न्यायञ्च सन्निवेश्य पाठ्यक्रमः प्रवर्तनीयः।

आचार्यसमाप्त्यनन्तरं वर्षद्वयेन तथा शिक्षा प्रवर्तनीया यया चाधीतान् ग्रन्थान् नूतनांश्च ग्रन्थान् सम्यगध्यापयितुं प्रभवेयुश्छात्राः। अयमेको मार्गः।

अपरश्च लेखन-प्रावीण्य-सम्पादने यत्नो विधेयः। येन छात्राः कञ्चनविषय-मादाय समीक्षात्मकं निबन्धं लिखितुं दक्षा भवेयुः।

इतोऽप्यपरः कश्चन सर्वसाधारणः पाठ्यक्रमः परिचालनीयः येन नेपाला-भिजनस्सर्वोऽपि संस्कृतज्ञानवान् भवेत्। अस्मिन् पाठ्यक्रमे इतिहास-पुराणेभ्यः, धर्मशास्त्रेभ्यः, नीतिग्रन्थेभ्यः, काव्यनाटकादिभ्यः स्तोत्र-ग्रन्थेभ्यः, तर्कग्रन्थेभ्यश्च सरला भागाः सङ्कलनीयाः। छात्रस्य षोडशे वर्षेऽयं पाठ्यक्रमो यथा समापितः स्यात्तथा श्रेणीषु विभज्य समावेशनीयः।

कन्या-पाठशालाः पृथक् प्रवर्तनीयाः। सहशिक्षां विना यथा कन्याः प्राचीन-संस्कृतौ इतिहास-पुराणादिषु, व्याकरणे साहित्ये च समुचितं ज्ञानमवाप्नुयुः तथा प्रयत्नः कार्यः एतदर्थं पृथगेव पाठ्यक्रम आवश्यकः।

तन्त्र-विद्यायास्संरक्षणमपि विश्वविद्यालयद्वारा कथञ्चित्कर्तव्यम्।

चै०शु० ३—२०२५

हरिरामशुक्लः

पट्टाभिरामशास्त्री

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगुरुः शरणम्

नयपालदेशान्तर्गते दांगप्रदेशे विद्वत्सम्मेलनावसरे गतवता तत्र संस्कृत-विश्वविद्यालयस्थापन-प्रस्तावोऽवगतः। तद्विषये स्वीयोऽभिप्रायो निवेद्यते।

(क) नयपालदेशीयानां संस्कृताध्ययिनां छात्राणां बाहुल्यात् तत्र संस्कृत-विश्वविद्यालयोऽपेक्षितो वर्तते।

(ख) तदर्थमुपयुक्तं स्थानं किं भवितुमर्हतीति निश्चितरूपेण तत्रत्यां सर्वविधां परिस्थितिं जानाना एव वक्तुमर्हन्ति। तथापि यावदस्माभिरवगतं तदनुसृत्येदं वक्तुं शक्यं यत् तत्रत्यं वातावरणं संस्कृताध्ययनस्य कृते उपयुक्तमस्ति।

योऽहेरिव गणाद्भीतः मिष्टान्नाद् गरलादिव।
राक्षसीभ्य इव स्त्रीभ्यः स विद्यामधिगच्छति॥

इत्युक्तरीत्या ब्रह्मचर्य्याश्रमसदृशं तत्स्थानं सात्त्विकीनां संस्कृतविद्यानामध्ययनाध्यापनयोः कृते उपयुक्तं प्रतिभाति।

ज्ये० शु० ८ सं० २०२५ **हरेरामशुक्लः**

श्रीः

श्रीयुतवन्दनीयनिर्देशकादिमहाभागाः

जनतामहाविद्यालयदांग नेपालस्य।

मदीयेयं कामना ईश्वरे याचना च यद् वयमुपदर्शितदांगस्थले सर्वविधसौविध्यसम्पन्नस्य श्रीविश्वविद्यालयस्य तत्र प्राप्तोदयस्य प्राप्तेन विलोकनेन कृतार्थंकल्पाः स्याम इति।

यतः स्थलमिदं मह्यमत्यन्तमरोचत श्रीविश्वविद्यालयस्य कृते, यतस्तत्र न अतिनागरिकता-प्रयुक्त-विघ्नशंका, न च नागरिकताऽभाव-प्रयुक्तविज्ञानस्वरूपयोग्यताशून्यतया विहिताध्ययननिमित्तकप्रयत्नस्य फलशून्यत्वशंका।

तादृशस्थलस्य विश्वविद्यालयार्थमुचितत्वं न भवति चेत् स्थलमेव नेपाले न लभ्यते यत्र विश्वविद्यालयोचितत्वं स्यात्।

नेयं धर्मभूमितया प्रसिद्धा भूमिरिति चेत् कस्याश्चन भूम्या धर्मभूमित्वं सहजं नैमित्तिकं वा पूर्वपक्षे विनिगमनाविरहः। उत्तरपक्षे च न प्रतिबन्धः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंच करपात्रिमहोदयादिसदृशमुनिकल्पानेकजनसंसर्गप्राप्त्या धर्मभूमित्वं दांगभूम्या अर्जितमेवास्तीति कुतो विस्मर्यते ?

अध्ययनपद्धतिविषये तु—

यदुक्तं करपात्रिमहोदयैस्तन्मह्यमतीव रोचते । अन्तिमकरपात्रिमहोदयभाषणतः पूर्वं यदि मया भाषणावसरः प्राप्तोऽभविष्यत्तदा तादृशमेव भाषणं मया विहितमभविष्यत् यादृशं भाषणं करपात्रिमहोदयैरन्तिमावसरे व्यधायि ।

मादृशजनतोऽपि दर्शितमार्गतो यदि काचन विश्वविद्यालयोपयुक्तसहायता विधातुं शक्येति भाति भवतां तर्हि अहं यदि तदर्थं सूचितो भवेयं तदा स्वमुपकृतं मंस्ये ।

स्वाभिप्रायनिवेदने जातस्य विलम्बस्य विषये क्षमां प्रार्थयमानोऽस्मि ।

श्रीयुतगुरुपादेष्वनन्ता दण्डवत्प्रणतयो विलसन्तुतमां मदीया इतरसुहृत्सु नतयस्तथैव सन्तु ।

अशुद्धिषु अनेकासु सतीष्वपि नाहं चिन्तायुतोऽस्मि यतः भवत्सन्निधिसम्प्राप्त्या सर्वा अपि अशुद्धयो विलीनाः स्युरेवेति ।

यदि वयं दांगसदृशोपयुक्तभूम्यां विश्वविद्यालयनिर्माणे न सफलीभवेम तदा अस्माभिःकाऽप्याशा न करणीया यद्वयं कस्मिन्नपि कार्ये सफलीभवितुं शक्ष्याम इति । विस्तारजालं संगतिकाल एव स्यात् शुभम् ।

अपराधक्षमायाचकः भवत्कः

दामोदरशर्मा न्यायाचार्यः

श्रीमन्निदेशकाः पण्डितप्रवरा विद्वांसः

प्राप्ता सम्मत्यर्थं प्रेषिता सूचना । प्रस्तावित-संस्कृत-विश्वविद्यालय-विषयेऽयमस्ति ममाशयः ।

आधुनिक (टेक्नोलजी-साईन्स आदि) विद्यानां समावेशस्तु सर्वव्यवहारसिद्धयर्थं सर्वत्राकुण्ठितज्ञानवृद्धयर्थञ्चावश्यं करणीयमेवात्र न किमपि (कोऽपि) सन्देहः । परं भावुकबुद्धया नैवात्मसमर्पणं तस्मिन्-कर्तव्यम् । किन्तु ते सर्वेऽपि विषया आत्मसात्करणीयाः खलु । यथा भेरी-कर्णाल्याद्या नद्यादयः सरयूनद्यामात्मसात्भूताः स्वनामरूपे विहाय "सरयू" इत्येवाभिधां लभन्ते, तथैव तेषां नामरूपे आत्मसात्कृत्वा स्वनाम्नैव व्यवहारः कर्तव्यः । विद्यन्ते हि तेषां मूलान्यस्माकं वैदिकवाङ्मये । यतोऽस्माकं वैदिकसाहित्यानुसन्धानेनैव तैर्विकसिताश्च ते नव्या विषयावभाषाः (साः) स्वनाम्ना व्यवहृताश्चेति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपरञ्च प्रस्तावितविश्वविद्यालयान्निःसृताः स्नातकाः कर्तव्यपरायणाः सदाचारनिष्ठा देशनरेशभक्ता मातापितृसेवका दीनोद्धरणे संलग्नमनसो धर्मवीराः सर्वत्रात्मदर्शनक्षमा येन भवेयुस्तादृशः प्रयत्नो विधेयः । एतदर्थं काचन कक्षा शिशुशिक्षार्था विधेया यतो बाल्यात्प्रभृत्येव तस्मिन्नवे भाजने लग्नः संस्कारो नान्यथा भवेदित्योम्

स्वामी ईश्वरानन्द

गीता—प्रचार आश्रम सरस्वती

अखडा स्वयम्भू

काठमाण्डू (नेपाल)

प्रतिवेदकेभ्य इदम् ।

श्री पं० देवराजोपाध्यायः

तोलेश्वरनाथराजकीयसंस्कृतप्रधानपाठशाला

कपिलवस्तु

श्रीमदध्यक्षाः

प्रतिवेदनसमितेः ।

श्रीमताम्पत्रमवाप्याऽनुगृहीतोऽस्मि । मदीयन्तावद्विचारमस्मिन्नेव पत्रे विलिख्य प्रेषयन्नस्मि ।

दाङस्थजनतामहाविद्यालयभवनप्राङ्गणे परुदन्ताराष्ट्रियसंस्कृतविद्वत्सम्मेलनमातम् । यत्र दैशिकानाम्वैदेशिकानाञ्च ज्ञानवयोवृद्धानां विपश्चितां संस्कृताऽनुरागिणाम्बहूनामप्यन्येषामुपस्थितिरासीत् । दिनत्रयव्यापकस्यास्य सम्मेलनस्य समुद्घाटनन्तत्र भवताम्भवतां सनातनधर्मरक्षाव्रतिनां हिन्दूराष्ट्रनायकानां पञ्चश्रीसमलङ्कृतानां श्रीमन्महाराजाऽधिराजानां करकमलैः सुसम्पन्नमिति सम्मेलनमिदं सुवर्णसौरभायितम् ।

अस्माकन्नेपालदेश ऐतिहासिकमिदं सम्मेलनं यद् यत्र सर्वप्रथमं श्रीमच्छङ्कराचार्यमहाभागाः करपात्रस्वामिपादाः सोमनाथपण्डितराजाः नरहरिनाथयोगिनस्तथा चान्येऽपि बहवो विद्वांसःसंस्कृतजीवनानां श्री ५ राष्ट्रनायकानां सुसन्निधौ "सनातनधर्मः सनातनसंस्कृतिः तदुभयोः संरक्षकं हिन्दूराज्यम् तस्य चाऽऽधारस्तम्भस्वरूपं संस्कृतवाङ्मयं साहित्यञ्च सर्वेषां संरक्षणपरिवर्धनप्रसारोपायः" इति एतादृशेषु बहुविधविषयेषु श्रुतिस्मृतिपुराणोपनिषदुहाहरणप्रत्युदाहरणोहापोहसंव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लितम्भाषणमकुर्वन् । विविधाः समस्याः समुपस्थापिताः समाधानञ्च विहितम् । सम्मेलने समुपस्थिता दशसहस्राऽधिकाः संस्कृतसंस्कृतिप्रियाः सभ्याः प्रतिदिनं तत्सर्वाश्चर्चाः परिचर्चाश्च कर्णगोचरीकुर्वन्तः स्वान् धन्यानमन्यन्त । सर्वं तावत्सम्मेलनसहयोगिनो विशेषतस्सम्मेलनाऽऽयोजकसमितिसदस्याः सन्ति बहुशो धन्यवादभाजः । अस्माकं संस्कृतसमाजस्तेषामाधमर्ण्यं वहन्नास्ते ।

सम्मेलनस्यान्तिमे दिवसे नेपालराष्ट्रस्य अत्र संञ्चालितायाः शासनव्यवस्थायाः विश्वस्मिन्नेकमात्रं हिन्दूराष्ट्रमिति गौरवस्य परिरक्षणाय देशे संस्कृतविश्वविद्यालयस्याऽऽवश्यकत्वमस्ति इति प्रस्तावितः पारितश्च सर्वसम्मत्या । विद्वत्सम्मेलनस्यास्य सत्सु बह्वीष्वपलब्धिषु एष एव पुरः फलमिति विचारयामि ।

अस्मद्देशीयाः सहस्रशो युवानः स्वदेशे संस्कृतपठनपाठनसौकर्यमनवाप्य प्रतिवर्षं भारतभुवं प्रधावन्ति । भारते यत्र यत्र तावत् संस्कृतशिक्षणसंस्थाः प्रचलन्ति यथा वाराणस्याम् देहल्याम् लक्ष्मणपुरे पाटलिपुत्रके कर्णपुरे मथुरायाम् वृन्दावने नागपुरे हाथरसे अलीगढ़े गोरक्षपुरे मोहमय्याम् कालिकतायाम् कति गणयामः प्रायः सर्वेषु प्रान्तेषु सर्वासु नगरीषु प्रतिमासं पञ्चषरूप्यकाणां सहायतां लब्ध्वाऽध्ययनं कुर्वन्ति । जीर्णशीर्णं वस्त्रं क्षीणा गौरा चाकृतिः पादुकाविहीनौ चरणौ तेषामेतदेव चिन्हम् । ये खलु स्वीयां युवावस्थां विदेशे स्थित्वा यापयन्ति तत्रैव च सभ्यतां भाषां विचारं संसर्गञ्च पठन्ति कुर्वन्ति च श्व एव स्वदेशं परावृत्य स्वानुकूल्येन सञ्चालनीयं शासनधुरं समाजधुरं च स्वकीये स्कन्धे निहितुं कथङ्कारं समर्थाः भविष्यन्ति । मातापितरौ देशं आत्मीयञ्च परित्यज्य ते वराकाः दीनहीनाः विचरन्ति वयमद्यापि तान् दृष्ट्वा जीवामः श्वसिमः स्वदेशं स्वगौरवञ्च समुन्नयामः । भौतिकविज्ञानाध्येतॄणां कृते यादृशं सौकर्यं देशे विदेशे वा छात्राः प्राप्नुवन्ति न तथा संस्कृताध्येतारः । प्रसङ्गेऽस्मिन् म०वि०वि० साहस्यैका गीतपंक्तिः स्मृतिपथमायाति । "शक्नोमि नैव द्रष्टुं वत सन्ततिर्विभिन्नेति ।

परन्त्वत्र मन्ये यत्संस्कृतविश्वविद्यालयस्तावत् निर्माणाऽधीनोऽस्ति संस्कृताध्येतॄणां कल्याणाय भविष्यति विदेशं परिभ्रमतां छात्राणां प्रत्यावर्तनाय प्रभविष्यति ।

किञ्च विश्वविद्यालयोऽयं संस्कृतवाङ्मयस्य साहित्यस्य च तथा प्रसारं प्रचारञ्च करिष्यति यथा हिन्दूराज्यस्य हिन्दूसंस्कृतेश्च संरक्षणं परिवर्धनं च स्यात् । अस्माकं नीतिरस्माकं व्यवस्थाऽस्माकं परिपाटी च यावच्चन्द्रदिवाकरौ स्थिरा सुदृढा च भविष्यतीति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुनश्च प्रतिवेदकसमितिमेतदपि स्मारयामि यद् संस्कृतविश्वविद्यालयस्य निर्माणमपि तत्रैव स्यात् यत्र संस्कृताऽनुरागिणां महता प्रयासेन आध्यात्मिक-सम्मेलनं संस्कृतविद्वत्सम्मेलनञ्च जातम्। इदमेव स्थानं पर्वतीयानां मध्यदेशीयानां च कृते समुचितं तत्रोभयेषां कृते कल्याणावहौ जलवायू। तदेव शान्तं स्थानं शिक्षा-प्रसारायोपयुक्तम् आर्थिकी समस्याऽपि तत्र विश्वविद्यालये निर्मिते सरलैनैव पथा समाहिता स्यात्।

अन्त्ये पुनरेकवारं संस्कृतोत्थानाय वपुषा मनसा धनेन च सहयोगं कुर्वतः सर्वान् धन्यवादमभिधाय विरमामि।

इति 'शिवम्'।

श्रीः

अये संस्कृत-भारती-प्रीतिजुषो महान्तः आदरणीया विद्वांसः ?

सार्वभौम-सत्ता-सम्पन्ने हिन्दूराष्ट्रे नेपाले विश्वस्यैव कल्याणकारिण्याः समस्त-भाषामूर्धन्याया अस्याः संस्कृतभाषाया विश्वविद्यालयो भवतीति महान् प्रमोद-विषयः।

परन्त्वद्यत्वे पाश्चात्त्य-शिक्षया विदूषितमनसां विचार एतस्याः प्रातिकूल्ये सम्भवति। आक्षिपन्ति च ते भाषेयं कठिनेति तस्मान्नवीनसमाजे संस्कृतभाषां प्रतिष्ठापयितुमिच्छुकैरस्माभिर्य्यवहारार्हाः सरलाः शब्दाः प्रयोजनीयाः, यया रीत्या सौविध्यं सर्वेषामभरुचिकरा च भवत्वियं भाषा।

अस्याः संस्कृतभाषायाः श्रुतिस्मृतिपुराणेतिहासकाव्यादिग्रन्थेषु यद् भाव-गाम्भीर्यं विद्यते न तदपरभाषाग्रन्थेषु। तेषां ग्रन्थानां सरलतमाभिर्नेपालीप्रभृतिभि-र्भाषाभिरनुवादो विधेयः। यतो हि सर्वे मानवाः संस्कृतवाङ्मयस्य गुणगौरवं जानीयुः। तथा च जायमाने तस्मिन् संस्कृत-विश्वविद्यालये नेपालस्य सर्वेषा-मपि ब्रह्मचर्याश्रमाणां संरक्षणाय समुन्नत्ये च काऽपि व्यवस्था सम्यग्विधेया।

स्वसंस्कृतेः संस्कृत-भाषायाश्च प्रचाराय संरक्षणाय च गण्डक्यञ्चल-कास्की-मण्डलान्तर्गत-हेमजाग्रामे २०२१ वैक्रमाब्दतः "श्री ऋषिकुल आश्रमः,, संस्थापि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तोऽस्ति । तस्याश्रमस्य सर्वेऽपि वयं जायमानस्य संस्कृत-विश्वविद्यालयस्य सफलतायै समोदं शुभेच्छां समर्पयामः शमिति । जयतु संस्कृतम्

ऋषिकुलाश्रमः
२०२५।१०।२०
पूर्णिमा ।

लक्ष्मीशरण-उपाध्यायः, नव्यव्याकरणाचार्यः
प्रधानाचार्यः, श्रीऋषिकुल-आश्रमः,
हेमजा पोखरा गण्डकी अञ्चलम्

कृत-श्रद्धेय-संकल्पाः

संस्थापक-महोदयाः ?

नमस्कारादिकं पूर्वं गृह्यतामर्पितं मया ॥
श्रुत्वा दाङ्गाभिधे स्थाने विश्वविद्यालयाभिधा ।
संस्था संस्थाप्यते शीघ्रमित्यहं चास्मि हर्षितः ॥
मदीया धारणा तस्मिन् विषये यास्ति, साम्प्रतम् ।
अस्मिन् पत्रे लिखाम्यद्य कृपया सा विचार्यताम् ॥
यस्य देशस्य भूगोलं संस्कृते लिखितं स्थितम् ।
इतिहासादिकं तथ्यं पूर्णं यस्यास्ति संस्कृते ॥
यद्-विश्वस्मिन्ननन्यच्च हिन्दुराष्ट्रं सुघोषितम् ।
तत्र संस्कृत-शिक्षाया महत्त्वे किमु वर्ण्यते ॥
तथापि संस्कृता भाषा सुप्तेवास्त्यधुना खलु ।
हिन्दवोऽपि न जानन्ति तस्या माहात्म्यमद्भुतम् ॥
मन्यन्ते वर्तते तत्र कर्मकाण्डादि केवलम् ।
वदन्ति संस्कृतं पूजा-पाठानामेव वाङ्मयम् ॥
तत्र भूगोल-विज्ञान-खगोल-ज्यौतिषादिकम् ।
भौतिकं नैतिकं काव्यं गद्यपद्यादिमण्डितम् ॥
आन्वीक्षिकी-त्रयी-वार्ता-दण्डनीति-प्रसङ्गतः ।
सर्वमेवास्ति यद्भाव्यमिति जानन्ति नैव ते ॥
संस्कृतस्याखिलं विश्वं क्षेत्रं तत्रापि मुख्यतः ।
नेपाल-भारतौ देशौ संस्कृतस्य प्रकीर्तितौ ॥
भारते यवनाङ्ग्लानां शासने संस्कृतं हतम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वतन्त्रेऽप्यत्र नेपाले सुप्तं भारत-हेतुना ।
"उत्थातव्यं जागृतव्यं योक्तव्यं भूतिकर्मसु"
"उत्तिष्ठ हे कापुरुष मा स्वाप्सीः शत्रुनिर्जितः"
"आयसं हृदयं कृत्वा मृगयस्व पुनः स्वकम्"
"वयमाश्रयणीयाः स्मो न कदाचित्तथाश्रिताः"
"एतद्देश-प्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः"
"क्षुद्रं हृदय-दौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप"
"तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृत-निश्चयः"
इत्यादिकैर्महावाक्यैः प्रेरयन्ती सती जनान् ।
निगंताभ्यः शताब्दीभ्यो भाषेयं खलु रोदिति ॥
धन्या यूयं श्रुतो यैर्यैर्भाषायास्तादृशो रवः ।
धन्यो दाङ्गोऽपि यत्रास्ति विश्वविद्यालयस्थितिः ॥
विद्वत्सम्मेलनं धन्यं निर्णीतं येन तादृशम् ।
नेपालिनो वयं धन्या येषां काले भवेदिदम् ॥
काञ्चित् सम्मतिमत्रापि लेखितुमुत्सुकोऽस्म्यहम् ।
उपयुक्ता लगेच्चेत्सा तत्र प्रयुज्यतामपि ॥
उपाधिर्वा परीक्षायाः क्रमो वा संस्कृते भवेत् ।
किञ्चित् संशोधनं कार्यं कक्षाणां सूचके क्रमे ॥
यथाऽद्य प्रथमा नाम परीक्षा दीयते यदि ।
द्वितीया वा तृतीया वा परीक्षा किं न दीयते ? ॥
तथा हि मध्यमायाश्च पूर्वार्धे पूर्वमध्यमाम् ।
उत्तरार्धे वदामो यत् तथैवोत्तर-मध्यमाम् ॥
पूर्वोत्तरे दिशोः संज्ञे यदि चात्र समागते ।
कथं समागते नैव पुनर्दक्षिण-पश्चिमे ? ॥
सामान्यानां भ्रमस्थानमुपयुक्तं तथापि च ।
गाम्भीर्येण विचार्यैतत् क्रियतां परिवर्तनम् ॥
आरम्भात् प्रथमां यावद् कक्षासंज्ञा विधीयताम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मध्यमापूर्व-भागस्य योग्या संज्ञा प्रवेशिका ॥
मध्यमोत्तर—भागस्य संज्ञा भूयाद् विशारदः ।
भूषणं वाऽपि रत्नं वा ज्ञानी वाऽपि विचार्यताम् ॥
शास्त्र्याचार्य—पदे नैव परिवर्तनकाङ्क्षिणी ।
पाठ्यक्रमस्तु तत्रापि परिवर्तनमीहते ॥
पी० एच्० डी० वा वि० एड् एम् एड् डाक्टराद्या उपाधयः ।
सुखोच्चार्याक्षरैर्युक्ता विकल्प्यन्तां विवेकतः ॥
भाषातिसरला कार्या केवलं ज्ञानवृद्धये ।
शब्दज्ञानाय सर्गेऽपि शब्दाः पाठ्याः प्रयत्नतः ॥
परीक्षायाः प्रणाली च यास्ति प्रचलिताऽधुना ।
सा दोषबहुलाऽस्तीति तत्रापि चिन्त्यतां बुधैः ॥
संस्कृतादन्य—भाषासु ह्यनुवादं विधाय वा ।
संस्कृते चान्य-भाषाभ्योऽप्यनुवादं विधाय वा ।
संस्कृते मौलिकं ग्रन्थं गद्ये पद्ये विरच्य वा ॥
विषये संस्कृतस्यान्यभाषासु च विलिख्य वा ॥
विश्वविद्यालयोद्देश्यं यः पूरयितुमुद्यतः ।
आचार्यपदवीं लब्धुमधिकारी स एव हि ॥
सर्वमाधुनिकं रम्यमिति केऽपि वदन्ति चेत् ।
सर्वं पुरातनं रम्यमिति चान्ये वदन्ति हि ॥
विश्वविद्यालयोऽयं तद् विविच्य तद्द्वयोर्मतम् ।
समन्वितविधिं सृष्ट्वा सर्वशान्ति-करो भवेत् ॥
ह्रासोन्मुखोऽस्ति सर्वत्र हिन्दुधर्मोऽपि साम्प्रतम् ।
दृश्यते हिन्दुसंख्याऽपि शनैरल्पां दशां गता ॥
तत्र "कटुतरो वादो" हेतुरस्तीति तत्कृते ।
भाषायामिव धर्मेऽपि सारल्याय विचार्यताम् ॥
यस्यां यः स्नातको जातः प्रायस्तस्या हि रक्षणे ।
संल्लग्नो दृश्यते प्रायो मानवस्तेन हेतुना ॥
अथवा विश्वबन्धुत्वभावनाऽस्माकमेव हि ।
शास्त्रेषु दृश्यते सम्यक् घोषिता तेन हेतुना ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विश्वविद्यालयेऽत्रापि स्त्री-शूद्र-यवनादिकान् ।
सर्वांश्च मानवान् मत्वा पाठनीयान् विचारये ॥

किन्तु कन्या-कुमाराणां सहशिक्षा-विधिर्नवः ।
दोषवानस्ति वा ? तस्मात् तत्र किञ्चित् विचार्यताम् ॥

यथा संस्कृत-विद्वांसो भवेयुर्नैतिकास्तथा ।
जीविकायै च वा तेषां कष्टं मा भूत् यथा पुनः ॥

यथा संस्कृत-संस्कृत्योरुन्नत्यै संल्लगन्तु ते ।
तथा सम्यक् विचार्यैव कर्तव्या पाठ्ययोजना ॥

अत्रापि हेमजा-ग्रामे श्रीशुक्ला-गण्डकीतटे ।
पोखरा-नगरी-पार्श्वे संस्था-ऋषिकुलाभिधा ॥

संस्कृतेः संस्कृतस्यापि रक्षार्थं पञ्चभिः समैः ।
संचालितास्ति सा चापि शनैरङ्गं भविष्यति ॥

अथवा हिन्दूराष्ट्रेऽत्र या या संस्कृत-पोषिणी ।
संस्था भवेत् समग्रा सा तस्य शाखा भवेत् क्रमात् ॥

किन्तु पूर्वं यथा भूयाच्छात्र-संख्या सुवर्धिता ।
तथा कर्तुं प्रयासोऽपि कर्तव्य इति चिन्तये ॥

अस्तु केनाप्युपायेन संस्था संस्थाप्यतां लघु ।
दृढ-निश्चितकार्यस्य साफल्यमपि निश्चितम् ॥

अथवा भगवद्-गीता-वाक्ये गच्छति मे मनः ॥
'कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।

इत्यहं पोखरावासी मुकुन्दशरणाभिधः ।
विश्व-विद्यालयं द्रष्टुमुत्सुको विरमाम्यलम् ॥ इति ॥

संस्कृत-विश्वविद्यालयस्य प्रतिवेदन-समितये

अयं खलु परम-प्रमोदावसरः । यदद्यास्माकं देशे संस्कृत-विश्वविद्यालयः स्थाप्यते । बृहदाध्यात्मिकसम्मेलनेन संस्कृतविश्वविद्यालय-स्थापना-प्रस्तावः पारितः । विद्वत्सम्मेलनेन सं० वि० वि० पृष्ठभूमिः प्रतिष्ठापिता । अयमधुना संस्कृतविश्वविद्यालय उद्घाट्यते, इति कल्याणपरम्परा । उचितमिदमस्माकं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हिन्दुराष्ट्रे हिन्दुसम्राजा महेन्द्रेण भुवनेऽद्वितीयेन विधीयते। यत्नश्च विद्वज्जनैः सर्वजनतया चात्र कर्मणि विधातव्यः। सर्वेषां सहयोगेन संस्कृतविश्वविद्यालयो दांगे तथा स्थापनीयो यथासौ वैदिकार्य-संस्कृति-समुचितां हिन्दुराष्ट्रशोभनां च शिक्षां दातुं प्रभवेत्। शिक्षा च सा क्रियात्मिका भवेत्। परानुकारसारात्वत्वे प्रचलिता निष्क्रिया शिक्षा दोषबहुला वर्तत इति सम्यगामूलचूलं परिवर्तनमर्हति। न केवलं पाठ्यक्रम उपाधय एवापि तु शिक्षालक्षमपि सुधारमर्हति। न च साकल्येन पुरातनी न वा नवा सर्वात्मना, किन्तु नव-पुराण-सार-समन्वय-पूर्वकं मध्यमेनाध्वना संस्कृत-राष्ट्रभाषामाध्यमेन राष्ट्रोचित-चरित्र निर्माण-प्रवणा सक्रिया शिक्षा प्रदेया। यया वैदिकार्यजातीय-परम्परा सुरक्षिता भवेद्, यया च वर्तमाने भौतिके जगति व्यावहारिकाः स्नातकाः समुत्पद्येरन्। देशकाल-पात्रानुकूला क्रियाशीला शिक्षापद्धतिरेव राष्ट्रं स्वावलम्बं विधत्ते, धत्ते च मौलिकं स्वगौरवम्। हिमवत्खण्ड-प्रभवाः श्रुतयः स्मृतयश्चेतिहासपुराणादिकं निखिलमेव संस्कृतवाङ्मयं क्रमविकाशं प्रकाशयति युगे युगे। पुराणमित्येव न साधु सर्वं नचापि शास्त्रं नवमित्यवद्यं, तस्माज्ज्ञान-विज्ञानयोराध्यात्मिकाधिभौतिकयोः प्राच्यपाश्चात्त्ययोः सारग्राहिसमन्वयः सुतरामपेक्षित इति युगजनजीवनप्रयोजनम्। आशैशवादाचार्यकक्षा-पर्यन्तं शिक्षा-फलं नम्रतेत्यादि शिष्टताकर्मठताऽऽचारनिष्ठताराष्ट्रवादिता-नवनवाविष्कारिता-व्यवहारपटुता - शान्तिप्रियतोत्साहसम्पन्नता-विकाशशीलताध्यात्मिकता-प्रभृति-गुणगणभूषणा वीतदूषणाः स्नातकाः संस्कृतविश्वविद्यालयादस्मात् प्रभवन्तु। ये प्रकृति-सम्पदाढ्यां हिमवत्खण्डभूमिमेव न केवलामपि तु समग्रमेव भूमण्डलं मण्डयन्तो विद्यावदातमुखा दिङ्मुखानि सुखालोकैरालोकयन्तु चेति।

सम्मन्यन्ते—

रत्नाकर देवकोटा—उ० म० प्र० नव्यव्याकरणम् (यमला)
दानबहादुरभण्डारी—हुम्ला जि० पं० सभापतिः
श्यामलालशर्मा घिमिरे—शा० प्र० ख० (वेदः)
मनसादेवकोटा,
शुकदेवपौडेलः (नव्यव्याकरणाचार्यः) रा० पो० सं० प्र० पाठशाला अ०
रामजीलोहनी—देवपत्तन,
दुर्गाबहादुरः
डोरेन्द्रविक्रम राणा
क० प० टेकबहादुरथापा क्षत्री—फस्कू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पंचायत गोठाटार का० जि० रामशरण वोहोरा क्षत्री

गोविन्दहरिजंगम, (वृ० आ० प०)

धर्मवहादुरसिह वस्नेत,

अदनसिह कठायत रा० पं० स० जुमला ।

जि० स० स० महाशङ्कर देवकोटा कर्णाली अंचल तिवृकोट वोहोरा गाउं ।

कविदत्तदेवकोटा,

डा० गोकुलचन्द्रशास्त्री प्रोफेसर (काठमाण्डू)

उपप्रधान पं० शान्तसिहवस्नेत, गोर्खा ठिगुरेस्वारा,

नरेन्द्रमानसिह वस्न्यात, हरिमानसिह वस्नेत

विष्णुकान्त देवकोटा तिवृकोट, असिवोहोरागाउं क० अं

वैकुण्ठनाथखनाल फस्कू

नरेन्द्रकेशरी उपाध्याय (वृ० आ० प०)

संस्कृतविश्वविद्यालय-दाङ्ग, प्रतिवेदनसमिति

आजको यो जडवादले ग्रस्त गरेको विश्वमा अध्यात्मतर्फ ढल्काउने उच्च लक्ष लिएर खोलिएको यो संस्कृतविश्वविद्यालय त्यहाँमात्र आंशिकरूपमा न रहेर नेपालराज्यभर व्यापक बनोस् भन्ने मेरो शुभेच्छा छ ।

विज्ञानको अतिसूक्ष्म से सूक्ष्म खोजीद्वारा बल्ल पदार्थ र विद्युत् दुई तत्त्व रहेछन् भन्ने पत्ता लागि सकेको यो वैज्ञानिक संसारमा वैदिक संस्कृतको उत्थान सुनमा सुगन्ध हुनेछ । मानिस चेतनशील प्राणी हो । उसलाई ज्ञानको भोक छ । त्यो कुरा वेदमैमात्र प्राप्य हुने हुवाले हिन्दूपरम्पराको पुनरुत्थान ज्यादै सामयिक निर्विवाद छ ।

यिनै सवै कुरालाई साक्षात्कार गर्न यो विश्वविद्यालय सफल बनोस् मेरो परमात्मा संग यही एक जोडदार प्रार्थना छ ।

वद्रीनाथ पौड्याल

एम० ए० (अंग्रेजी)

बानेश्वर महादेवस्थान

काठमाण्डू

६ । ११ । २०२५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ॐ आत्मा खलु विश्वमूलम्

बृहद्दाध्यात्मिकपरिषद्

जनकपुराञ्चलशाखाकार्यालय, जानकीमन्दिरम्

धनुषा, जनकपुरधाम (नेपाल)

मितिः—शाके १८९० । ११ । १६ । ५

सांप्रतं संस्कृतभाषाया या दुरवस्था दृश्यते सा सर्वेषामेव साम्मुख्यमाकलयति कस्मिन्नपि विद्यालये सम्यक्तया सान्तर्बोधमध्ययनमध्यापनञ्च नैव चाल्यमानं दृश्यते प्रायः प्रतिशतं छात्राणां पञ्चैव यथोचितरीतिपूर्वकमधीयते छात्राः केवलमुत्तीर्णतैव प्रयोजनं मन्यते छात्रैः कारणानि बहूनि सन्ति तान्यपि सर्वैर्ज्ञायन्त एव, अस्माभिस्तु तेषु सर्वेषु कारणेषु मुख्यं कारणं सञ्चालकाभाव एव स्वीक्रियते यावत्पर्यन्तं संस्कृतविश्वविद्यालयः कुत्रापि प्रान्ते न स्थाप्येत तावत्पर्यन्तं संस्कृतविद्यायाः संरक्षणं नैव संभावितम् अत एव द्रागेव कुत्रापि संस्कृतविश्वविद्यालयः स्थापनीयः यद्द्वारा प्राचीनपरिपाट्या प्रौढपाण्डित्यप्राप्तये शिष्याः संघटनीयाः स्युः यथा महाभारतयुद्धोत्तरं धनुर्विद्या लुप्ता तथैव पाणिनीयं व्याकरणं ज्यौतिषं नव्यन्यायादिदर्शनशास्त्रं च सर्वमेव लुप्तं भवितुमुपक्रमते तदर्थमेव दाङ्गप्रान्ते जनकपुरप्रान्ते च संस्कृतविश्वविद्यालयस्य प्रस्तावः प्रवर्तितोऽस्ति आशासे द्रागेव श्रीश्रीप्रभुसर्वकारेण स्वीकृतिर्दास्यते अस्माभिरमन्द आनन्दः प्राप्येत यदा तस्यौपचारिकरूपेण स्वीकृतिः श्रूयेत अस्माकं सम्राट् श्रीश्रीमहेन्द्रश्चिरं जीव्यात् संस्कृतं रक्षेत् इत्येव श्री १०८जगज्जननीं प्रत्यहं याचे ।

जीवनाथझाशर्मा

जनकपुरवासी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ॐ आत्मा खलु विश्वमूलम्

बृहदाध्यात्मिक-परिषद्

जनकपुराञ्चलशाखाकार्यालय, जानकीमन्दिरम्

धनुषा, जनकपुरधाम (नेपाल)

मिति—०२५ । ११ । १६ । ५

प्रतिवेदनसमितये

स्वदेशविदेशविश्वविद्यालयविद्वज्जनसंमत्या राज्ञाऽपि दाङ्गे संस्कृतविश्वविद्यालयस्य स्थापनमङ्गीकृत्य समुद्घाटनमारब्धम् । तदभूतपूर्वं कार्यं महोत्सवं च बृहदाध्यात्मिकपरिषदो जनकपुराञ्चलशाखाऽपि सहर्षं सोल्लासं स्वीकुरुते परन्तु जनकपुरधाम्नि संस्कृतविश्वविद्यालयस्य औचित्यविषये प्रकाशिता सूचना पत्रमपि अस्मिन् पत्रे संलग्नमस्ति तस्मादत्रापि संकृतविश्वविद्यालयस्यानिवार्यापेक्षा वर्तते । अत्र विषये सर्वेषां ध्यानमाकृष्टुमिच्छामि । जनकस्य जानक्या याज्ञवल्क्यस्य वा कस्याप्यैतिहासिकस्य राष्ट्रियस्य जनस्य नाम्ना संकृतविश्वविद्यालयस्य नामकरणमुचितम् । राजधान्यां त्रिभुवनविश्वविद्यालयो विद्यते । पश्चिमाञ्चले दाङ्गे महेन्द्रजनतासंकृतविश्वविद्यालयो विद्यते । पूर्वाञ्चले जनकपुरधामनि संकृतविश्वविद्यालयोविद्यताम् । इत्थं त्रिधा संस्कृताध्यनाध्यापनानुसन्धानसुविधा धार्यतामस्माकं देशेनेति संमतिर्जनकपुराञ्चलवासिनां प्रातिनिध्येन बृहदाध्यात्मिकपरिषदीयजनकपुराञ्चलशाखासचिवपदेन दीयते ।

पुष्करनाथेन ठाकुरोपनाम्ना

सचिवेन

वृ. आ. प. ज. पु. अं. शा. का. जानकीमन्दिरं—

जनकपुरधाम्नः

२०२५–११–१६–५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुनिर्जयति योगीन्द्रो महात्मा कुम्भसम्भवः।
येनैकचुलुके दृष्टौ दिव्यौ तौ मत्स्यकच्छपौ ॥

दाङ्गे भाविनः प्रस्तावितमहेन्द्रसंस्कृतविश्वविद्यालयस्य विषयमधिकृत्य जनतामहाविद्यालयस्य केषाञ्चित्प्राध्यापकानामध्यापकानाञ्च संयुक्ता सम्मतिः—

१—हिन्दुधर्मसंस्कृतिसंरक्षकक्षात्रधर्मबलम्बिनेपालभूपालच्छत्रच्छायायां संस्थाप्यमानस्याभिनवसंस्कृतविश्वविद्यालयस्येदमेव लक्ष्यं मुख्यं भवेद्यदखिलज्ञान-विज्ञानराशेः पाश्चात्यविदुषामपि सर्वतोऽग्रजतया हृदयेनाभ्यनुज्ञातस्य वैदिकवाङ्मय-स्याध्ययनाध्यापनानुसन्धानादिकं तथा स्याद्यथा विश्वस्मिन् कामप्यपूर्वतां-म्प्रकटयितुं सौभाग्यमधुनापि लभ्येत।

२—भाषणाद् भाषा भवतीति हेतोः संस्कृतभाषायाः वस्तुतो भाषणरूपे सर्वजनसाधारणप्रचारं मुख्यलक्ष्ये निधाय समुद्भावितया सरलातिसरलया प्रयोगपद्धत्या शिक्षण ईदृशः प्रयत्नो विधेयो येनाल्पेनैव कालेन सस्नेहं संलपितुं संस्कृते साग्रहं जनाः प्रवर्तेरन् येन स्वत एव एतद्भाषानिबद्धानि गूढान्यपि रहस्यानि क्रमशो जिज्ञासेरन्।

३—ऐहिकसमृद्धौ सत्यामपि सर्वत्राशान्तेर्नग्ननृत्यं निवारयितुमभिमततरस्या-ध्यात्मिकज्ञानप्रसारस्य सम्वर्द्धनाय आर्यपरम्पराप्राप्तदर्शनशास्त्राध्ययनावश्यक-त्वेऽनिवार्येपि अद्यत्वे भौतिकयुगे परिस्थित्यनुसारमाध्यात्मिकदृशा सम्पोष्यमाणस्य भौतिकविज्ञानस्य प्राच्यपाश्चात्यमयस्य बोधे प्रयोगे वा परिस्थितिशोभनमग्रे-सरताविधाने विश्वविद्यालयप्रयत्नो नूत्नो नूनमनूनो भवेत्।

४—संस्कृतवाङ्मये ततः समुद्भूतलोकभाषास्वपि विलक्षणानामव्ययानामथ विकीर्णानामद्भुतविज्ञानानामेकत्र ग्रन्थरूपे सङ्गृह्य निबध्य संस्कृते परीक्ष्य च सम्यक्तया तथाध्यापनप्रयोगकौशलमापादनीयं यथा बहुव्ययसाध्याधुनिकविज्ञान-वन्तः साश्चर्य्या भवेयुः।

५—प्राच्यायुर्वेदिकमूलविज्ञानमुपेक्ष्यैलोपैथादिषु साग्रहं सस्नेहं प्रवर्तमानानाम्-मायुर्वेदे समुन्मुखीकरणाय नव्यानवद्यानुसन्धानपूर्वकमायुर्वेदस्याध्यापनमौषधनिर्माण-शल्यचिकित्सादिप्रायोगिकविज्ञानञ्च शास्त्रीयपद्धत्या विशेषतया सञ्चालनीये येनापाततः प्रतीयमाना न्यूनता अपाकृता भवेयुः अथ च यथापूर्वं ज्ञानगौरव-परावृत्त्या पुनः प्रतिष्ठामासाद्य यत्किञ्चिल्लाभलब्धनिर्वाहेण ज्ञानसन्तोषदोषं निराकुर्युरार्याः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६— सर्वा अपि आर्यनार्यो बालिकाः सुरभारत्यामेवाधीतिन्यः सत्यो वैदेशिक-पारतन्त्र्यपरम्पराप्राप्तहीनभावनाद्यज्ञाननिराकरणे यथा दक्षा भवेयुस्तथा सर्वाङ्गीणप्रयासोऽनिवार्यः स्यात् ।

७—तन्त्रशास्त्राध्ययनानुसन्धानेन सह क्रियात्मकज्ञानसिद्ध्यर्थं तान्त्रिका अन्विष्याध्यापनानुष्ठापनार्थं रक्षणीयाः एवङ्क्रियायोगस्यापि दैनिकजीवने ज्ञानवृद्धये प्रयत्नो विधातव्यो यस्य मानवजीवने सर्वदा सदुपयोगः स्यात् ।

८— अस्माकं देशस्य कृषिप्रधानतया प्र०संस्कृतविश्वविद्यालयस्य पाठ्यक्रमे कृषिविज्ञानसम्बन्धिविशेषाध्यापनानुसन्धानप्रायोगिकपरीक्षणानां व्यवस्थया सार्द्धं पशुपालनोद्यानादिव्यवस्थापि प्राचीननवीनसमन्वितरीत्या क्रोडीकृता भवेत् ।

९—प्राचीनानां वास्तु-चित्र-मूर्तिकलादीनां जनजीवनोपयोगिग्रामीणलघु-द्योगानां प्राक्कालिकशोधानुसन्धानपुरःसरं नवीनतानयनेपि विश्वविद्यालयेन प्रधानता स्थापनीया ।

जनतामहाविद्यालयाचार्यमण्डली

गङ्गाधरशास्त्री पराजुली
न. प्रा. न्यायाचार्यः पोष्टाचार्यः

सर्वदर्शनसूरिः
पोखरा ।

पूर्णचन्द्र ढुङ्गेलः
व्याकरणन्यायसाहित्याद्याचार्यः
विराटनगरम् ।

तीर्थराजः सुवेदी
साहित्याचार्यः
दार्ङ्ग ।

दीर्घराजो घिमिरे
न. न्यायाचार्यः
रामेछाप ।

देवराजः सुवेदी
साहित्याचार्यः
दार्ङ्ग ।

सुरेन्द्रनाथझाः
व्याकरणसाहित्यधर्मशास्त्राचार्यः
एम. ए.
रौतहट् वसन्तपुराभिजनः ।

दत्तात्रेयदाहालः
व्याकरणपुराणेतिहासाचार्यः
दार्ङ्ग ।

गोविन्दप्रसाद आचार्यः
एम. ए. काठमांडौं

कुमारबहादुरो जोशी
एम. ए. काठमांडौं

श्यामकुमारगौतमः
एम. ए.
हेठौडा

वकुलरञ्जन वनर्जी
बी. कम्
कलकत्ता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भानुभक्तो ज्ञवाली
व्याकरणाचार्यः
गुल्मी ।

लक्ष्मीनारायणो ज्ञवाली
व्याकरणाचार्यस्थः
दाङ्गम् ।

भक्तिरामो ज्ञवाली
साहित्यशास्त्री
गुल्मी ।

गदाधरः पौडेलः
साहित्याचार्यस्थः
वनहरी ।

स्थानेश्वरः पौडेलः
साहित्यशास्त्री
गुल्मी ।

शिवकुमारोऽधिकारी
साहित्यशास्त्री
प्यूठान (प्रतिष्ठानम्)

श्री पं० गोविन्दप्रसादसुवेदिनः

वा. सं. वि.विद्यालयस्य प्राध्यापकस्य

परमगौरवास्पदं प्रमोदावहञ्चेदं यदधुना विश्वस्मिन्नपि विश्वे देव-देर्षि-ब्रह्मर्षि-राजर्षिसेवितस्यावशिष्टस्यैकमात्रस्य राजन्वतो नेपालदेशस्य गौरवानुरूपं द्विजकुलकलकूजितपूजिते शान्तैकान्ततपोवनायमाने नागरिकचाकचक्यदूषितविविध-वातावरणरहिते परमोर्वरे पवित्रतमे हिमवदङ्कशायिनि दाङ्गभूभागेऽस्माकं पैतृकसर्वस्वरूपस्य वैदिकादिनिखिलसंस्कृतवाङ्मयस्य संरक्षणाय सम्वर्धनाय प्रचा-राय प्रगतिततिप्रदानाय च संस्कृतविश्वविद्यालयं संस्थापयितुं विहितविविधोद्यो-गानां तत्रत्यानां समेषां संस्कृतप्राणानां सज्जनानां यः प्रयासोऽधुना जागर्ति स हि नितरां प्रशंसनीयोऽनुकरणीयश्च । उदन्तममुं कर्णगोचरीकृत्य को नाम गीर्वाणवाणीसमुपासकः प्रमुदितचेताः सोत्कण्ठश्च न भवेत् ?

संस्कृतविद्यायाः प्रगतये सुरक्षायै चेदमस्माकं कर्तव्यम् :—

१—द्विजबालकाः प्रारम्भिकषोडशाब्दपर्यन्तमनिवार्यरूपेण साङ्गवेदोपवेदेति-हासपुराणदर्शनधर्मशास्त्रार्थशास्त्रराजशास्त्रादिसंस्कृतविद्यानामेवाध्ययनं कुर्युस्त-दनन्तरं यथेच्छं तच्छाखाप्रशाखाध्ययनमितरभाषाध्ययनं वा कुर्युः ।

२—सर्वकारेण संस्कृताध्येतॄणां कृते सर्वत्र राजकीयपदेषु नियुक्तौ प्राथ-मिकता देया । तथात्वेऽस्मिन्नार्थिके युगेऽन्यभाषां परित्यज्य संस्कृतेऽहमहमिकया समेषां प्रवृत्तिरवश्यं स्यात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३—परस्परं वार्तालापेषु पत्राचारेषु शिक्षासत्रेषु प्रवचनादिषु च संस्कृत-भाषाया माध्यमिकता संस्कृतज्ञैरपरिहार्या ।

४—संस्कृतज्ञानां सुधियां भोजनाच्छादनादिचिन्ताया दूरीकरणाय सर्वं-कारस्तथा प्रबन्धं कुर्याद्येन ते निश्चिन्ताः सन्तः सुरभारतीसेवनव्रतं निर्वहेयुः पाठयेयुश्च रुचिपूर्वकं शिष्यान् स्वपुत्रपौत्रादींश्च तदर्थं सर्वकारसकाशात्त्रिपुरुष-व्यापिनी ब्रह्मवृत्तिव्यवस्था विधेया ।

५—विद्यालयेषु छात्राणां कृते स्वल्पाकाराणां हास्य-शान्त-रस-प्रधानानां शिक्षाप्रदानां नाटकानामेकाङ्किनां छात्रैरेवाभिनयस्य व्यवस्था यथासमयं विधेया । येन संस्कृतवार्तालापेषु संस्कृतपत्राचारादिषु च तेषां प्रवृत्तिः सुकरा स्यात् ।

६—पठने पाठने वार्तालापे प्रश्ने तथोत्तरे । वदन्तु संस्कृतं सर्वे गुरुशिष्या निरन्तरम् । इति मन्त्रं मनसि विधाय संस्कृतमाध्यमेनैव शिक्षणादिव्यापाराः स्युः सर्वत्र ।

७—प्राचीनर्षिकुलानुरूपामाचारविचारपरिपाटीं संरक्षन्तश्छात्राः काशिकराम-धट्टस्थसाङ्ग-वेदविद्यालयीयपाठ्यक्रमेण षोडशाब्दपर्यन्तं शिक्षणीयाः । तत्रत्यपाठ्यक्रम-परिपाटी चेयम्:—

षष्ठवर्षात्षोडशवर्षपर्यन्तानां बालानां कृते

पाठ्यक्रमः

६ वर्षे—शब्दरूपावली, ३ मासैर्व्यवहारतो विभक्त्यर्थबोधनम् ।
धातुरूपावली, ६ मासैर्लकारार्थपरिज्ञानम् ।
समासचक्रम्, ३ मासैः स्वल्पवाक्यरचना ।
अष्टाध्यायी, १ वर्षेण मूलमात्रघोषणम् ।

७ वर्षे—अमरकोषः, ८ मासैर्मूलघोषणम् ।
हितोपदेशः ६ मासैरनुवादसमासान्वयबोधः ।
रघुवंशम्, ६ मासैःसर्गद्वयानुवादपरिचयः ।

८ वर्षे—रघुवंशम्, ३–४ सर्गौ ।
तर्कसंग्रहमूलम् ।
मनुस्मृतिः १–२ अध्यायौ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

९ वर्षे—तर्कसंग्रहः सार्थः ।

सन्धिपरिचयः ।

किरातार्जुनीयस्य १–३ सर्गाः ।

१० वर्षे—न्यायबोधिनी, तदर्थमपेक्षितन्याय-

मतसिद्धपदार्थानां परिचयश्च ।

कामन्दकीयनीतिसारस्य १–७ अध्यायाः ।

११ वर्षे—माथुरी पञ्चलक्षणी ।

शिशुपालवधस्य १–३ सर्गाः ।

१२ वर्षे—कामन्दकीयनीतिसारस्यावशिष्टभागः ।

मुक्तावली ।

साङ्ख्यतत्त्वकौमुदी ।

प्रबोधचन्द्रोदयनाटकम् ।

याज्ञवल्क्यस्मृतिसूत्रं च ।

१३ वर्षे—सिद्धान्तलक्षणम् ।

योगदर्शनम् ।

दिनकरी ।

कौटिलीयार्थशास्त्रस्य प्रथमो भागः ।

१४ वर्षे—जागदीश्या व्यधिकरणम् ।

वेदान्तपरिभाषा ।

कौटिलीयार्थशास्त्रस्य द्वितीयो भागः ।

१५ वर्षे—सामान्यनिरुक्तिः ।

कौटिलीयार्थशास्त्रस्य तृतीयो भागः ।

१६ वर्षे—व्युत्पत्तिवादः प्रथमाकारकान्तः ।

८ ये सर्वदैव पठनपाठन-वार्तालाप-पत्राचार-प्रवचन-प्रश्नोत्तर-वादविवादादिषु निखिलेष्वपि कार्यकलापेषु स्वेच्छया प्रेरणया वा गीर्वाणवाणीमाध्यमेनैव प्रणपूर्वकं व्यवहारजातं कुर्वन्ति ते सर्वे समये समये विविधपुरस्कृतिप्रदान-पुरःसरमवश्यमेव प्रोत्साहनीयाः ।

९ विश्वविद्यालयीय-स्वाध्यायदिवसानामर्धविश्रामसमयावसरेऽसति परमात्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यिके कार्यान्तरे सर्वैरप्यध्यापकैरेकत्रीभूय विविधशास्त्रीयेषु स्वस्वशास्त्रीय-विचारस्यादानप्रदानं तत्तत्सामयिकसमस्यासमाधानविषये च विमर्शं कर्तुं स्वल्पाकारा गोष्ठी विधेया। अनया पद्धत्या प्रत्यहं सङ्गठिते समस्तेष्वपि कार्येषु सौविध्यं स्यात्।

१० निम्नाङ्किताः प्रतियोगिता यथाशक्यं समये-समये समायोजनीयाः। तासु प्रथम-द्वितीय-तृतीय-पदभाजश्छात्राः प्रमाणपत्रसनाथैर्विशेषपुरस्कृतिप्रदानैः सत्कार्याः। तथात्वे मनोरञ्जनधिया पुरस्कारलिप्सया च छात्राणां सोत्साहं संस्कृताध्ययने प्रवृत्तिः स्वास्थ्यरक्षा च स्यात्।

प्रतियोगितानामानि यथा

(क) शास्त्रार्थ-प्रतियोगिता
(ख) शास्त्रचर्चा ,,
(ग) व्याख्यान ,,
(घ) कवितारचना ,,
(ङ) निबन्धलेख ,,
(च) सुलेख ,,
(छ) विशिष्टनिबन्धलेख ,,
(ज) अनुसन्धानात्मकलेख ,,
(झ) सूत्रान्ताक्षरी ,,
(ञ) सूक्त्यन्ताक्षरी ,,
(ट) काव्यान्ताक्षरी ,,
(ठ) कोशान्ताक्षरी ,,
(ड) सूर्यनमस्कार ,,
(ढ) योगासन ,,
(ण) कन्दुकक्रीडा ,,
(त) रज्जुकर्षणक्रीडा ,,
(थ) कपड्डीक्रीडा ,,
(द) कूर्दन ,,
(ध) दीर्घकूर्दन ,,
(न) उत्प्लुति ,,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(प] दीर्घोत्प्लुति प्रतियोगिता
(फ) गोलकप्रक्षेप ,, ,,
(ब) भल्ल ,, ,,
(भ) मल्लक्रीडा ,,
(म) गदा-युद्ध ,,
(य) मुद्गर ,, ,,
(र) तोमर ,, ,,
(ल) भिन्दिपाल ,, ,,
(व) धनुर्बाण ,, ,,
(श) खड्ग ,, ,,
(ष) यष्टि ,, ,,
(स) लक्ष्यवेध ,, ,,
(ह) भुशुण्डीप्रयोग ,,
(य) शतघ्नी ,, ,,
(ज्ञ) चललक्ष्यवेध ,, ,,
(क्ष) अभिनयप्रदर्शन ,,
(त्र) समाजसेवा ,,
(श्र) कलोपकलाप्रदर्शन ,,
(आ) नवीनपदार्थाविष्कार ,,
(इ) स्वतन्त्रजीविकोपार्जन ,,
(ई) नानाविधवाद्यवादन ,,
(उ) सङ्गीत ,,
(ऊ) प्राहरिक-कार्य ,,
(ए) सैनिक ,, ,,
(ऐ) स्वयंसेवक ,, ,,
(ओ) दूत ,, ,,
(औ) चर ,, ,,
(अं) गुप्तचर ,, ,,
(अः) देशसेवा ,, ,,
(ऋ) यन्त्रप्रयोग ,,
(ॠ) जीर्णयन्त्रसुधार ,,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(ङ) यन्त्राविष्कार ,,

(ढ) देशकालसमाजपरिस्थित्यनुकूलान्यक्रीडा ,,

११ संस्कृतोन्नति कामयद्भिर्यथाशक्यं स्वगृहे स्वकुटुम्बे स्वकीयमित्रगणेऽन्यत्र च वार्तालाप-पत्राचारादेश-प्रत्यादेशादिकार्यनिकरेषु सुरभारत्येव प्रयोज्या। तथात्वे शनैः-शनैः सकलोऽपि तदीयपरिवारः संस्कृतमयः स्यात्।

१२ सर्वैरपि सुधीभिः प्रथमं स्वकुलक्रमागतो वा स्वाधीतविषयोऽवश्यं पुत्राय पाठनीयः। तथात्वे पैतृकग्रन्थानां सदुपयोगो विशेषानुभूतिपरिज्ञानञ्च स्यात्। तदनन्तरमेव यथेच्छमन्यदपि सत्यामिच्छायां पठेयुः।

१३ आतुरोपचारकर्मणि सर्वदैवायुर्वेदस्यैवोपयोगः करणीयः।

१४ प्राचीनशास्त्रार्थपरिपाटीपरिपालनाय समये-समये विशिष्टविदुषां छात्राणाञ्च शास्त्रार्थव्यवस्था कार्या।

१५ वैदिकयागानां संरक्षणाय वैदिकयज्ञोपकरणसनाथामेकां श्रौतयज्ञशालां निर्माय तत्र सुयोग्यः कश्चिदलोलुपः सदाचारी श्रौताग्निहोत्री ब्राह्मणः प्रत्यहं यागं सम्पादयितुं नियोज्यः। यथावश्यकं तत्सहायकाश्च निर्णीय देयाः।

१६ तथैव स्मार्तयागानां संरक्षणं कर्तुञ्चैकां स्मार्तयज्ञोपकरणसनाथां स्मार्तयज्ञशालां निर्माय तादृश एव कश्चन स्मार्ताग्निहोत्री प्रातिदैनिकयागं सम्पादयितुं नियोज्यः। यथावश्यकं सहायकाश्च निर्णीय देयाः। परं न स्यात् प्रदर्शनीमात्रं तदिति वियेयेऽवधातव्यमधिकारिभिः।

१७ महत्त्वपूर्णेषु विषयेषु सुयोग्यविदुषामेका प्रवचनमालापि परिचालनीया, यया विद्वत्सु च्छात्रेषु च पाण्डित्यप्रकर्षः स्यात्।

१८ समये-समये विशिष्टविद्वद्गोष्ठी चायोजनीया। यत्र महत्त्वपूर्णा शास्त्रचर्चा स्यात्।

१९ विशेषतः शोधकार्यसम्पादनायानुसन्धानस्य व्यवस्थाऽपि समयानुरूपा कार्या।

२० छात्रेभ्यो भोजनार्थं सोपस्करमामान्नं सिद्धान्नं वा यथारुचि यथासौविध्यं वा देयम्।

२१ पानाद्यर्थं स्वच्छजलस्य व्यवस्था विधेया। तथैव वस्त्रस्वच्छतासमस्यापि विचारणीया, नो चेन्नानाविधरोगापत्तिः स्यात्।

२२ सर्वेषां स्वास्थ्यसंरक्षणाय व्यायामव्यवस्थयापि चावश्यं भाव्यम्। तत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यायामेषु सूर्यनमस्कारसंज्ञकव्यायामः सर्वोत्तमः। तदनन्तरं योगासनानि, तदनन्तरमन्ये। परं वैदेशिकव्यायामपरिपाटी तु नात्रोपयुक्ता।

२३. एकः सुसम्पन्न आयुर्वेदीयौषधालयोऽवश्यं तत्र सञ्चालनीयः। तद्द्वारैवोपचार-व्यवस्था विधेया।

२४. एकेन पत्रालयेनापि तत्र सन्निहितेन भाव्यम्।

२५. प्रश्नोत्तरपत्रपत्रिकापुस्तकादिप्रकाशनसौविध्यार्थं सति सम्भवे प्रेसेनाप्येकेन सुसज्जितेन तत्र भाव्यम्।

२६. अष्टादशविद्यानुरूपं विभागव्यवस्था विधेया। तेषां समेषां समुज्जीवनाय सावधानं भृशं प्रयतनीयम्।

२७ सर्गविधसंस्कृतपुस्तकसम्पन्नः सुपरिष्कृतः पुस्तकालयश्च तत्रावश्यं सुलभः करणीयः।

२८. सर्गैरपि यथाशक्यं नैदेशिकवस्तुबहिष्कारः करणीयः।

२९ आत्मनिर्भरतासादनाय सर्गैरपि भृशं प्रयतनीयम्।

३०. आ प्रवेशादध्ययनसमाप्तिपर्यन्तं छात्रा विश्वविद्यालयाभ्यन्तरे स्थित्वैव पठेयुः पाठयेयुश्च। समावर्तनानन्तरमेव बहिर्निष्क्रमणाधिकारः स्यात्। सत्यप्या-त्ययिके कार्ये प्रमुखाधिकार्यनुमतिमन्तरा न ते बहिर्गन्तुं शक्नुयुः।

३१. गुरूणामनुशासनं सर्गैरपिच्छात्रैरवश्यं सर्वथैव पालनीयम्।

३२. छात्रावासः प्रकाशबहुलो वातानुकूलितः स्वच्छः कार्यः।

गोविन्दप्रसादः सुवेदी

वा० सं० विश्वविद्यालयः

१५।४।१९६९

श्रूयते नेपालराष्ट्रस्य दाङ्०प्रदेशे संस्कृतविश्वविद्यालयस्य स्थापना भविता। आकटकाटकमाकुमारीकाश्मीरं बहुभाषाभाषिणां भारतस्य भारतत्वप्रतिपादिका राष्ट्रियताया ऐक्यसमुत्पादिका तथा चार्यसंस्कृतेः संरक्षिका च संस्कृतभाषैव।

अस्याः प्रचारप्रसारोपायोऽवश्यं विधेयो विश्वस्मिन्नपि विश्व एकमात्रमव-शिष्टेन हिन्दूराष्ट्रेण नेपालेन।

परमिदं नहि केवलं मृते सति पिण्डाय परलोकायैव स्यात् किन्तु जीवितेऽप्यस्याः प्रयोगः स्यात् तथास्या भौतिकमण्डारोऽपि भृशं पूर्णतां बिभ्रियात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नास्त्यावश्यकताधुनास्याः परीक्षाप्रणाल्याः श्रेयः प्रेयश्च साधयित्वाऽऽध्यात्मिकं भौतिकं चोत्कर्षं सम्पादयितुं स्वर्गे लोके च कामदुधा यथा स्यात् तथा पाठनप्रणाली निर्मेया ।

ज्ञानविज्ञानयोर्हस्तौ योज्यौ कर्मणि साधुभिः ।

दिशतु परमेश्वरः सन्मार्गं तत्स्थापननिरतान् प्रयत्नशीलान् सज्जनान् ।

कृष्णप्रसादः
प्रधानाचार्यः
नेपालीसंस्कृतमहाविद्यालयः
वाराणसी—१

श्री पं० पद्मनाभनिरौलाशर्मणः

विशुद्धं संस्कृतं वन्दे विशुद्धान् श्रीगुरूनपि ।
विशुद्धदेवान् वन्देऽहं त्रिविशुद्धानहं भजे ॥

अयि सकर्णाः सहृदया जनाः ? इदानीमेतादृशः समयः समुपस्थितो भवतामस्माकं च समक्षे यन्नेत्रे विस्फार्यं कर्णावुत्पाट्य सावधानं मनो विधाय द्रष्टुं श्रोतुमेवास्माकं कर्तव्यमिति ।

यद्यपि कैश्चिदुच्यते पुनरुक्तस्य नायं समयः नवीनानुसंधानं कृत्वा वर्तनमेवास्माकं कर्तव्यमिति । तत्र ते प्रष्टव्या अस्माभिः, समयः कथं ज्ञातो भवद्भिरिति । सम्यग् अयते गच्छति इति व्युत्पत्त्या यदि समीचीनरूपेण समययापनमेव समयस्यार्थं केऽपि स्वीकुर्युः । तत्राप्यस्माभिः समीचीनत्वमेव पृच्छ्यते । मनोरञ्जनकरणत्वमेव नास्ति शास्त्रस्य तात्पर्यम् अपि तु शान्तिस्थापनमपि चरमकर्तव्यमस्ति अस्माकम् एतद्विदुषामतिरोहितमेव ।

किंच संस्कृतमुपहसन्ति जनाः, देहात्मवादप्राबल्यात् द्यौः शान्तिः पृथिवी शान्तिरित्युक्त्वाऽपि तस्य मन्त्रस्यार्थं ज्ञातुं न प्रयतन्ते धनयौवनेन मत्ता जनाः । अस्यां परिस्थतौ नेपालविजौरीदाङ्प्रदेशे महेन्द्रसंस्कृतविश्वविद्यालयस्थापनमपि अकर्तव्यमेव स्फुरति देहात्मवादिजनानां दृष्टौ । विश्वविद्यालये समस्तान्यपि कार्यजातानि संस्कृते एव व्यवहर्तव्यानि । अन्यथा संस्कृतह्रासोऽनुभूयते संस्कृतज्ञैः । सन्मार्गदर्शनमेव विश्वविद्यालयस्थापनस्य प्रयोजनम् । यावदेकविज्ञानेन सर्वं विज्ञातं न भवति तावद्विश्वविद्यालयस्थापनमपि व्यर्थं सेत्स्यति । अतः सर्वैऽपि जनाः स्वधर्मानुवर्तिनो भवन्तु । किं विश्वम् ? काः विद्याः ? कस्तासामालयः ? किं तत्रानुशासनम् ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थापनादिवसोत्सवे इत्यादिविषयाणामपि गोष्ठी संचालनीया। यथा विश्वविद्यालयो विश्वमावर्जयति तादृशं कार्यं करणीयं सर्वैः। स्वदेशस्यैव आचारविचारौ रक्षितव्यौ न तु विदेशिनौ। नाममात्रेणैव संस्कृतविश्वविद्यालयस्यैवोन्नतिर्न भवति विशुद्धाचरणविचारणे भवेताम्। आचारः परमो धर्मः, विचारः परमं ज्ञानमिति अपेक्षणीये।

अधुना एतादृशसमयः समुपागतः। सर्वेऽपि देशाः परस्परं कथयन्ति भवतो पार्श्वे किमस्ति किं नास्तीति। नेपालस्य पार्श्वे संस्कृतविश्वविद्यालयस्याऽभाव आसीत्। अस्य स्थापनेन तस्य पूर्तिरवश्यं भविष्यतीति सर्वे वयं स्वगौरवमनुभवामः। मृतेऽपि शरीरे संस्कृतविद्या न नश्यति। अत एव सा देवभाषेति कथ्यते। देवलोकादेव समागता संस्कृतविद्या मर्त्यलोके पुण्यक्षयानन्तरं सर्वेऽपि देवा मनुष्यलोके आगच्छन्ति। आगत्य च स्वभाषायामेव वदन्ति प्रचरन्ति व्यवहरन्ति च। एवं रीत्या संस्कृतविद्या मर्त्यलोके समागता। यस्या भाषाया व्याकरणमस्ति सा भाषा बलवती। परमात्मनः समष्टिशक्तिरेव संस्कृतविद्या इति वयं स्पष्टरूपेण कथयितुं शक्नुमः तस्या संरक्षणार्थं प्रचारार्थं स्थापनार्थं यथा अन्ये देशाः समुत्सुकाः सन्ति तथैव नेपालोऽपि पश्चान्न सरति। नेपाले संस्कृतविश्वविद्यालयः श्री ५ महेन्द्रवीरविक्रमसाहदेवैः संस्थाप्यते इति श्रुत्वा भारतीयविद्वांसोऽपि अतीव प्रसन्नाः सन्ति। संस्कृतवाङ्मये संस्कृतसंरक्षणोपाया बहवः सन्ति। तदनुसारेणैव विश्वविद्यालयसंचालनसंविधानं रचनीयम्। मृद्धति कार्ये बहूनां विदुषां बहूनां देशानाञ्च साहाय्यमपेक्षितं भवति। येन विश्वविद्यालयस्यानुरूपं भवेत्। विद्याऽपि सैव भवितुमर्हति। अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते। अध्यात्मविद्या विद्यानामिति भगवद्वाक्यमस्माभिः कदाऽपि न विस्मर्तव्यम्। तयैव एकविज्ञानेन सर्वं विज्ञातं भवति। विश्वमपि भगवतो नाम एव। यथा 'विश्वं विष्णुर्वषट्कारः" इति तस्य नाम्नोऽस्माभिरवश्यमादरः कर्तव्यो न विमानना। अस्माकममूल्यनिधिर्वेद एव। अतः सर्वत्र वैदिकपक्ष एव समाश्रयणीयः। येन भुक्तिमुक्ति-आदिपदार्थाः करतले स्थिता भवन्ति। शुभाकांक्षी—पद्मनाभ उपाध्यायनिरौला वेदान्तसाङ्ख्ययोगाचार्यः।

अध्यापकः ने० सं० म० वि० मङ्गलागौरी काशी २०२५ चैत्रनवरात्रः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिक्षा कैसी हो

शिक्षा सोद्देश्य ही हो सकती है। "जन्मना जायते शूद्रः संस्काराद् द्विज उच्यते" इसका भी यही अर्थ है कि जन्म से ही कोई बिना संस्कार के बड़ा नहीं हो जाता। संस्कार मन बुद्धि को शुद्ध करने के लिए आवश्यक है। अतः समुचित शिक्षा की व्यवस्था करना व्यक्ति के मानसिक तथा बौद्धिक विकास के लिए परमावश्यक है। विश्व के प्रायः सभी देशों के मनीषियों का दृष्टिकोण इस विषय पर एक सा रहा है। प्राचीन समय से ही शिक्षा का महत्त्व यही रहा है कि व्यक्ति को विनयसम्पन्न विद्यायुक्त ज्ञानवान् बनाया जाय। कालान्तर में जो विशेषता उत्पन्न हुई है वह केवल इतनी ही कि ज्ञान का क्षेत्र विशालतम हो गया है और जीवनयापन की समस्या उठ खड़ी हो गयी है। प्राचीन काल में हिन्दू-समाज में वर्णव्यवस्था द्वारा जीवन में उठ खड़े होने वाले पारस्परिक संघर्षों को यथाशक्ति सीमित करने का प्रयत्न किया गया था पर आधुनिक काल में वर्ण-व्यवस्था की यह विशेषता नष्ट हो गयी है। शिक्षा के साथ आजीविका का सम्बन्ध है। अतः शिक्षा के स्वरूप पर विचार करते समय शिक्षितों के रोजगार का उनकी व्यवसायक्षमता का भी प्रश्न उठ खड़ा होता है। इन सब बातों का यही निष्कर्ष है कि शिक्षा की व्यवस्था करते हुये तत्संबन्धी अर्थोपार्जनक्षमता का भी विचार रखना आवश्यक हो गया है। अतः विशेष शिक्षा तो अर्थकारी होनी ही चाहिए। पर सामान्य शिक्षा के विषय में यह नहीं कहा जा सकता। सामान्यशिक्षा का एक ही सनातन लक्ष है बालक को चरित्रवान्, धर्मभीरु बनाया जाय। अर्थात् शिक्षाद्वारा ज्ञान-वितरण ही न हो वरंच उसके द्वारा विद्यार्थी कर्त्तव्यनिष्ठ परिश्रमी तथा विचारवान बनें।

वर्त्तमान काल में भौतिक-विज्ञान अपने चरमोत्कर्ष पर है और कोई भी समाज या व्यक्ति इसकी उपेक्षा नहीं कर सकता। हम भी इसकी उपेक्षा न कर सकते हैं और न करते ही हैं। विज्ञान द्वारा जो भी सुख के उपकरण या साधन हैं उनका व्यवहार हम करते ही हैं फिर विज्ञान की अवहेलना कैसी? शिक्षा को प्राचीन परिधि के भीतर विज्ञान के सिद्धान्तों का, वैज्ञानिक दृष्टिकोण का सन्निवेश आवश्यक है। अतः शिक्षा के स्वरूप के निरूपण में जो परिपाटी स्वीकृत की जाय उसमें तीन बातों पर विशेष ध्यान देना आवश्यक है—

(१) प्राचीन परम्परा
(२) अर्वाचीन विज्ञान

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(३) आजीविकासाधनता

पाठ्यक्रम इस प्रकार तथा ऐसे हों कि विद्यार्थियों को (१) अपने देश, जाति, इतिहास, पूर्वोपलब्धि का समुचित ज्ञान ही न हो, उनमें अपने पूर्वजों के प्रति आस्था तथा सम्मानभावना भी हो। (२) वैज्ञानिक सिद्धान्तों से उनका परिचय हो जाय तथा (३) सामान्य शिक्षा के पश्चात् विद्यार्थियों की योग्यता रुचि तथा सम्पन्नता के आधार पर ही विशेष शिक्षा का प्रबन्ध हो। इस तीसरी बात के लिए शासन अपनी आवश्यकता तथा साधन के अनुसार व्यवस्था करे। यदि प्रारम्भ से ही शिक्षा की वर्गीकरण हो जाय तथा इसके लक्ष्य व उद्देश्य स्पष्ट कर दिये जायँ तो जो युवाजनों का आक्रोश, उनमें उत्पन्न होने वाली अशान्ति तथा व्याप्त कुण्ठा इत्यादि है उनका शमन हो जायेगा और शिक्षा का प्रयोजन भी सिद्ध हो जावेगा।

गणेशदत्तशास्त्री—

श्री नित्यानन्द-पर्वतीय-संस्कृत-विद्यालय, काशी

॥ श्रीः ॥

नेपालदेशे खलु संस्कृतस्य
यैर्विश्वविद्यालय एव विज्ञैः।
संस्थाप्यते सम्प्रति तैस्सुधीभि-
र्विचार एवं सततं विधेयः॥ १॥

आदर्शः — धर्मस्य रम्यस्य सनातनस्य
प्राचीनहिन्दूजनसंस्कृतेश्च।
रक्षा विधेया खलु संस्कृतस्या-
नुरागिभिस्सज्जनवृन्दमुख्यैः॥ २॥

अध्यापकाः — बुधा विद्यावन्तः प्रथितयशसः शास्त्रनिपुणा
दयादाक्षिण्याढ्या मधुरवचसः प्रेमबहुलाः।
महात्मानस्सर्वे सकलविषयाध्यापनपरा
नियोज्याः स्थानेषु प्रखरमतयः काव्यरसिकाः॥ ३॥

छात्राः — प्रगल्भास्सच्छात्राः पठनमननाभ्यासनियता
गुरूणां पूज्यावां पदकमलसेवासु निरताः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सदा तेषामाज्ञावचनरचनापालनपरा
विनम्रास्सश्रद्धाः श्रुतिषु विलसन्त्वत्र बहुलाः ॥ ४ ॥
श्रीविश्वनाथं प्रणिपत्य याचे
भूयाद्विवृद्धिभुंवि संस्कृतस्य ।
तथा च धर्मस्य सनातनस्य
भूयान्प्रसारोऽस्तु वसुन्धरायाम् ॥ ५ ॥
श्रीमद्रामकुबेरस्य मालवीयस्य धीमतः ।
प्रस्तूयते विचारोऽयं संस्कृतस्यानुरागिणः ॥ ६ ॥

शुभाशंसा

पाश्चात्यपरम्परापराभूतेऽस्मिन् संस्कृतसमाजे नव-नवा शैक्षिकी क्रान्तिरेवाऽस्ति दांगमण्डले प्रस्तावितः संस्कृतविश्वविद्यालयः । हिन्दु-राष्ट्रनेपालभूपालस्य तत्र भवतो भवतः पञ्चश्रीकस्याऽस्मिन् सहयोगोऽपि सर्वथा स्तुत्य एव ।

यथा नेपालः विश्वस्मिन्नेकमात्रहिन्दुराष्ट्रस्य धर्मस्य संस्कृतेश्च परिपाटीव्यंथापूर्वं वहन्नास्ते, आशासे तत्रत्यानाम्विपश्चिदपश्चिमानान्नागरिकाणान्दानवीराणाञ्च सहयोगेन सुरभारत्या समुन्नतावपि गौरवपदमाप्नुयादिति शम् ।

भवदीयः

रामानुज ओझाः

न्यायव्याकरणसाहित्याचार्यो व्याकरणालङ्कारः
प्रधानाचार्यो
बिरला संस्कृतमहाविद्यालस्य

लालघाट वाराणसी,
१४।४।१९६९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीविश्वेश्वरो विजयते ।

नेपालपश्चिमदिग्भागस्थराप्तिचञ्चलविजोरीदाङप्रदेशे सकलनेपालाभिजनानां संस्कृतविश्वविद्यालयस्य स्थापनेऽभिलाषातिशयं दृष्ट्वा श्रुत्वा च महान् हर्षोऽनुभूयते। ये संस्कृतविश्वविद्यालयस्य स्थापने प्रचारे द्रव्यसञ्चये समित्यादिसंघटने च प्रयत्नशीलाः सन्ति, तेषां चरणेषु शिरोवेष्टनं समर्प्यते । अतः परं किं वक्तव्यम्, अनेनैव समर्पणेन सम्मतिः प्रदीयते हृदयात् संस्कृतविश्वविद्यालयस्थापने । पठनपाठनादिसकलकर्मसु यावच्छक्यं स्वदेशीया एव निवेशनीयाः । अनेनैव स्वदेशजनगौरवमुन्नतिश्च भवेत् । विनायकं प्रकुर्वाणो रचयामास वानरमिति वैपरीत्यं माभूत् । पूर्वं प्रतिज्ञातस्य सिद्धान्तः परित्यक्तो माभूत् । यथा मदनमोहनमालवीयमहोदयैः संस्कृतविश्वविद्यालये प्रतिज्ञाते पश्चाद् वैदेशिकभाषायां शिक्षाऽदीयत, तादृशी शिक्षा माभूत् । विशुद्धसंस्कृतविश्वविद्यालयस्थापनेनैव नेपालराष्ट्रस्य गौरवं वर्णाश्रमव्यवस्थात्मकधर्मस्य सुचारुरूपेण पालनं संभवेदित्याशासे ।

केशवशर्मा वास्तोला वेदान्ताचार्यः, प्राचीनन्यायशास्त्री च,
अध्यक्षः—प्रस्तावित सं० वि० वि० दाङसहयोगमितिः
वाराणसी १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रिभुवनविश्वविद्यालय-प्राध्यापकानां श्री रामेश्वर-हरिप्रसाद-विद्यानाथोपाध्यायानाम्—

महतो हर्षस्याऽयं विषयो यन्नेपाले भाविनं संस्कृतविश्वविद्यालयमधिकृत्य दाङ्गभूमौ नेपाल-भारतीय-विदुषां सम्मेलनमभूत्। तत्र च वयमपि संमेलनावसरं लब्ध्वा स्वरूपस्थानादिविषयकसम्मतिप्रकटनावसरं चावाप्य धन्यंमन्याःस्मः सम्मतिश्चास्माकं निम्नप्रकारा—

स्वरूपविषये

संस्कृतविश्वविद्यालये तावद् वर्तमानयुगावश्यकानुसारं निम्ना दश विभागाः स्थाप्याः। ते च विभागा निम्नाङ्कितचतुःसङ्कायान्तर्गताः स्युः।

आन्वीक्षिक्याम्— प्राचीन-न्यायवैशेषिकविभागो नव्यन्यायविभागश्च।

त्रय्याम्—वेदः, आयुर्वेदः, शैवागमः, व्याकरणम्, ज्यौतिषम्, साहित्यम्।

वार्तायाम्—कृषि-वाणिज्यविभागः।

दण्डनीतौ—राजशास्त्रविभागः।

१—उपर्युक्तवार्तावाणिज्यविषयकोपयुक्तग्रन्थान्वेषणायेतो वत्सरादेव प्रयासःकार्यः

२—यस्य कस्य चिद्विषयस्याध्यापन-प्रणाली प्राच्य-पाश्चात्त्य-मतसमीक्षापूर्विका परमतेभ्यः स्वमतवैशिष्ट्यावैशिष्ट्यबोधपर्यवसाना स्यात्। एतदर्थं सुगम-प्राच्यभाषासु संस्कृते वाऽनूदितानां पाश्चात्त्यसाहित्यदर्शनभौतिकविज्ञानादि-पुस्तकानामपि तत्पाश्चात्यविषयसम्बन्धिनां शास्त्रिपरीक्षात एव पाठ्यक्रमे समावेशः समीक्षात्मकबोधाय वर्तमानयुगानुकूलः स्यात्।

३—पाश्चात्त्यभाषानिबद्धस्वविषयसंबन्धिपुस्तकावलोकनपूर्वकं स्वविषयवैशिष्ट्या-वैशिष्ट्य समीक्षासौकर्यात् संस्कृतरक्षणायापि छात्रप्राध्यापकयोरुच्चमाध्यमिक-कक्षापर्यन्तमाङ्ग्लभाषासामान्यज्ञानमप्यावश्यकम्।

४—वैज्ञानिकविषयाणां संस्कृते सन्निवेशाय संस्कृताङ्गलोभयभाषाविदः कतिपये स्नातका विज्ञानमध्याप्याः। आङ्गलविज्ञानविदो वा संस्कृतमध्याप्याः। ते च पश्चादधीतविज्ञानाः संस्कृतज्ञा अधीतसंस्कृता विज्ञानविदो वा संस्कृतसंस्थासु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विज्ञानाध्यापनाय प्राच्यविज्ञानान्वेषणाय च नियोज्याः। ते चानूद्य अन्विष्य च संस्कृतच्छात्रान् प्राच्य-पाश्चात्योभयविज्ञानविषयान् प्राध्यापयेयुः। एवं सत्येव विलम्बेनापि ज्ञानविज्ञानसमन्वयः स्यात् संस्कृतविश्वविद्यालये। एवमद्यतनी पाठ्यप्रणाली परीक्षाप्रणाली च परिवर्तनीया, याभ्यां शास्त्र-सागराद् रत्नसारग्रहणक्षमं गम्भीरवैदुष्यमुपार्जयितुं विश्वसितुं च पार्येत।

५—संस्कृतविश्वविद्यालयस्थानविषये विद्वत्संमेलने सम्मिलितैर्नेपालभारतीयैर्विद्वद्भिर्दार्ङ्ग - विजौरी - भूमिरेव संस्कृतविश्वविद्यालयोपयुक्तेति समर्थितं यदस्माभिरप्यनुमोदितम्। परं पुनरपि तद्विषयक-समितिं ततः प्रार्थितामवगत्य स्वमतदानं प्रासङ्गिकमेव भाति। तत्र संस्कृतविश्वविद्यालयस्थापनार्थं निम्नपृष्ठभूमयोऽपेक्ष्यन्ते। यथा—

(क) आर्थिकं स्थायि स्रोतः।

(ख) संस्कृतानुकूलजनभावना।

(ग) छात्रस्रोतः।

(घ) स्थानस्य प्रशान्तमनोहरता अन्नादिसुलभता च।

(ङ) प्राध्यापकलाभः।

(च) यातायातसौविध्यम्।

तत्र विद्वत्संमेलने संमिलितैर्विद्वद्भिरार्थिकस्रोतःप्रभृतिसाधनसंम्पन्ना दार्ङ्ग-विजौरी-भूमिरेव संस्कृतविश्वविद्यालयोपयुक्तेति" पारितम्। परमत्रान्तिमद्वयोः प्राध्यापकलाभ-यातायातसौविध्ययोर्यत्रास्तित्वं तत्रैव संस्कृतविश्वविद्यालयेन भाव्यमिति केषाञ्चिन्मतमस्ति इति कदाचित्कर्णपथमुपैति।

परन्तत्र सूक्ष्मेक्षिकया समीक्ष्यमाणे आर्थिकं स्थायि स्रोतः संस्कृतसम्वर्धनेच्छुजनभावना स्थानीयप्रशान्तोर्वरत्वे चेति त्रयाणां दार्ङ्गभूमौ सहजसिद्धत्वम्। छात्रस्रोतसश्च पाश्चात्यप्रवाहापतितरात्री-भेरी-कर्णाली-लुम्बिन्यञ्चलीयबहुपर्वतीयभूभागमध्यवर्तितया सति प्रचारे सुसंभव इति आदितश्चतुर्णां प्रमुखसाधनानां दार्ङ्गभूमौ सम्भवेऽन्ययोर्द्वयोः प्राध्यापक-यातायात-सौविध्ययोरपि तत्र प्रयत्नसाध्यतया दार्ङ्गभूमिरेव संस्कृतविश्वविद्यालयोपयुक्तेति पुनरप्यस्माकं निष्कर्षः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यतोऽन्तिमद्वयस्यान्यत्र संभवेऽपि आद्यचतुर्णां तत्रापि आदिमद्वयोरार्थिकस्रोतोजनभावनयोरद्यत्वे सम्पादनमन्यत्र दुःशकं प्रतीयते।

विशेषः

संस्कृतविश्वविद्यालयस्येतः परतः पृष्टभूमि-निर्माणविषयेऽपि प्रसङ्गान्स्वमतमस्माभिः संलग्नपत्रेऽभिव्यक्तीकृतमस्ति।

२०२५।२।६

रामेश्वरशर्मा
प्रा० त्रि० वि० वि०
हरिप्रसादशर्मा आचार्यः
प्रा० त्रि० वि० वि०
विद्यानाथ उपाध्यायः
प्रा० त्रि० वि० वि०

पृष्ठभूमिनिर्माणविषयकं मतम्

१—प्रथमस्तावत् स्थापनीयोपदशाऽऽचार्यविभागीय-प्राध्यापकानामुपकुलपतिप्रस्तोत्रादिकर्मचारिणाञ्च वेतनस्य, उपकुलपतिनिवासकार्यालयभवननिर्माणादीनाञ्च कृते-समुपयुक्तद्रव्यराशेरुपस्थितौ प्रतिवर्षमुपयुक्तायस्रोतसश्च निश्चये सति संस्कृतविश्वविद्यालयस्य जन्मने प्रमुखाऽऽर्थिकी पृष्ठभूमिर्विश्वसनीया भवति।

२—इतः पर सुयोग्यप्राध्यापकप्रश्नः समायाति तत्समाधानायाप्यादित एव चिन्ता कार्या। तदर्थमस्माद् वत्सरादेव त्रिचतुरवर्षपर्यन्तं मासचतुष्टयं यावत् प्रतिवर्षं विभिन्नविषयकप्रकाण्डविदुषोऽस्मदीयजिज्ञासापूरणक्षमान् शासनस्य त्रिभुवनविश्वविद्यालयस्य च सहयोगेनोपलभ्य काष्ठमण्डप-वीरगञ्ज-नेपालगञ्जाद्यन्यतमस्थल उत्तीर्णाचार्यपरीक्षा विभिन्नविषयकाः प्राध्यापकाः प्राध्यापकयोग्या वा विद्वांसः प्रशिक्षणीयाः। प्रशिक्षणञ्च प्रकृतग्रन्थाशयस्फोरणपूर्वकं प्राच्यपाश्चात्यमतसमीक्षणेन स्व-परमतवैशिष्ट्याऽवैशिष्ट्यबोधपर्यवसानं स्यात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३—प्राध्यापकेषु विद्यमानेष्वपि विश्वविद्यालयस्य कृते छात्रसम्पत्तेः सर्वस्मादावश्यकम्। तदर्थं सकलनेपालराष्ट्रियसंस्कृतशिक्षायाः पृष्ठभूमेः स्थिरीकरणाय जनतामहाविद्यालयेन एका एतादृशी समितिर्निर्वाचयितव्या यतो वर्षद्वयाभ्यन्तरे निम्नकार्यणि संपादयेत्।

(क) राष्ट्रियशिक्षापरामर्शदातृपरिषदि अपेक्षाकृतबहून् प्रतिनिधीन् प्रेष्य प्रेषितैश्च सह मिलित्वा राष्ट्रियशिक्षायां स्नातकपरीक्षापर्यन्तं संस्कृतस्याऽनिवार्यत्वविषये परिषदमुद्बोध्य तत्प्रस्तावसमर्थनाय यावच्छक्यं प्रयासः।

(ख) एतस्माद् वर्षादेव उपद्वित्रविषयकाऽचार्यकक्षोद्घाटनमावश्यकम्। यदर्थमनुपदमेव प्राध्यापकव्यवस्थां कृत्वा प्राध्यापनं प्रारभ्य स्वीकृतिः प्रार्थनीया।

(ग) संस्कृतस्योपादेयतायां प्रचारोऽनुपदमेव प्रारब्धव्यः। तद्रूपञ्च यथा—

१—सनातनधर्मः, आर्यसंस्कृतिः, तन्मूला नेपालीया संस्कृतिः, हिन्दूराष्ट्रं नेपालः, नेपालीया राष्ट्रियता, राजमुकुटम्, शासनविधानं, राष्ट्रभाषा, साहित्यम्, नेपालेतिहास-भूगोलौ च संस्कृतमूलान्येव स्वगरिमाणं बिभ्रतीति संस्कृतरक्षणवर्धनाभ्यां विना हिन्दुराष्ट्रस्य नेपालस्य स्वतन्त्रमस्तित्वं न भविष्यतीति नेपालीयैः स्वराष्ट्रगौरवाय संस्कृतं प्रधानीकृत्यैव भाषान्तरमध्येतव्यम्।

प्रशासनक्षेत्रेषु विधानतः पूर्वोत्तरमध्यमा-शास्त्रिणाम् एस्० एल्० सी०, इन्टर, बी० ए० परीक्षाणाञ्च समानत्वस्य कार्यान्वयोऽस्ति जायमानः। इत्येवं संस्कृतस्य तन्निष्ठधर्मसंस्कृत्योरपि प्रथमतो राष्ट्र्यञ्चले ग्रामे ग्रामे निकटस्थभेरीलुम्बिन्यञ्चलीय-प्रमुखप्रदेशेषु च प्रचाराय वरिष्ठस्य वक्तुर्नेतृत्वे एकं दलं वत्सरेऽस्मिन्नेव प्रेष्यम्। तेन च भाषणसंभाषण-परामर्शादिपथेन शिक्षार्थिपरिवाराः संस्कृताभिमुखाः कार्याः। एवं स्वदेशीय-संस्कृतक्षेत्रेषु धरान-दिङ्गलादिषु अपि द्वित्रा वक्तारः संस्कृतप्रचाराय प्रेष्याः।

२—प्रत्यञ्चलं विशेषतो राष्ट्र्यञ्चलीयभाषापाठशालासु राष्ट्रियप्राईमरीसंस्थासु च अनिवार्यसंस्कृतः पाठ्यक्रम आगामिवत्सरादेव सञ्चालनीयः। यस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वीकृतिः शासनाद् ग्राह्या। यातायातसौविध्याय कुट्टिमपथनिर्माण यत्नः सत्यामुपयुक्तायां पृष्ठभूमौ नेपालस्य विशेषतो रात्रीतन्निकटाञ्चलानाञ्च वायुमण्डले संस्कृत-सस्कृतिपूते-जनतामहाविद्यालयप्राङ्गणे च वर्धमान-संस्कृताध्यायिच्छात्रसमूहशोभिते यथासंभवमितस्तृतीये वर्षे दाङ्ग विजौरीभूमौ संस्कृतविश्वविद्यालयस्याऽरम्भः स्यात् समुदर्को विश्वसनीयश्च लोकानाम्।

फलतः—दाङ्गवासिभिर्विद्वद्बन्धुभिः संस्कृतानुरागिजनैश्च पूर्वोक्तानि तत्सदृशान्यन्यान्यपि संस्कृतविश्वविद्यालयानुकूलानि बलवन्नेतृत्व-साध्यानि कार्याणि सकलनेपालीयविद्वज्जनसहयोगादानपूर्वंक्रमितो वत्सरादेव प्रारब्धव्यानि।

रामेश्वरशर्मा प्रा० आचार्य विभागः, त्रि० वि० वि०

२०२५।२।६ हरिप्रसादशर्मा आचार्यः प्रा० ,, ,,

विद्यानाथ उपाध्यायः प्रा० ,, ,,

श्रीकालिप्रसादमिश्रस्य ,, ,,

ता० १४।३।६८

नेपालराज्यस्य दाङ्गप्रान्तीयविश्वविद्यालयनिर्माणाय आयोजिते संस्कृत-सम्मेलने समवेतविद्वन्मण्डल्यां कृतस्य भाषणस्य नागरलिप्यां संस्कृतायां वाचि च निबन्धनम्।

माननीयाः सभापतिमहोदयाः तथा समादरणीयास्सदस्याश्च—अनन्तसमया-त्प्रसिद्धेऽस्मिन्-हिन्दूराष्ट्रे सस्कृतविश्वविद्यालस्योद्घाटना भविष्यतीति श्रवण-मात्रेण भारतीयायास्संस्कृतेस्सानुरागास्सर्वे मानवा नितान्तं प्रमोदभरमनु-भवन्ति। संस्कृता वागेवाऽस्माक संस्कृतिसभ्यतयोरुद्भवप्रचारयोर्मूलम्। यद्यपि प्रसिद्धमेतत्सर्वाः भाषाः स्वां स्वां संस्कृतिं प्रसुवते अत एव सर्वप्रान्तीया जनाः स्वस्याः संस्कृतेः संरक्षणाय प्रयतमानाः स्वकीयाया मातृभाषायाः संरक्षणे बद्धकक्षा दृश्यन्ते परन्तु तथापि संस्कृतभाषा भारतनेपाल्योर्मातृभाषासमा एव, एतद्देशयोः सर्वेषु प्रान्तेषु यावत्यो मातृभाषा विभान्ति तासां सर्वासामुपजीव्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संस्कृतैव भाषाऽस्ति। मान्धातृप्रभृतयो राजान एवात्र पृथिव्यां प्रथमं शासकत्वेन प्रसिद्धिं प्राप्नुवन्।

मनुस्मृतिग्रन्थात्प्राक्तना न सन्ति केऽपि ग्रन्था यत्र राजनैतिक-सामाजिक-धार्मिक-साहित्यिकविचाराः प्रकाशिता दृष्टा भवेयुः। ग्रन्थेऽस्मिन् स्वल्पकायेऽपि प्रायो यावन्तः सन्ति आदर्शजीवनोपयोगिनः पदार्थाः सर्वे प्रौढपाण्डित्येन विचार्य निहिताः सन्ति अत्र हि चतुर्वर्गप्राप्तिहेतवश्चत्वार आश्रमास्तेषाञ्च परिपालनविधयः गुरुशिष्यसम्बन्धा राजप्रजाधर्माः क्रयविक्रयविधयः सन्धिविग्रहविधिश्च तथा निर्धारिताः सन्ति येऽद्यत्वेऽपि सर्वत्र न्यायालयेऽपि प्रचलिता आसन्। दिलीपप्रभृतिराजतः पृथ्वीराजपर्यन्तं शासनव्यवस्था अस्यामेभाषायामभूदिति ऐतिहासिकाः प्रमाणम्। अतः संस्कृतभाषाया अस्यास्संरक्षणाय आवश्यकेऽत्र विश्वविद्यालये न कस्यापि विमतिरिति दृढं ब्रूमः। अतो वयं समवेतास्सर्वेऽपि विद्वांस आर्यजातीयानां कल्पलतासभां निधिरूपाञ्चास्माकं संस्कृतां वाचमिमां मत्वा अस्याः प्रचारसमादरयोः कृते-निर्मीयमानस्य संस्कृतविश्वविद्यालयस्य सोल्लासभरेण वचसा अनुमोदनमुच्चैर्व्याहरामः।

अतः परं विचारोऽयं कर्तव्यतयोपतिष्ठते यदस्य कीदृशं स्वरूपं कार्यं भवेदिति। अतोऽस्य निर्धारणाय परिस्थितिरपि पर्यालोचनीयाऽस्ति-तस्यां परिस्थितौ च येषां कृते विश्वविद्यालयोऽयमुद्घाट्यते तेषां छात्राणां कीदृशी भावना अद्यत्वे वर्तमाना दृश्यते-अर्थात् किन्ते धर्माचरणाय विद्यां कामयन्ते आहोस्वित् धनोपार्जनाय-विना संशयं मनसि स्फुरति धनोपार्जनायेति। तच्च राजशासनप्रवेशं विना प्रायो दुर्लभम्——यद्यपि व्यापारः कृषिश्चापि धनोपार्जनाय प्रभवतः किन्तु तावपि राजशासनाधीनावेव-राजशासनञ्चापि नाद्यत्वे प्राक्तनमेवास्ति सर्वेषां देशानां दूरता तु दूरं गतेति सर्वेषां देशानां दैनन्दिनी व्यवस्था प्रतिदिनं प्रतिपलञ्च प्रायः सर्वेषां पुरस्तान्नृत्यन्ती दृश्यते अतो विज्ञानस्य प्राबल्यं पुरत प्रकाशते संस्कृतभाषायां विज्ञानस्य व्यवस्था कथमपि न सम्भवतीति ज्यौतिषस्य आयुर्वेदस्याध्यापनापुरस्सरा इतिहासनागरिकशास्त्राभ्यां सह इङ्गलिशभाषाऽवि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्येतव्यतया शिरसि आपतति-पश्यामश्च नेपालस्य परस्सहस्राश्छात्रा भारतीय-संस्कृतविद्यामन्दिरमुपासीना नानाविधां सहायतां संकृतपाठशालात आदायापि इङ्गलिशविद्यामधीयाना दृश्यन्ते ते कथंकारं केवलां संस्कृतां गिरं तत्र निबद्धान् विषयाँश्चाधीत्य सन्तुष्टा भवेयुरिति अतः एतदर्थमद्यत्वे वाराणसेयसंस्कृतविश्वविद्यालयस्याधिकारिमनीषिभिरिमामेव विचारधारां मन-सिकृत्य पाठ्यत्वेन निर्णीता यावन्तो यादृशाश्च विषयास्ते एवात्रापि निर्धारणीयाः स्युरिति मे मतिः परन्त्वेते छात्रा भारतीयायाः संस्कृते रक्षकाः कथमपि न भवेयुरिति यदि तद्रक्षणं राज्यं चिकीर्षति तदाऽत्र विश्वविद्यालये भागद्वयम्-धर्मविज्ञानविभागं प्राच्यविद्याविभागञ्च व्यवस्थाप्य-हिन्दूविश्वविद्या-लयप्रणाली आश्रयणीया भवेत्-धर्मविज्ञानविभागस्य पाठ्यप्रणालीमनुसरन्त-श्छात्रा यागादीन् धर्मविधीन् संरक्षेयुरिति ब्राह्मणादिचतुर्वर्णस्य च जन्मादिमा-रभ्यान्त्येष्टिं यावत् सर्वेषां संस्काराणां कर्तार इव कारयितारोऽपि दुर्लभा विलो-क्यन्ते एवमेव पुराणप्रवचनपरा व्यासादयोऽपि अनुसन्धीयमाना अपि नोपलभ्यन्ते अतो धर्मविज्ञानस्य पठनपाठनप्रणाली क्षीणा दृश्यमाना धार्मिक-जनानां मनांसि खेदयति अत एव श्रीपूज्यमालवीयमहोदयाः स्वीये विश्वविद्यालये संस्कृतमहाविद्यालयस्य पाठ्यत्वेनाभिमतरक्षासु संस्कृतिरक्षणसाधनीभूतोऽयं धर्मविज्ञानविभागोऽपि पृथक् स्थापनीयो यत्र कर्मकाण्डविधिव्यवस्था सुदृढा स्यादिति ।

यद्यपि नेपालमहाराष्ट्रस्य हिमालयप्रदेशोऽयं तपोभूमितया प्रख्यातोऽस्ति अत्रैव भगवत्पाणिनिप्रभृतयो मुनयो भगवत्पादश्रीशंकराचार्यादयश्चैनं प्रदेशमध्यु-ष्यैव भाष्यमष्टाध्यायीञ्च प्रणीतवन्तोऽतोऽस्य सर्वे भागाः प्रशस्ता भान्ति तथापि जनतादाङ्गमहाविद्यालयस्य परिसरोऽयमस्माकं नितान्तं शान्तः प्राचीनगुरु-कुलानुरूपो दृष्ट इति अस्माकं मनांसि लुभति पुनरत्राऽऽगमनाय । महनीयेषु महानगरेषु स्थापिता विश्वविद्यालया नवेन पाश्चात्यचाकचिक्येन अभिनववय-स्कानां बालकानां मनांसि प्राक्तनविचारादाकृष्य बलाद्भौतिकेऽस्मिन् पाश्चात्य-विचारे प्रवर्तयन्तीति नैतेन संस्कृतविश्वविद्यालयस्थापनासंकल्पः फलितो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भविष्यतीति निर्जनोऽपि निर्मलः पावनोऽयं प्रदेश एव संस्कृतविश्वविद्यालय-स्थापनायोग्यः इति न विस्मर्तव्यम् अधिकारिमहाभागैरिति सम्मनुते ।

कालीप्रसादमिश्रः

भूतपूर्वप्रिंसिपल संस्कृतमहाविद्यालय हि० वि० वि०

सम्मानितप्राध्यापकः

संस्कृतविश्वविद्यालयस्य

मीमांसारत्नानां श्रीमुब्रह्मण्यशास्त्रिणाम् ।

(१) व्यवस्थितार्थमर्यादः कृतवर्णाश्रमस्थितिः ।
त्रय्या हि रक्षितो लोकः प्रसीदति न सीदति ॥

यह चाणक्यका वचन है । इसका यह आशय है कि जहाँ वैदिक आर्य-मर्यादा व्यवस्थित हो वर्णाश्रमव्यवस्था चालू हो त्रयी (तीनो) वेदोंसे रक्षित जनता प्रसन्न अर्थात् सुखी रहती हो, वहाँ दुःख नहीं होता है ।

तथा—स्वानि कर्माणि कुर्वाणाः दूरे सन्तोऽपि मानवाः ।
प्रिया भवन्ति लोकस्य स्वे स्वे कर्मण्यवस्थिताः ॥ मनु०

इसका यह आशय है - वैदिक सनातन धर्मानुयायी विद्वान दूर रहते हुये भी अपना काम करते हुये सारे लोगों का प्रिय होते हैं ।

यह भारत और नेपालका समान है । इसलिये इस विश्वविद्यालयके मूल-स्रोतमें वैदिकाचार सुरक्षित हो धार्मिकता आध्यात्मिकताको मूलमें रखते हुये वेदका साधारणज्ञान व्याकरणन्याय इत्यादि दर्शनोंमें प्रगाढपाण्डित्य और दर्शनोंका साधारणज्ञान कराते हुये आधुनिकव्यवहारोपयोगी विषयोंका भी ज्ञान कराना ही सं०वि०विद्यालयका उद्देश होना चाहिये ।

२—(क) मेरा यह मत है कि इसमें शुद्धसंस्कृतशिक्षा का ही प्राचीनपरम्पराको अक्षुण्ण रखते हुये धार्मिक आध्यात्मिक ज्ञानसम्पन्न देश और समाजका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उद्धार करने वाले पण्डितों को तैयार करना। इसमे आधुनिक विज्ञानका निवेश करने का प्रश्न नही उठता। जैसे लाकालेजोंमें आर्टविज्ञानकी पढाई नही होती है।

(ख) इसी में दो धारा करा दी जाय प्रथम धारामें प्राचीन परम्पराका अक्षुण्ण रखते हुये शास्त्रार्थमें निपुण सदाचारसम्पन्न विद्वानोंका तैयार करना।

(ग) प्राचीन शिक्षाप्रणालीकी रक्षा करते हुये आधुनिकव्यवहारोपयोगी विषयोंका (इतिहास भूगोल विज्ञान आदि का) समावेश यथावकाश किया जाय। और संस्कृतके माध्यमसे उन ग्रन्थोकों तैयार कर उसीको पढाना चाहिए।

(घ) प्रारम्भिक शिक्षा नेपाली भाषामें हो, उच्च कक्षाकी पढाई संस्कृत भाषाके माध्यमसे हो, जिससे संस्कृतमें बोलनें लिखने पढानेका अभ्यास अप्रतिहत हो।

प्राचीन ग्रन्थोंका अध्यापन-प्रणालीका अभिप्राय यह है कि सूत्र, भाष्य वार्तिकका यथावत् अध्यापन कराते हुये टीका टिप्पणी आदि सम्पूर्ण किसी एक ग्रन्थका भी अध्ययन होना चाहिए। जिससे प्राचीन तथा नवीन विषयोंका भी अच्छा परिज्ञान हो सके। जैसा व्याकरण में सूत्र, भाष्य, शेखर, न्यायमें सूत्र, भाष्य, वार्तिक, टीका, नव्य न्यायका भी पूर्ववाद उत्तरवाद ऐसा मीमांसामें सूत्र, भाष्य, वार्तिक शास्त्रदीपिका अथवा भाट्टदीपिका आदि इसमें कितना अंश रखना चाहिए इसका निर्णय वादमें किया जायेगा।

(ङ) इतिहासका एक नवीन ग्रन्थका निर्माण संस्कृत भाषामें होना चाहिए। जिसमें श्रुति-स्मृति शिष्टाचारके द्वारा मानवजीवनमें उपयोगी हो जैसा श्रीमद्वाल्मीकिरामायण महाभारत श्रीमद्भागवत आदि पुराणोंका अनुसार विषय हो। वर्तमान इतिहास अधुरा और निराला है। और मध्यकालीन है। उसका आदि अन्तका पता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नहीं है परन्तु इसमें जो उपादेय हो उसको लेना चाहिये। हम लोग जो नित्य सन्ध्यावन्दनादिमें सङ्कल्प करते हैं उसके अनुसार ही होना चाहिये। मैं यहाँ इसके वारेमें एक ग्रन्थ उदारहण रूपमें देता हूँ। वह है आर्यविद्यासुधाकर यज्ञेश्वरभट्टका है जिसके दो संस्करण छप चुके हैं। यह निर्णय नहीं निर्देशमात्र है।

३—इस समय हमारे सं० साहित्यमें जितने अपूर्व गहनातिगहन विज्ञान निहित है, उसका अनुसन्धान संरक्षण परिवर्धन, वैदिक प्राचीनविद्वत्परम्पराके अनुसार होना चाहिए। इनका ग्रन्थ संस्कृतके माध्यमसे होना चाहिए।

४—इसके साथ वैदिक आर्यसंस्कृतिका समर्थन संरक्षणके लिए शास्त्रार्थकी प्रणालीको अक्षुण्ण रखना अत्यन्त आवश्यक है इसके विना पदार्थका सशोधनबुद्धिका परिष्कार नहीं हो सकता है यही सं० विद्याका महत्ता है यह अन्य भाषामें नहीं है हो तो इसीका आभास मात्र है जैसे पुरातत्त्व विभागमें टूटे फूटे मूर्तियां, छिन्न-भिन्न चीजोंका संग्रह इत्यादि चीजोंका संरक्षण राज्य गरकार करता है वैसा वैदिक विद्वानोंकी जो परम्परा है इस परम्पराका अक्षुण्ण रखना इसका परम कर्तव्य होना चाहिए।

५—यहांके स्नातक, सत्य, ब्रह्मचर्य, अहिंसा, व्यायाम, आदिका पालन करते हुए ईश्वर भक्त हो देशभक्त प्रकाण्ड विद्वानोंका तैयार करना इस विश्वविद्यालयका परम कर्तव्य होना चाहिए।

सत्येन ब्रह्मचर्येण व्यायामेनाथ विद्यया।
देशेशभक्त्या त्यागेन सम्मानार्हः सदा भवेत् इति॥

इन विषयोंको ध्यानमें रखते हुए आधुनिक भौतिक विज्ञानको पढानेके लिये सं० भाषाके माध्यमसे ग्रन्थ वनाकर उन्हीं ग्रन्थोंको पाठ्यप्रणालीमें समाविष्ट करना आदि।

इसका सारांश

संस्कृत भाषामें प्रवेश होनेके लिए पञ्चतन्त्र हितोपदेश रघुवंश आदि काव्य, तथा अमरकोष तथा व्याकरण शब्दरूपावली, धातुरूपावली,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समासचक्र, इसके बाद असाधरण विषयोंका अध्यापनके साथ साधारणज्ञान प्रमाण-प्रमेय-आदिज्ञानके लिए जैसे न्यायमें तर्क भाषा या मुक्तावली, सांख्यमें सांख्यतत्त्वकौमुदी, योगमें **योगसूत्र भोजवृत्ति**के साथ मीमांसामे **मान-मेयोदय** या **पूर्वतन्त्रसिद्धान्तरत्नावली,** या **मीमांसापरिभाषा** या न्याय प्रकाश, इत्यादि। वेदान्तमें **वेदान्तसार पञ्चदशी** या **वेदान्त परि-भाषा, इत्यादि**। बौद्धदर्शनमे **न्यायविन्दु** इत्यादि। उपर्युक्तार्थ का यह विश्लेषण है कि विश्वविद्यालयका जो अध्ययन कालका त्रेधा विभाजन हो।

१—प्रथम भागमें साहित्य, कोश, व्याकरण।

२—द्वितीय भागमें असाधारण विषय, वेद, व्याकरण, न्याय, इत्यादि। और असाधारणज्ञानके लिए साधारणदर्शनज्ञान।

३—तृतीय भागमें शास्त्रार्थके ग्रन्थ रखे जाँय। शास्त्रार्थके साथ तत्तच्छास्त्रके मौलिक विषयोंपर विशिष्टाध्ययन हो। तत्तच्छास्त्रके विषयमें वैदेशिक विद्वानोंसे किया हुआ वैदिक आर्य सिद्धान्तके अनुकूल बातोंको छोड़कर खण्डनीय अंशोंको निरास करना। उन आक्षेपोंका समाधान शास्त्रीय दृष्टिसे दें जो हमारे यहाँ नहीं है। उन विषयोंको लेना इत्यादि संस्कृत माध्यमसे निर्माणकर पाठ्य ग्रन्थमें समावेश करना इत्यादि। आचार्य होनेके बाद उनकी प्रतिभा योग्यता और परिश्रमके अनुसार शास्त्रके प्रकाण्ड पाण्डित्यके लिए ३ वर्ष अधिक रखकर उसका प्रबन्ध की जाय जिसमें उसकी रुचि हो, उसमें अनुसन्धान कराया जाय। ग्रन्थका प्रकाशन नवीन समयोपयोगी ग्रन्थका निर्माण, तथा प्रकाशन विश्वविद्या-लयके तरफसे होना चाहिए। इस तरह वेदादि सभी विषयोंमें प्रकाण्ड पाण्डित्यके साथ तत्तद् विषयोंके ग्रन्थोंको जो पढ़ा सके। और जो वर्णन, लेखनकला आदिमें निपुण हो उनके द्वारा समयोचित आवश्यक ग्रन्थोंका निर्माण तथा प्रकाशन समय-समय पर होना चाहिए। इस तरहसे विश्व-विद्यालयका सभी कार्य होनेपर विश्वविद्यालय महान् उपकारी होगा। और सभीके लिए आदर्श होगा।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विशेष सूचना

विश्वविद्यालयको रोचक तथा आकर्षक बनानेके लिए यह आवश्यक है कि विद्यालय, महाविद्यालय, विश्वविद्यालय, और धर्मस्थान आदिमें चुनावकी प्रतियोगितामें संस्कृतविश्वविद्यालयोंका स्नातकोंको प्रथम स्थान देना चाहिए। अध्यापनके अतिरिक्त राजकीय पब्लिक सर्विस कमीशन द्वारा किये जानेवाले सभी नियोक्तिमें प्रथमापरीक्षोत्तीर्ण को ५ रू० अतिरिक्त वेतन, मध्यमोत्तीर्णको १० रु० अतिरिक्त वेतन शास्त्रिपरीक्षोत्तीर्णको १५ रु० अतिरिक्त वेतन, आचार्य परीक्षोत्तीर्णको २० रु० अतिरिक्त वेतन देना चाहिए।

मीमांसारत्नम् अरुणाचलम्
सुब्रह्मण्य शास्त्री
मीमांसा-वेदान्ताचार्य
१९३९ शास्त्रीयाचार्य परीक्षामें स्वर्णपदक विजेता
आचार्यमीमांसादर्शन प्रकरणपञ्चिका, विधिरसायन,
मीमांसादर्शनका परिचायक, मीमांसाके प्रमुख
आचार्यगण अद्वैततत्त्व सुधा द्वितीयभाग दो
सम्पुटोंका सम्पादक, मीमांसा धर्मशास्त्रोंका
शोधकार्योंका निर्देशक,
सं० म० वि० का० हिं० वि० वि० वाराणसी–५

न्यायाचार्य-श्रीविभूतिभूषण-भट्टाचार्याणाम्।

विगतमार्चमासस्य १४. १५. १६ तारिकासु नेपालप्रदेशीयदाङ्क्षेत्रस्य जनतामहाविद्यालये समेतैर्विद्वद्भिस्तत्र संस्कृतविश्वविद्यालयस्थापनायैकः प्रस्तावः पारितः। संस्कृतविश्वविद्यालयस्थापनं तद्द्वारा संस्कृतवाङ्मयस्य प्रचारप्रसारौ च वैदिकसभ्यतायाः संस्कृतेर्वा दृढ़ीकरणाय भारतनेपालयोरत्यावश्यकावेव न अपि तु अनिवार्यावेवेत्यत्र नास्ति सन्देहलेशः, किन्तु एतद्विषये मया स्वकीयाः केचन विचाराः समुत्थाप्यन्ते। आशासेऽत्रापि भवद्भिरवधानं दास्यत इतिः—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१—भारते नेपाले वा साम्प्रतं या संस्कृतशिक्षापद्धतिः प्रचलति, मन्येऽत्यावश्यकन्तस्याः पुनर्नवीकरणम्। कस्यापि विश्वविद्यालयस्य तदेव साफल्यं यत् तत्र शिक्षिताः स्नातकाः सर्वत्र जीवनोपयोगिक्षेत्रे लब्धप्रतिष्ठा भवेयुः, तत्र चाध्यापयिष्यमाणा विषया लोके उपयुज्येरन्। पूर्वजैर्महर्षिभिर्यः स्वानुभवसंग्रहोऽस्मभ्यम्प्रदत्तस्तन्महत्वं वयमवबुध्येम। परन्तु नैतादृशी स्थितिर्वर्तमाने दरीदृश्यते। भारते नेपाले वा यावन्तोऽपि संस्कृतशिक्षालयाः सन्ति तेष्ववलम्ब्यमाना शिक्षापद्धतिः सम्प्रति विज्ञानप्रभाविते भौतिकोन्नतिपरके युगेऽस्मान् कादाय पातयतीति नातिरोहितम्बिपश्चिताम्। निःसङ्कोचमिदं वक्तुं शक्यते—यत् केवलं ये ये विषया अस्माभिरधीतास्तास्तान् तथावदेवाध्यापयितुं शक्ता वयं, नैतदतिरिक्तं किमपि सामर्थ्यं प्रचलिता पद्धतिरस्मास्ववदधाति, यदि नवीनेऽपि भवतां विश्वविद्यालये तयैव पद्धत्या स्थीयते, ततश्च तादृशा एव पठितपाठका विद्वांसः समुद्भूताश्चेत्कस्तस्योपयोग इति न जानीमहे। अतः प्रथमन्तु तत्राध्यापनविषयाणामामूलचूलं पुनर्नवीकरणमत्यावश्यकम्।

२—प्रायो दृश्यते यत् संस्कृतज्ञा विद्वांसः स्वतनयान् न संस्कृतज्ञान् कर्तुमीहन्तेऽपि तु तदितरविभिन्नविषयदीक्षितान् कृत्वा मोदन्ते। कोऽत्र हेतुरिति विचार्यमाणे प्रतिभाति, तैः संस्कृतमधीत्य स्वकीयजीवने निराशैवार्जिता। स्वकीये विषयेऽतितमाम्प्रौढिमवाप्ता अपि ते व्यावहारिके जगति सङ्कोचमेवान्वभूवन्। न स्वानिव ते स्वबालकानपि जीवनम्प्रति निराशान् दिदृक्षन्ते। अतोपि संस्कृतविश्वविद्यालयीया शिक्षा तादृशी विधातव्या यया अधीयमानस्य (अधीयानस्य) जीवनम्प्रति नैराश्यं मा भूत्।

३—नव्यतमे संस्कृतविश्वविद्यालये तत्सम्बद्धेष्वितरविद्यालयेषु च ये ये विषया अध्याप्येरन् ते लौकिकाः स्युः। तेषाञ्च प्रयोगात्मकं ज्ञानं छात्राणाङ्कृतेऽनिवार्यं भवेत्, न तु केवलं सिद्धान्तज्ञानम्। यथा साम्प्रतं कस्मिंश्चिदपि विश्वविद्यालये गणितविषयमवलम्ब्य स्नातकोत्तरपरीक्षोत्तीर्णश्छात्रो यत्र कुत्रापि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महतो संस्थानानां लेखापरीक्षणमायव्ययकनिरूपणम्वा कर्तुं सम्यक् पारयति किन्त्वस्माकं गणिताचार्य्यस्य पञ्चाङ्गगणनातिरिक्तं न क्वाप्युपयोगः ।

यद्यपि गणितस्योत्पत्तिविकासश्चास्मद्देशीय एवेति सडिण्डिममस्माभिरुद्घोष्यते । न्यायशास्त्रस्य कञ्चिदंशाभासमधीत्येतरे प्राड्विवाकाः महाधिवक्तारो वा भवन्ति किन्तु अस्माकं न्यायाचार्या अधीतग्रन्थानामपि परिष्करणे शैथिल्यमनुभवन्ति । धर्मशास्त्रस्य केवलम्व्यवहारप्रकरणमधीत्य न्यायाधीशैरपराधनिर्णयः क्रियते अस्माकं धर्मशास्त्रिणः तिथिनिर्णयेपि विवदन्ते । एवमेव राजशास्त्रमायुर्वेदं योगं तन्त्रं विषयान्तराणि वा ग्रहीतुं शक्यन्ते । अतो निदर्शिकाया विषयचयनं ग्रन्थानां निर्धारणं, तेषामध्यापनं च तथा भवेत् यथा तदध्येतृभिः सर्वत्र जीवनोपयोगिक्षेत्रे तदुपयोगः कर्तुम्पार्येत ।

४—वाराणसेयसंस्कृतमहाविद्यालयस्येतिहासोऽत्र साक्षी यद् बहवो विषया वेदान्तादयः सन्ति, येषां व्यावहारिके जगति न कोप्युपयोगः । अस्तत्रस्वल्पतमानां तादृशच्छात्राणामेव प्रवेशो विधयो येषामध्यात्मविषये वास्तविकी रुचिः स्यात् तथा ऐहिकेषु लाभेषु सर्वथैवौदासीन्यं भवेत् । एतदप्यवधेयं यत् छत्रपतिशिवाजीराज्ये ये पेशवादयः राज्यसञ्चालका आसन् ते मीमांसादिषु प्रौढ़पण्डिता अपि भवन्ति स्म । भारते तु आङ्ग्लशासनस्य प्रभावोऽयं यदैहिकविषयेष्वौदासीन्यं पण्डितानां विनाशस्य कारणमभवत् । बहवस्त्वेतादृशा अपि विषयाः साम्प्रतं पाठ्यन्ते ये सुतरामुपेक्षणीयाः । न तत्र शक्तेर्द्रव्यस्य चापव्ययः कर्तव्यः । अविचारितविषयाणां सन्निवेशो वाराणसेयसंस्कृतविश्वविद्यालये निष्फलः सञ्जातः ।

५—संस्कृतविश्वविद्यालयो दाङ्गप्रदेशे भवतु अन्यत्र वा, इत्यस्मिन् विषये तु राज्यस्य आर्थिकी भौगोलिकी राजनीतिकी वा स्थितिरपेक्षणीया भवति नात्र विषयेऽस्माभिः किमपि वक्तुं पार्यते ।

६—यदि वयं भारते नेपाले वा संस्कृतशिक्षायाः समुन्नतिं कामयामहे तर्ह्यस्माभिरवश्यमेनैतद विचारणीयं यत् संस्कृतविश्वविद्यालयानां स्थापनं स्थाने स्थाने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवतु किन्तु तत्राविचारितविषयप्रवेशो मा भूत्। तत्रत्याः स्नातका यत्र कुत्रापि गत्वा स्वावलम्बिनो भवेयुः। एतेषाञ्च नवीनविश्वविद्यालयानां माध्यमेनास्माकं पुरातनविज्ञानं जगति सुतरां प्रकाशमुपेयात्।

७—वयं नेपालदेशे स्थापयिष्यमाणस्य संस्कृतविश्वविद्यालयस्य स्वागतं व्याहरिष्यामः। तत्र चोपयोगिविषयनिर्धारणे, नियमनिर्माणे, नीतिनिरूपणेऽन्येषु वा सम्बद्धविषयेषु यथाशक्यं साहाय्यप्रदानाय सर्वदा सन्नद्धाः स्मः इति।

निवेदयते
विभूतिभूषणभट्टाचार्यः
२७।४।६८
(वाराणसेयसंस्कृतविश्वविद्यालयीयग्रन्थागाराध्यक्षः)

नेपाले संस्कृतविश्वविद्यालयः

जगतीह नेपालराज्यमेव हिन्दूराज्यम्। सौभाग्यात्तस्य महाराजो महेन्द्रवीरविक्रमसाहदेवो वैदिकसंस्कृतिसमुपासकः। अत एव विश्वस्य समस्तहिन्दूनां दृष्टिर्विन्दुरस्ति निजसंस्कृतिरक्षणविषये। किंच सा वैदिकसंस्कृतिर्देववाणी संस्कृतभाषावलोपरि प्रतिष्ठितत्वात् संस्कृतभाषाया उद्धारेणैव उर्जस्वला भवितुमर्हति। सांप्रतं सर्वत्र संस्कृतेतरशिक्षाया विकेन्द्रीकरणं संस्कृतशिक्षायाः केन्द्रीकरणं संस्कृतिसमुपासकान् त्रासयति। अतः संस्कृतविद्यानां समुद्धारो वैदिकसंस्कृतसमुद्धाराय प्रभवेत्।

यद्यपि भारते एको द्वौ नाम्ना संस्कृतविश्वविद्यालयौ स्थापितौ स्तः। तत्र वाराणसेयसंस्कृतविश्वविद्यालयः पुरतो विद्यते। तद्विषये बहु न वक्ष्मः, तस्य संस्थापको वाराणसेयसंस्कृतविश्वविद्यालयस्य वर्तमानां दयनीयतां सर्वदोषविगर्हितां दुःस्थितिं पश्चात्तपन् परलोकमगात्। अस्यां संस्कृतदुःस्थितौ नेपाले

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संस्कृतविश्वविद्यालयस्थापनप्रयासः सर्वथा श्लाघ्योऽभिनन्दनीयश्च । मन्ये तदुपरि विविधविद्यापारगानां विदुषां सम्मतिः प्राप्येत । तत्र केचन पाश्चात्यपथानुकारकाः-शोध-शोधचाकचिक्यप्रभाविता, तस्मिन्नेवनेपालसंस्कृतविश्वविद्यालये शोधकार्यप्रामुख्यं विधातु प्रेरयेयुः प्रभावयेयुश्च ।

किंच एतस्मात् पाश्चात्याभिमुख-परावलम्बनात् स संस्कृतविश्वविद्यालयः परिहरणीयः। केवलं संस्कृतविद्यानां स्वस्थरूपमध्ययनाध्यापनं भवेत्, येन संस्कृतविद्यारक्षणेन सह वैदिकसंस्कृतिरक्षणं संभवेत् । अतः प्रस्तावितस्याऽस्य नेपालसंस्कृतविश्वविद्यालयस्य सर्वविधमङ्गलाय श्रीविश्वेश्वरं पशुपतिं प्रार्थयामहे, इति ।

रामबालकशास्त्री
प्रधानसंपादकः—सस्कृतसाप्ताहिक-गाण्डीवस्य
नईबस्ती रामापुरा वाराणसी-१
१६।४।६९

२०२६ वैशाख ६ गते ६,

दाङ्गे संस्कृतविश्वविद्यालयस्थापनायाः समाचारं श्रुत्वा नितान्तं प्रसीदति मे चेतः । नेपालदेशोयं पुराकालत एव संस्कृतवाङ्मयस्य संरक्षणे प्रसिद्ध इति साम्प्रतमपि विश्वस्य एकमात्रहिन्दूराष्ट्रतया संस्कृतसंरक्षणभारः नेपालस्कंधे पतितोऽस्ति, विश्वविद्यालयोऽयं संस्कृतं तथा शिक्षयेत् यथा ततो निर्गताः स्नातकाः संस्कृतस्य प्रौढिं संरक्षन्तः आधुनिकजनजीवनेपि प्रौढा भवेयुरिति मे सम्मतिः ।

स्वा० महेश्वरानन्दः
श्रीचैतन्यमठः १३।३ भण्डारी गली
बाँसफाटक, वाराणसी
१२-४-१९६९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतिष्ठानपुरस्य संस्कृतमाध्यमिकविद्यालयस्य

श्री मन्तो विद्वत्सम्मेलनसमारोहप्रवर्तकाः

महामान्याः संस्कृतानुरागिणः ?

श्रीमद्भिः प्रस्तावित-संस्कृतविश्वविद्यालयस्योद्देश्येनानुष्ठिते विद्वत्सम्मेलन-समारोहे समागतानां नेपालमण्डलवर्तिनां पण्डितराज-प्रमुखानां योगिवर्याणां नरहरि-नाथानां तथा भारतभूमेर्नेपालभूमिं सनाथीकृतवतां प्रकाण्ड-पण्डितानां सनातनैक-धर्मधुरन्धराणां श्रीकरपात्रेयश्रीशङ्कराचार्यप्रभृतीनां विद्वत्प्रवराणां महर्षिकल्पानां शुभागमनेनास्मत् श्री ५ महाराजाधिराजानां महेन्द्रवीरविक्रमसाहदेवानां सर्व-काराणां यशसा सह नेपालभूमेरपि गौरवं रुचिरत्वं कृतमिति विदितप्राय एव उदन्तः किं पुनरुक्त्या,

संस्कृतभाषा भाषान्तराणां शिरोमणिरिति समेषामैकमत्यमेव अतस्तस्याः प्रधानतां विधाय अध्ययनाध्यापने कृते सति वर्तमानसमयापेक्षया संस्कृतस्योन्नति-पुरःसरं नेपालीभाषायाः शुद्धतां विज्ञाय स्वदेशनरेशं प्रति विशुद्धभावनो नागरिक एकामिप्रायो भविष्यति ।

अस्मन्नेपालराष्ट्रोपयोगिषु न्यायप्रशासनकार्यकलापेषु योग्यताप्रदानकुशलायां पाठ्यप्रणाल्यां सत्यामेव सर्वेषां संस्कृतभाषानुरागो भवेत् पुस्तकञ्च यस्मिन् संस्कृतशब्दाः सरलाः सुबोधतया बहुज्ञानप्रदाः समयोपयोगिनश्च सन्ति तादृशं परीक्षायां निर्धारितं भवतु । भाषान्तरपठनपाठनपरीक्षाकारके विद्यालयेऽपि अनिवार्यतया एकं पत्रं संस्कृतस्य भवितुमर्हति एवं सति संस्कृतं सुसंस्कृतं स्वसंस्कृति-रक्षकं जगत्प्रियञ्च भवत्येव ।

अस्मद्वेदादिसंस्कृतग्रन्थेऽधुना प्रचलितो विज्ञानचमत्कृतिबोधको विषयः किन्न वर्तते ? चरकसुश्रुतवाग्भटादिग्रन्थेषु किं शल्यचिकित्साप्रकारो नास्ति ? लीलावत्यादिपुस्तके बीजरेखागणितादिशिक्षा न दीयते किम् ? न किन्तु अस्ति भवति वर्तत एव, संस्कृतस्य दुर्बोधगभीरतया दुष्परिश्रमसाध्यत्वादन्वेषणेऽस्माकं शैथिल्यं जातम् । पाश्चात्त्यैर्विद्वद्भिरस्मद्ग्रन्थात् सारं सारं प्रगृह्य स्वभाषाया-मनुवदितुमध्यवसायः कृतः । अतः, अतः परं यथाशीघ्रं सर्वकारवेतनमुपादाय-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्नातकोत्तराधियुक्तस्य विद्वन्मण्डलस्य संस्कृतग्रन्थानवलोक्य ततो निष्कास्य च विज्ञानपाठ्यग्रन्थनिर्माणार्थं कर्तव्यतया प्रतिभाति ।

यावत्संस्कृते विज्ञानविषयाध्यापनं न भवति तावदेव भाषान्तरे तद्विषयाध्यापनं भवतु, तत्पश्चात् भाषान्तराध्ययनं देशाटनादौ भाषान्तरज्ञानप्रयोजनमेव ।

भाषान्तराध्यायिनामप्यस्मद्बन्धूनां संस्कृते प्रवर्तयितुमस्येको महानुपाय यत्सर्वकारवेतनेनोपभोग्ये पदे (जागीरपदवाच्ये) नियोक्तुं संस्कृताध्यायिनां प्राथमिकता भवेत् एतदेव सर्वश्रेष्ठोपायः ।

यथा देशकालपरिस्थित्यनुसारेण श्री ५ महाराजाधिराजसर्वकारैरनुगृह्य प्रदत्ता पञ्चायती पद्धतिरस्मद्व्यवहारेऽतीवोपयुक्ता एव न अपि तु नानाविधराजनीतिपरिबृंहितस्य विश्वस्याग्रतः पुण्यभूमिपाशुपतक्षेत्रवास्तव्यानां श्रीसर्कारच्छत्रच्छायाश्रितानास्माकं सर्वोपरि वरिवृत्यत इति गौरवं विदधती सर्वश्रेष्ठतया प्रतिभाति । यत्र पञ्चायतीदर्शने अस्मन्नेपालभूमण्डलोपयुक्ता आर्थिक-सामाजिक-राजनैतिक-पदार्थाः पदे पदे समन्विताः सन्ति तथा संस्कृतविश्वविद्यालये अप्यधुना पाश्चात्यविज्ञानकुशलैरिञ्जिनियर-डाक्टर-पदाधिकारिभिरन्यैश्च शिल्पकारैरनुसन्धाननिपुणैः क्रियमाणं व्योमयानटेलिभिजनराकेटादिसंज्ञकं विश्वचमत्कृतिकारकानेकप्रादुर्भावकारणं विज्ञानपाठनं च भाषान्तरं कृत्वा तदितरं सकलं संस्कृते भवतु । एतादृशसमन्वयपद्धत्यनुसारेणास्माकं संस्कृत विश्वविद्यालयो नेपालभूमेः पवित्रां संस्कृतिं रक्षयन् अनवद्यतामनिर्वाच्यतां च लभेतेति ब्रूमो वयमिति शम् ।

कुलचन्द्रसुवेदी

२०२५।१।३।५

अन्येऽध्यापकाः स्थान

१—क्षिमानन्द अधिकारी सं. मा. पा. भित्रि कोटटारी प्रधानाध्यापकः

२—भुवनेश्वरगौतमः ,, ,, ,, श्री ५ को सरकार

३—टङ्केश्वरगौतमः ,, ,, ,, संस्कृत माध्यमिक पाठशाला

भित्रीकोट टारी प्यूठान

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीकृष्णप्रसाद-घिमिरे-भागवतस्य

श्रीकृष्णो विजयते

●

प्रतिवेदन-पत्रम्

अयि माननीया विद्वद्वरिष्ठा राजपुरुषाश्च ।

प्रस्तावितविश्वविद्यालयीयकृतविद्वत्संमेलनाध्यक्ष-निदेशक-सचिवप्रभृतिषु तथा च विशिष्टव्यवस्थापकायोजकवर्गेषु च मदीयं मन्तव्यं वि. सं. २०२४।१२।१६ सोमदिनस्य श्रीमतां पत्राज्ञानुसारतः प्रेष्यते मया । तदित्थं भवितुमर्हति ।

विदाङ्कुर्वन्तु तत्र भवन्तो महनीयमहानुभावा विद्वद्वरिष्ठा धन्यतमा यद्विशेषोऽस्मादृशस्य मनुष्यवर्गस्य जन्मत एव सांसारिकोऽयं विषयप्रवेशो द्वैविध्यमुपागतः प्रतिभाति । प्रथमः पारमार्थिको द्वितीयो लौकिकश्चेति तद्द्वयोरपि विषययोः प्रावीण्यसाधनं महाज्ञानमेव । यत्संभवति गुरुतः शास्त्रतश्च । विनयादिसद्गुण-सम्पन्नेभ्यः शिष्यशिष्टावगेष्यः एव तद् ददति ते तानि च । निर्विवादमेवैतत् । ततस्ते प्रवीणा भवन्ति चोभयोरपि विषययोः । अस्तु विस्तरेणालम् ।

पुनः संस्कृतविश्वविद्यालये तदैव प्रवेशः सम्भाव्यते तेषां विद्यार्थिवर्गाणां यदा ते मध्यमापरीक्षां समुत्तीर्णा भवन्ति। मदीयकथनतात्पर्यमेतत् पञ्चदशषोडशवर्ष्याभ्यन्तर एव सफला भवन्ति तां परीक्षां सफलीकर्तुम् । दृश्यन्तेऽस्माभिश्च चेतस्ततोऽस्माकं त्रिचतुरवर्षीया बालका अपि पथिकान् पाश्चात्यात् दृष्ट्वैव कथयन्ति—गुड़वाई ? ह्वाट इज योर नेम ? इत्यादिवाक्यानि कथयन्तः संसर्गवशत एव । तस्मात् विश्व-विद्यालयप्रवेशात् पूर्वमेव जानन्ति ते चाधुनिकीमाँग्लादिभाषाम् । वातावरणमेवा-स्माकं सञ्जातं तादृशप्रायम् । ते विद्यार्थिनः पुनः प्रविश्यापि विश्वविद्यालयं संस्कृत-विद्यया सार्धमेवच्छलेनापि पठिष्यन्ति भाषान्तराणि न वयं प्रभवामस्तत्र रोद्धुं तान् यत्र ते कृतसंस्काराः पूर्वत एव अतो वर्तमानायां स्थितौ नात्र ते प्रोत्साहयितव्या भाषान्तरपठने पाठने च। तदत्रास्माकं विद्वत्संमेलनावसरे प्रस्तावितभाविसंस्कृतविश्व-विद्यालये केवलं विशुद्धा सुसंस्कृतविद्यैव पठन-पाठने भौतिकोन्नतौ ह्याध्यामिको-न्नतौ च महाकल्याणं दरीदृश्यतेऽस्माभिः सम्यक्तया विचारसिन्धाववगाहमाने ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतो नात्र विश्वविद्यालये स्यादाधुनिक्या अन्यस्याः भाषायाः संस्कृतेः सभ्यताशब्द-वाच्याया कलियुगप्रतिरूपाया नग्ननृत्यात्मिकायाः समाजस्वरूपनिदर्शिन्या अभूतपूर्वाया गतिविधिशिक्षणस्वरूपः समावेशः। यत्करणे मित्रराष्ट्राणामिवा-दर्शतामुपयात्यस्माकं पवित्रतरा महर्षिकल्पानामस्मत्पूर्वपुरुषाणां महर्षीणां च जन्मस्थलीयं धन्यतमा नेपालभूः। इयमेव मदीया मनीषा। महद्विचारणीय-मेवैतत्।

पूर्वकाले यथात्रैव प्राप्तपरब्रह्मस्वरूपाणां जीवन्मुक्तानां दर्शनस्पर्शनादिनैव विनाशितकलिकल्मषाणां महामुनीनां वसिष्ठ-याज्ञवल्क्य-व्यास-वाल्मीकिप्रभृतीनां विशुद्धाध्यात्मिकसद्वस्तुशिक्षणस्थलानि गुरुकुलाभिधेयानि शुभाश्रमाणि भवन्ति स्म तथैवास्माकं प्रस्तावितविश्वविद्यालयेनापि भाव्यम्। संस्कृतविश्वविद्यालयेऽ-प्यस्मिन् पठन-पाठनरीतिस्तत्रत्यविद्यार्थिवर्गाणामावासः स्थितिश्च तादृश्येव विशुद्धा सविनयाचारविनयादिपालनपरा लौकिक्याध्यात्मिकसद्वस्तुप्राप्ति-पद्धतिश्च भवितुमर्हति। विशुद्धप्राचीनर्षिकुलसरणेरनुसरणपराणि चाधुनिक-लोकोत्तराणि छात्रावासकल्पानि तृणवंशादिनिर्मितानि निवास्थलानि भोजन-स्थानानि च तादृशान्येव स्युर्यानि तान् विभूषयेयुरिति मे सिद्धान्तः श्रीमतां तत्र भवतां विचारपथमागच्छति चेद्विमर्श्यः। मार्गेण नत्वा ते विद्यार्थिनः सर्वसद्गुण-विशिष्टाः सन्तः स्वात्मोन्नतौ लौकिकोन्नतौ च महाशिखरं समाक्रान्ता आदर्शस्नातका सत्रजायेन्ते चोन्नतयिष्यन्ति ह्यस्माकं सुरुचिरां नासिकाम् तत्रत्या गुरवर्चषिकल्पाः सदाचारपरिपालकाःसन्नियमा ब्राह्ममुहूर्ततः शर्वर्याः प्रथमप्रहरपर्यन्तं लोकोत्तर-नित्यनैमित्तिकादिसत्कर्मकर्तारश्च भवेयुः इति मदीयो राद्धान्तः। अलं बहुविधैरनावश्यकैः प्रलापैस्तत्रभवत्सु सर्वज्ञेषु।

अयि महोदयाः यद्यस्माकं संस्कृतविश्वविद्यालयस्याभावोऽस्मानानेपालीय-शीर्षस्थसाधारणपुरुषान् विह्वलयति चेत् कार्यमेवैतदस्माकं मुख्यकर्तव्यत्वेन वर्तते येन केनाप्युपायेन तत्परिपूरणीकरणम्। प्रथमतः स्थानं च तत्पोषणहेतुभूतं तद्दाङ्गा-भिधानं सुन्दरतरमेव दरीदृश्यतेऽस्माभिर्यस्मिन् जलवाय्वादीनामपि ह्यानुकूल्यं समीचीनमेव प्रतिभाति। प्रोत्साहयितव्यास्तत्रत्या धनिकवर्गो मुहुर्मुहुर्यथाधुना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृश्यन्ते तथैव जीवनान्तकालं यावत् भवेयुः ये चर्षिकल्पान् पूर्वोक्तसन्निमयाचार-परिपालकान् विद्यार्थिनः स्नातकान् जनयन्तस्ते सर्वेपि महानुभावाः संसारदृष्टा-वादर्शरूपा निरन्तरं धन्यवादार्हाश्च भवेयुर्यथा तैः विद्रत्समेलनं सम्यक्तया निर्वाहितम् तथैव कर्मण्यस्मिन्नपि श्रद्दधेयुरिति मद्विचारः

